**PURANETIHASA**

**ACHARYA 2nd YEAR**
**Course/Paper.10**

# स्वशास्त्रीयेतिहासः निबन्धश्च

## *Svaśāstrīyētihāsaḥ Nibandhaśca*

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
(केन्द्रीयविश्वविद्यालयः)


**CENTER OF DISTANCE & ONLINE EDUCATION**

*(Formerly Directorate of Distance Education)*

**NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)**

*(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

## पौराणिकप्रभापरिशीलनम्

पुराणार्णवगाम्भीर्यं विलोड्य विदुषां मुदे।

पुराणरत्ननिचये कृतभूरिपरिश्रमः।।

श्रीपाठ्युपाह्व-श्रीकृष्णमणिशास्त्री सुधीवरः।

प्रस्तौतीदं पुराणानां प्रभायाः परिशीलनम्।।

### पुराणावतरणप्रसङ्गः

मनुष्यो महानपि बुद्धिमान् कथं न स्यात्, किन्तु तस्मिन् भ्रमप्रमादादीनां सम्भावना भवत्येव। अत एव मानवरचितं ग्रन्थमधात्य निर्भ्रान्तं पूर्णं च ज्ञानं भवितुं नार्हति। वेदा न केनापि मनुष्येण रचिता नापीश्वरेण निर्मिताः सन्ति, किन्तु परमेश्वरनिश्वासवन्नित्या अनादयोऽनन्ता अपौरुषेयाश्च सन्ति। प्रलये परमेश्वरेऽन्तर्हिताः ते सृष्टिसमये ईश्वरस्य निश्वासरूपेण निःसरन्ति। सर्वप्रथमं ब्रह्मा वेदानां ज्ञानं प्राप्नोति। ततो यः ऋषिः यादृशीं तपस्यां कुरुते, तस्य समक्षेतदनुरूप एव शेदस्यांशः प्रादुर्भवति। ततः स ऋषिः स्वं शिष्यं वेदं शिक्षयति, सोऽपि स्वं शिष्यं शिक्षयतीत्येवं शिष्यप्रशिष्यतच्छिष्याणामविच्छिन्नया गुरुशिष्यपरम्परया अद्यत्वेऽपि वेदानां प्रचारः प्रसारो वा वोभवति।

वेदा न केनापि पुरुषेण प्रणीताः सन्ति। अतस्ते अपौरुषेयाः उच्यन्ते। अत एव तत्र न भ्रमः-प्रमाद-कर्णापाटव-विप्रलिप्सादीनां दोषाणां काऽपि सम्भावना विद्यते। इत्थं वेदो एऐव सर्वश्रेष्ठानि निर्भ्रान्तज्ञानसाधनानि सन्ति।

पुरा द्विजबालका उपनयनसंस्कारानन्तरं ब्रह्मचर्यपूर्वकं चिरकालं गुरुगृहे उषित्वा वेदान् अभ्यसन्ति स्म। ततो वेदार्थमवगन्तुं शिक्षा-कल्प-व्याकरण-निरुक्त-ज्योतिष-

छन्दसां षण्णां शास्त्राणामध्ययनं कुर्वन्तिस्म। एवं महता परिशमेण वेदानां वास्तविकः अर्थऽवगम्यतेस्म। तथा च निष्कामभानापूर्वकं वैदिकानां कर्मणामनुष्ठानेन यदा अन्तःकरणं निर्मलं भवति, तदैव निरमले मनसि वास्तविकं ब्रह्मज्ञानं सम्भवति। एतदभिप्रेत्यैवौक्तम्-भगवता पतञ्जलिमुनिना महाभाष्यस्य पशपशाह्निके।

''ब्राह्मणेन निष्कारणं षडङ्गो वेदोऽध्ययो ज्ञेयश्च।''

व्यास-वाल्मीकिमुनिप्रभृतयो महर्षयोऽलौकिकीं तपस्यां कृत्वा परमात्मनोऽनपकम्पया वेदानां यथार्थमर्थं ज्ञात्वा तत्प्रचारस्यावश्यकतामनुभूतवन्तः। साधारणा जना अधिकसमयपर्यन्तं गुरुगृहे स्थातुं न शक्कुवन्ति, नापि वेदार्थमवगन्तुं सब्रह्मचर्यं तादृशं कठिनं परिश्रमं वा कर्तुं प्रभवन्ति। अतः तादृशानां जनानं कृते वेदानां निगूडमर्थंनिरूपयितुं ते सरसायां सुबोधायां सरलायां प्राञ्जलायामतिमञ्जुलायां सुरुचिपूर्णायाञ्च संस्कृतभाषायां रामायणं महाभारतं पुराणागि च व्यरचयन्। तथाचोक्तं महाभारतस्यादिपर्वणि-

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।

बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति।।१।२६८

अतो भारतीयै रामायणेन महाभारतेन पुराणैश्च वेदानं यथार्थमर्थमवगन्तुं यत्नो विधीयते।ये च पुराणादीनामध्ययनं विना वेदानां यथार्थमवगन्तुं चेष्टन्ते, तेषां वास्तविकं वेदार्थज्ञानसम्भवं प्रतिभाति, यतो हि एकस्यैकारिण्या भारतीयीयाः संस्कृतेश्च परिपोषका वेदा रामायणं महाभारतं पुराणानि च सन्ति। अत एवोक्कं सत्स्यपुराणे-

यो विद्यच्चतुरो बेदान् साङ्गोपनिषदो द्विजः।

न चेत्पुराणं संविद्यान्नैव स स्याद्विचक्षणः।।

यदा भूमण्डलस्य समस्ता जातयो भोजनपानशयनसन्तानोत्पादनातिरिक्तं किमपि न जानन्तिस्म। तस्मिन् घोरऽन्धकारसमयेऽपि सभ्यताया ज्योति, प्रज्वालका आर्याणां वेदा एव सन्ति। देशीया विदेशीयाश्च सर्वे विद्वांस एकेन स्वरेण स्वीकुर्वन्ति यद् ऋग्वेदात्पूर्वं किमपि पुस्तकं विश्वस्य समक्षे नेदानीं यावदुपलब्धं विद्यते। ऋग्वेद एव सर्वप्राचीनं पुस्तकमस्ति। विश्वस्य ज्ञानिनो विद्यत एव। तेषामेव वेदार्थानां सुगमतया सविस्तरं ज्ञानाय पुराणानामाविर्भावोऽभवत्। तथाचोक्तं पुराणार्णवे-

विस्ताराय च वेदानां स्वयं नारायणः प्रभुः।

व्यासरूपेण कृतवान् पुराणानि महीतले।।

गूढतया वर्णितानामर्थानां यावत् सुरुचिपूर्णया शैल्या वर्णनं न क्रियेत, तावत् पुराणानां निर्माणस्य प्रयोजनं पूर्णं न भवितुमर्हेत् अत एव आख्यानोपाख्यानगाथाकल्पशुद्ध्यादिभिः तेषां वस्तारं कृतवान् भगवान् व्यासदेवः। तदुक्तं विष्णुपुराणे-

आख्यानैश्चाप्युपाख्यानैः गाथाभिः कल्पशुद्धिभिः।

पुराणसंहितां चक्रे पुराणार्थविशारदः।।३।६।१५

वेदविज्ञानस्य मनोरञ्जके आख्यानेपरिणतीकरणं पुराणानामपूर्वं कौशलं विद्यते। वेदानां वास्तविकं रहस्यमवगन्तुं प्राचीनाख्यानोपाख्यानादिवर्णनव्याजेन विविधानुपदेशान् दातुं विभिन्नानां विषयामामुत्कटलालसां परिहायान्तःकरणं भगवदुन्मुखं कर्तुं च यासामैतिहासिकघटनानामुल्लेख आवश्यकोऽस्ति, पुराणेषु तासामेव विशेषतः वर्णनं

विद्यते। सर्वासां पौराणिकानां कथानां मूलं वेदा एव विद्यन्ते। पुराणेषु यत्किमपि लिखितं वर्तते तत्सर्वं वेदमन्त्राणां विस्तृता व्याख्याऽस्ति। यथा ऋग्वेदे इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् (१।१२।१७) इत्यादिना वर्णितवामनावतारकथा वामनदिपुराणेषु विस्तरेण वर्णिता विद्यते। कस्या अपि आख्यायिकायास्सविस्तरं वर्णनं वेदस्योद्देश्यन्नास्ति, किन्तु वेदे कस्मिंश्चिदुद्देशे या कथातिसंक्षेपेण निर्दिष्टाऽस्ति सैव पुराणेषु विस्तृताख्यायिकारूपेण वर्णिता विद्यते। यतो हि साधारणेषु मनुष्येषु कौतूहलपूर्वकं भगवद्भक्त्युत्पादनं पौराणिकानामाख्यायिकानां प्रमुखं लक्ष्यमस्ति। यथा श्रीमद्भागवतादिपुराणेषु जगन्मातुः गिरिराजकुमार्याः भगवत्याः पार्वत्या उमारूपेण जन्मग्रहणकथा दृश्यते। कोनोपनिषदि च ब्रह्मविद्याया हैमवत्या उमारीपेण प्राकट्यं वर्णितमस्ति।तद्‌यथा-स तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैमवचीम्। यता वा अथर्ववेदे (का. ८ सू. प्र. ३।४।५) महाराजस्य पृतोः पृत्वीदोहनं संक्षेपेण वर्णितं विद्यते। यतो हि वेदा नोपाख्यानमूलकाः सन्ति, अतः तेषु स्थलविशेषे एवोदाहरमरूपेणोपाख्यानमस्ति, किन्तु पुराणेषूपाख्यानानामेकत्र समावेशो जातोऽस्ति। अत एव पुराणेषूपाख्यानानामाधिक्यं विस्तारश्च दृश्यते। वेदाः पुराणानि चैकस्य सनातनधर्मस्याभिवृद्धये लोककल्याणाय च विबिन्नकाले आविर्भूता महाग्रन्थाः मन्यन्ते। पुराणेषु एव। तस्माद्वेदार्थानां विवरणाद्वेदपुराणयोरैक्यं निर्बाधं सिध्यति।

## पुराणानां महत्वम्

पुराणानां महत्वं विविधाभिः दृष्टिभिरवगम्यते। ध्मिकदृष्टाया पुराणानि वेदनिहितस्यैव धर्मस्य भावगम्यया सरलता भाषया विशदं वर्णनं कुर्वन्ति। पुराणानां

सामाजिकं महत्वमपि न्यूनं नास्ति। प्राक्तनस्य समाजस्य स्वरूपमस्माभिः पुराणैरेवोपलभ्यते। पौराणिकस्येतिहासस्य पुष्टिस्तु तत्रतत्रोपलब्धैः शिललेखः वैदेशिकानां यात्रावर्णनेन चेदानीं प्रचुरमात्रायां बोभूयते। ऐतिहासिकदृष्ट्या च पुराणेषु तीर्थानां विशदं वर्णनं विद्यते, येन तत्तत्स्थानानां विस्तृतस्य भूगोलस्य सम्यग् ज्ञानं भवति। स्कन्दपुराणस्य काशीखण्डे प्रत्येकस्थानानां शिवलिङ्गानां व विस्तृतं वर्णनं विद्यते। यत्सहयोगेन काश्याः प्रसिद्धानां भूभागानां समीचीनतया ज्ञानं भवितुमर्हति । श्रूयते- विदेशीयाः विद्वांसः पुराणानां साहाय्येनैव नीलनद्या अन्वेषणं कृतवन्तः।

पुराणानां प्रमुखं प्रयोजनं वेदविहितानां तत्त्वानां जनसाधारणेषु प्रचारो विद्यते। एतत्सिद्धये तैः सरला सुगमा संस्कृतभाषाऽवलम्बिता। केवलं भारतवर्षे एव नहि, किन्तु भारताद्बहिर्विविधेषु देशेषु पुराणैः वैदिकविचारधारायाः प्रवाहविस्तारस्य सुयशोलब्धम्। पुराणानां कृपया सर्वसाधारमाः मनुष्याः स्वजीवनं संयमशीलं विधाय कल्याणमार्गप्रवृत्तेरधिकारं प्राप्तन्नतः। वैदिकधर्मस्य लोकप्रियत्वनिर्माणश्रेयः पुराणैरेव प्राप्तमस्ति। पुराणानि समस्तानां विद्यनामक्षयाः कोषाः सन्ति। अतः विवधानां दरिद्रतानां लक्ष्यीभूतमपीदं भारतवर्षमद्यत्वेऽपि पुराणानां प्रभावेण धनवानिव स्वकीयं शिरो विश्वसमक्षे समुन्नतं कर्तुं शक्नोति।

पुराणानि गौरवदृष्ट्या अतएव दृश्यन्ते यदत्र वेदानां शइक्षायाः पुष्टिः कृताऽस्ति, दृष्टान्तद्वारा च वेदार्थानामेव विशदीकरणं विद्यते। विश्वस्मिन् कस्या अपि सभ्यजातेः पार्श्वे पुराणसदृशः सर्वाङ्गपूर्णो न कोऽपि ग्रन्थे विद्यते। पुराणेषु वेदार्थानां स्पष्टीकरणेन सह

कथावैचित्र्यद्वारा गूढाद्गूढतमस्यापि तत्त्वस्य साधारणजनानां हृदयङ्गमसम्पादनवैशिष्ट्यमस्ति।

वर्तमानेयुगे धर्मरक्षायाः, वर्णाश्रमव्यवस्थाप्रचारस्य, भारतीयायाः संस्कृतेरुद्बोधस्य, भक्तेर्विकासस्य त यद्दर्शनं बोभवीति, तस्य श्रेयः पुराणानामेवास्ति। पुराणैरेव भारतीयादर्शजीवनस्य, भारतीयायाः सभ्यतायाः संस्कृतेः, विद्यायाः वैभवस्य, भारतीयानां ज्ञानगरिम्णः, उत्कर्षस्य च वास्तविकज्ञानं भवति। प्राचीनकाले बारतीया आधिभौतिकाधिदैविकाध्यात्मिकानामुन्नतीनां चरमं सीमानमुपगता आसन्, एतस्य संकेतः पुराणद्वारा एवानुभूयते। अत एतन्निःसंशयं वक्तुं सक्यते यत् पुराणानि बद्धानां मुमुक्षूषुजीवन्मुक्तानां च मनुष्याणां सन्मार्गप्रदर्शकानि सन्ति।

वेदे सूक्ष्मरूपेण यन्निर्दिष्टमस्ति तस्यैव विसितृता व्याख्य व्यासदेवेन भाष्यरूपेण महाभारते पुराणेषु च कृताऽस्ति। अतः स्वयं तेनैव महाभारते संकेतः कृतोऽस्ति यत् ''इतिहासपुराणाभ्यां वेदं समुपवृंहयेत्''। अद्यत्वे यद्यपि वेदानां सर्वाः शाखा नोपलभ्यन्ते तथापि दिव्यज्ञानसम्पन्नः त्रिकालदर्शी महर्षिर्वेदव्यासः तासां मूलविषयं पुराणेषु यत्र तत्राङ्कितवानस्ति, येनाद्यापि बहूनां वेदशाखानामनुपलब्धावपि तासां प्रतिपाद्यविषयाणामवगाहनं क्रियते एव। वेदे पुराणस्याप्युल्लेखो विद्यते, तथा पुराणं पंचमो वेदो मन्यते। यथा- ''एवं वा ह्यरे अस्य महते भूतस्य निश्वसितं ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः''। यथा वा- ''सहोवाच ऋग्वेदं भगवोऽध्येमि यजुर्वेद सामवेदमथर्वाणं चतुर्थमितिहासं पुराणं पञ्चमं वेदानां वेदम्''। अतः वेदानां प्रामाण्ये पुराणानामपि प्रामाण्यं स्वीकृतमेव भवति। यथा ब्रह्मणः सकाशात् तपसा

पवित्रान्तःकरणानां महर्षीणां निर्मले हृदये वेदानामाविर्भावो जातः। तथैव ईश्वरानुग्रहेण तेषामेव महर्षीणां मनसि पुराणानामपि प्रादुरभावोऽजायत।

संस्कृतसाहित्ये पुराणानां स्थानं महदुन्नतमस्ति। यतो वेदानन्तरं सर्वमान्यानि सर्वप्राचीनानि च पुराणान्येव सन्ति। सृष्ट्यादौ ''यो ब्रह्माणं विधधाति पूर्वं वेदांश्च तस्मै प्रहिणोति नित्यम्''। इत्यनुसारं प्रथमं ब्रह्माणमुत्पाद्य परमेश्वरः वेदज्ञानमेव तस्मै उपदिशति। भगवतो वेदज्ञानमुपलभ्य ब्रह्मा अन्यानि शास्त्राणि स्मरति। तत्र सर्वप्रथमं पुराणान्येव स्मरति। तथाचोक्तं पद्मपुराणे सृष्टिखण्डे, मत्स्यपुराणे च-

पुराण सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम्।
अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः।। ५३।३

अतो वेदवत्पुराणान्यपि नित्यानि सनातनानि अपौरुषेयाणि सिध्यन्ति। अतएव भगवत्पुज्यपादैः श्रीशङ्कराचार्यमहोदयैः बृहदारण्यकभाष्ये स्पष्टमुक्तम्-''निश्वसितमिव निश्वसितंसि यथा अप्रयत्नेनैव पुरुषनिश्वासो भवति एवं पुराणम्'' महर्षिमा वात्स्यायनेन च स्वकीये न्यायदर्शनभाष्ये – ''य एव मन्त्रब्राह्मणस्य द्रष्टारः प्रवक्तारश्च ते खल्वितिहासपुराणस्य धर्मशास्त्रस्य चेति विषयत्र्यव्यवस्थापनाच्च प्रमाणाम्। यज्ञो मन्त्रब्राह्मणस्य, लोकवृत्तमितिहासपुराणस्य लोकव्यवहारव्यवस्थापनं धर्मशास्त्रस्य विषयः।'' अलौकिकयोगवलेन समस्तं विश्वं हस्तामलकवत्पश्यद्भिः पूज्यपादैः श्रीपतञ्जलिमुनिबिः स्वकीये पाणिनीयव्याकरणमहाभाष्ये ''वाकोवाक्यमितिहासः पुराणम्।'' इति वदद्भिः पुराणानां प्रामाण्यं स्पष्टमेव स्वीकृतम्।

**पुराणानामध्ययनस्यावश्यकत्वम्**

वेदेषु येषामाध्यात्मिकाधिदैविकाधिभौतिकबौद्धिकव्यावहारिकनैतिकसांस्कृतिकदेव-मानुषजडचेतनात्मकानां विषयानां सूक्ष्मरूपेण विधानं विद्यते, ब्राह्मणभागे आरण्यके स्मृतिग्रन्थेषु च येषां प्रतिपादनमस्ति, तेषां सर्वप्राकराणां पुराणेषु आकर्षकबुद्धिगम्यमनोग्राह्योपदेशप्रदकथानकरूपेण वर्णनं कृतमस्ति। पुराणेषु न केवलमाचारव्यवहारदैनिकक्रियामात्रस्योल्लेखोऽस्ति, किन्तु मानवजीवनोपयोगिनीनां विविधानां भावनानां पूर्णं विवेचनं विद्यते। अतः पुराणानामध्ययनेन वेदार्थनिधीनामुपलब्धिर्बवितुमर्हति। पुराणाध्ययनं विना यथार्थज्ञानं मानवीजिज्ञासायाः पूर्तिश्च न सम्भवति। यद्यपि महर्षिणा व्यासदेवेन ब्रह्मसूत्रं योगभाष्ये च प्रतिपाद्याध्यात्मनिष्ठाद्वारा त्रितापान्मुक्तये सरल उपायः प्रदर्शितोऽस्ति, तथापि ज्ञाननिष्ठायाः पूर्णः परिपाकस्तु पुराणेष्वेव जातोऽस्ति।

पुराणानां कथाभिः सरलतया सर्वं साधनं शीघ्रं बुद्धिगम्यं कर्तुं शक्यते। यथा यजुर्वेदस्य ईशावास्यमन्त्रे मनुष्यतायाः पूर्णविकासस्य साधनं निर्दिष्टमस्ति, किन्तु केवलेन मन्त्रपाठेनार्थज्ञानेनवा सा भावना हृदये न जागर्ति । अतः पुराणप्रतिपादिताबिः महर्षेर्दीचेः, राज्ञः शिवेः मोऽध्वजस्य च कथाभिरुपकारभावना, सत्यवादिनो हरिश्चन्द्रस्य महाराजस्य युधिष्ठिरस्य चोपाख्यानेन सत्यनिष्ठा, दानवीरस्य वलेः कर्णस्य च कथानकेन दाननिष्ठा, वसिष्ठागस्त्यच्यवनादीनां कृत्यैरद्रोहनिष्ठा, अनसूया-सतीसीता-सावित्री-मदालसा-दमयन्ती-नर्मदा-सुकन्या-सुलोचनादीनां सतीनां पवित्राचरणैः पातिव्रत्यधर्मपराणतायाः सञ्चारः नरेषु च सहसा भवति। एवं सत्यं वद धर्मं चर इत्याद्युपदेशमात्रेण कश्चित्सत्यवादी धर्मात्मा वा भवितुं नार्हति। अतो

वेदवाक्यबोधितामितिकर्तृव्यतां पुराणेषु कथानकरूपेण मनोग्राह्यं विधातुम् ऐहलौकिकं पारलौकिकं च जीवनं सफलयितुमादेशो दत्तोऽस्ति। प्रधानतया पुराणानाम्-

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।

वंशानुचरितं चेति पुराणं पञ्च लक्षणम्।। म. पु. ५३।६४

इति पञ्चलक्षणमादाय मानवजीनस्य चरमान् लक्ष्यान् अन्तिमानुद्देश्यान् परमपुरुषार्थान् धर्मार्थकाममोक्षांश्च प्राप्तुमैतिहासिककथानामाधारेण प्राभावपूर्णपद्धतौ 5नविज्ञानयोः विस्तारः पुराणेषु प्रदर्शितोऽस्ति। पुराणेषु यावत् सुगमं चतुर्थवर्गस्य सिद्धेः साधनमुपलभ्यते न तावदन्यत्र क्वचन प्राप्यते महर्षिणा व्यासेन अष्दादश पुराणेषु सर्वेषां धर्माणां सारः परोपकारो पुण्यं परपीडनं च महत्पापं निर्दिष्टमस्ति। अयं मानवतायाः कीदृग् महान् मौलिक आदर्शोऽस्तिय़ तथाचोक्तम्-

अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।

परोपकारः पुण्याय पापाय परपीडनम्।।

पुराणेषु दृढर्निष्ठाया अन्वेषणे मर्यादापुरुषोत्तमस्य भगवतो रामस्यादर्शचरित्रेण तस्य जीवनस्य वैशिष्ट्येन मर्यादापालनेन त महती हृदयग्राहिणी शिक्षा प्राप्यते। जनमतमादृत्य सः स्वकीयां परमप्रियां सर्वगुणसम्पन्नां सुखदुःखसहचारिणीं धर्मपत्नीं साध्वीं सतीं सीतां आसन्नप्रसवामपि परितत्याज। पैतृकस्यानुसासनस्यादर्शं स्थापयितुं चक्रवर्तिसाम्राज्यं महर्षं तत्याज। अत्याचारस्यान्तं कर्तुं दुराचारिणोऽधिनायकवादिनो रावणस्य सकुलोन्मूलनं कृतवान्। यादृशो नैतिकः सामाजिकः चारित्रिकः धार्मिको व्यावहारिकश्चादर्शो रामस्य

पवित्रे चरित्रे प्राप्यते, तन्नाखिले भूमण्डले कस्याञ्चिदपि सभ्यतायामुपलभ्यते। रामराज्ये शासनव्यवस्थाया विवरणं महर्षिणा व्यासदेवेन महाबारते एवं प्रदर्शितम्-

''न पुत्रमरणं केचिद्रामे राज्यं प्रशासति।''

वाल्मीकिमुनिनापि रामायणे- श्रीरामस्य राज्ये न कश्चिदुपद्रव आसीत्। सात्विकस्यानुशासनस्यायमेवादर्शोऽस्ति।

न पुत्रमरणं केचिद् द्रक्ष्यन्ति पुरुषाः क्वचित्।
नार्यश्चाविधवा नित्यं भविष्यन्ति पतिव्रताः।।
नगराणि च राष्ट्राणि धन्यधान्ययुतानि च।
नित्यं प्रमुदिताः सर्वे यथा कृतयुगे तथा।।१:१।९१,९३

एवं मार्कण्डेयमुनेः जीवनेन दीर्घायुषः राज्ञो दिलीपस्य पवित्रेण चरित्रेण गोभक्तेरादर्शः पुराणैरेव प्राप्यते। सर्वजीवेषु दयादर्शिनः कस्य देशस्य साहित्ये एवंविधमुदाहरणं दृश्यते यत्-चक्रवर्ती सम्राडपि एकस्या गोः रक्षणार्थं स्वकीयं शरीरं मांसपिण्डमिव गोघातिने क्रूराय सिंहाय समर्पयेत्।

पुराणेषु सर्वेषामास्तिकदर्शनानं सिद्धान्तस्य सूत्ररूपेण निरूपणमस्ति। सांख्ययोगवेदान्तदर्शनानां तु पुराणेषु विशेषतो विवेचनमुपलभ्यते। किञ्च व्याकरणसाहित्यच्छन्दोज्योतिषनिरुक्तशिक्षाकल्पायुर्वेदधनुर्वेदगन्धर्व-वेद-स्थापत्यवेद-राजनीतिसमाजनीतिविविधधर्माङ्गादिषु विषयेष्वपि पुराणेषु पर्याप्तः प्रकाशः प्राप्यते। अतएव पुराणानि भारतीयसंस्कृतेः विश्वकोषा उच्यन्ते। लौकिकविषयातिरिक्तं पुराणेषु पारलौकिकविषयाणामपि प्रचुरं विवेचनं कृतमस्ति। आधुनिका वैज्ञानिका बहुना व्यापारेण

प्रेतलोकस्य मङ्गललोकस्य च किञ्चिद् ज्ञानं प्राप्तवन्तः, परन्तु अस्मिन् विषये ते, ज्ञानमिदानीं यावत् अपूर्णमेवास्ति। यतोहि नाधुनापर्यन्तं तेषां ज्ञानं जातमस्ति यदितः परमपि कश्चित्सूक्ष्मः स्तरो विद्यते। पुराणेषूर्ध्वमधश्च स्थितानां चतुर्दशानां लोकानां तत्रत्यनिवासिनां तेषामायुषः, आहारस्य विहारस्य, तत्र प्रचलितस्य कालमानस्य च निश्चितं वर्णनं वर्तेत। येनेदं यदस्माकं पूर्वजानां महर्षीणां ज्ञानं कियदतिनिर्मलं विस्तृतं बहुज्ञतापूर्णञ्चासीत्।

मानवजन्मनः प्राधानं लक्ष्यं भगवत्प्राप्तिरस्ति, तत्साधनानि च पुराणानि सन्ति। निष्कामकर्मद्वारा त्यागवृत्तिग्रहणपूर्वकं स्वर्गापवर्गयोः मार्गस्य सुलभानि साधनानि पुराणान्येव सन्ति। पुराणानि सर्वसाधनयोगक्रियासिद्धितन्त्रमन्त्रकल्याणकारिसिद्धान्तैः परिपूर्णानि सन्ति। अतएव सर्वशास्त्रेषु पुराणानां गौरवं गीतमस्ति।

पुराणेषु ज्ञानस्य कर्मणः भक्तेश्च महत्वपूर्णवर्णनेन मानवजीवनस्य यावन्तो दृषिटिकोणाः सन्ति तेषां सर्वेषां वर्णनं वर्तते। पुराणैः आवालवृद्धा नरा नार्यश्च समानं लाभं प्राप्तुं शक्नुवन्ति। पुराणानि भवरोगस्याद् भूतानि औषधानि सन्ति। संसारस्य सर्वासां समस्यानां सरलतया सुगमीकर्तुं साधनैः सम्पन्नानि पुराणानि भगवतो व्यासदेवस्य कृपाया फलानि सन्ति। पुराणानि सांसारिकत्रितापतप्तानां प्राणिनां प्रबोधम्, अज्ञानान्धकारे निपतितानां प्राकाशम्, भ्रान्तानां सन्मार्गम्, निराशानामाशाज्योतिः, शोकसन्तप्तानामुल्लासमयं प्रसादम्, पथभ्रष्टानां कर्तव्यज्ञानम्, पापिनां पापनाशनसाधनम्, नीतिविशारदानां नीतिनैपुण्यं निष्कर्मिणां साधनोपदेशम्, भक्तानां भक्तिभावं ज्ञानिनामलौकिकज्ञानस्य प्रकाशं ददति। तात्पर्यमिदमस्ति यद् ये जिज्ञायवो येनोद्देशेन

पुराणेषु सविश्वासं श्रद्दधति भक्तिभावेन च पुराणानां स्वाध्यायं कुर्वन्ति, ते समुद्रादमूल्यं रत्नमिव एभ्य उभयलोककल्याणकारि बहुमूल्यं सदुपदेशं प्राप्य स्वं जीवनं सफलयितुम् समर्थाः भवन्ति।

पुराणानि त्रिकालेषूपयोगीनि सन्ति। तानि अतीतगौरवगानेन सह वर्तमानकाले सुखशान्तिसञ्चारं सम्पाद्य भविष्यत्कालाय मुक्तिसन्देशं ददति। यतोहि पुराणानि सर्वश्रेणिमनुष्येभ्यः तदधिकारानुसारं कर्म कर्तुं सन्मार्गसाधनस्योपायं प्रदर्शयन्ति। अभ्युदयस्य निःश्रेयसस्य च सिद्धये जीवः कथमग्रेसरो भवितुमर्हतीत्यस्य विषयस्य पुराणेषु विशदं वर्णनं विद्यते। पुराणेषु सृष्टिकालत आरभ्यैकस्याविच्छिन्नक्रमस्य हृदयङ्गमस्याख्यानस्योपलब्धिर्भवति, अतः पुराणानि सर्वतोमुख्या उन्नतेः अभ्युदयनिःश्रेयसयोः साधनास्य चाक्षयो भाण्डागारो वर्तते।

पुराणेषु ज्ञान-कर्म-वैराग्य-भक्ति-विश्वास-यज्ञ-दान-तप-यम-नियमसंयम-सेवा-दया-दाक्षिण्य-वर्णाश्रमधर्म-स्त्रीधर्मसदाचारावतारादीनां कल्याणकारिणः सदुपदेशाः सरसया सुगमया सुरुचिपूर्णया उपादेशयया च भाषया लिखिताः सन्ति। एतदतिरिक्तं भूगोलखगोलयोः विवेचनं स्थावरजङ्गमयोः सृष्टेश्च सूक्ष्मं वर्णनं विद्यते। पुराणेषु प्रदत्तेषु भूविवरणप्रसङ्गेषु विविधसिद्धपीठतीर्थक्षेत्रवनपर्वतादीनां वर्णनमस्ति, योनाधुनिकानामनुसन्धानकर्तृणां महत्साहाय्यं प्राप्यते। एवं प्रकारेण सर्वोपयोगिनां पुराणानामध्ययनस्य महती आवश्यकताऽनुभूयते।

## वेदपुराणयोः पार्थक्यम्

यद्यपि वेदविहितानामेव विषयाणां विशदीकरणं पुराणेषु वर्तते इति वेदपुराणयोरे-

मस्ति, तथापि उभयोः महदन्तरं विद्यते। वेदा ज्विजसमुदायेषु प्रतिष्ठिताः असिक्षितासु जनतासु च अपरिचिताः सन्ति। परं पुराणानि सर्वेषु नरेषु सर्वासु च नारीषु विचरन्ति, सर्वेषां मनांसि अनुरञ्जयन्ति सर्वपरिचितानि च सन्ति। पुराणानं कृपया एव वेदा विश्ववर्तिनां सर्वविधानां नराणां नरीमां च जीवनं संनियम्य चरमलक्ष्ये परमतत्वे उत्कृष्टकल्याणे विशुद्धप्रेम्णि निर्मलानन्दस्य मार्गे प्रवर्तयितुमधिकारं प्राप्तवन्तः। वेदेभ्यः पुराणादीनामिदं वैशिष्ट्यं विद्यते यत्र वेदैः यतो वाचो निवर्तन्ते अप्राप्य मनसा सह इत्युक्त्वा नेति नेति च कृत्वा यः परमेश्वरो बुद्धीन्द्रियादेर्विषयं वर्णयित्वा सर्वसमक्षमुपस्थाप्यते सः। वेदानां सत्यं  ज्ञानमनन्तं ब्रह्म पुराणेषु भक्तानां कृते न केवलं आराध्यदेवस्य प्रेममयीमूर्तिरूपेण औदार्यसौन्दार्यमाधुर्यादीनां निलयरूपेण चोपस्थितं भवति, किन्तु दीनवन्धु दीनानाथ करुणावरुणालय पतितपावनाशरणशरणानाथनाथादिरूपेणापि समये समये उपतिष्ठते। वेदेषु अग्राह्यरूपे वर्णितं ब्रह्मपुराणेषु एनेकेषु रूपेषु आविर्भूय जीवमात्रस्य चाक्षुषप्रत्यक्षगोचरो भवति।

अपाणिपादो जवनो गृहीता पश्यत्यचक्षुः स श्रृणोत्यकर्णः।

स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्रयं पुरुषं महान्तम्।। ३।१९

अपाणिपादादिरूपेण वर्णितं वेदस्य ब्रह्म श्रीमद्भागवते महापुराणेषु-

त्तमद्भुतं बालकमम्बुजेक्षणं चतुर्भुजं शङ्खगदार्युदायुधम्।

श्रीवत्सलक्ष्मङ्गलशोभि कौस्तुभं पीताम्बरं सान्द्रपयोदसौभगम्।।१०।३।९

महार्हवैडूर्यकिरीटकुण्डलत्विषापरिष्वक्तसहस्त्रकुन्तलम्।

उद्दामकाञ्च्यङ्गदकङ्कणादिभिर्विरोचमानं वसुदेव ऐक्षत।।१०।३।१०

इत्यादिना विग्रहवान् निर्दिष्टः। यत्र वेदवर्णितस्य ब्रह्मणः केवलं स्मरणमेवव कर्तुं शक्यते, तत्र मनुष्याः पुराणप्रतिपादितस्य परमेश्वरस्य सेवा स्पर्शं च कर्तुं शक्नुवन्ति, तन्मुखेऽनेकविधं भोज्यपदार्थं दातुं शक्नुवन्ति तेन सह वार्तालोपौ कर्तुं शक्नुवन्ति, तथा च विविधानां भावानामदानं प्रदानमपि कर्तुं शक्नुवन्ति, बहुविधं स्वकीयं मनोरथं पूरयितूं च शक्नुवन्ति। पुराणप्रपञ्चितः परमेश्वरः स्वस्मात् चिन्मयोधाम्नो भूमावतीर्य प्राणिमात्रमध्ये विचरति, प्राणिनां कष्टं च दूरीककरोति। पुराणपरमेश्वरो वेदस्य ब्रह्मैव न केवलं ज्ञेयं ब्रह्म जीवस्य जगतश्च मूलकारणं निर्गुणं निर्विकारमद्वितीयं चित्स्वरूपमेवास्ति, किन्तु स साकाररूपेण प्रत्यक्षविषय उपास्यः सर्वासु अवस्थासु आश्रयणीयः, करुणाप्रेमसहानुभूतिसम्पन्नः शरणगतानां दीनानां दुःखिनां आर्तत्राणतत्परश्चास्ति।

यत्र वेदानां डिण्डमघोऽस्ति यद् ब्रह्म नामरूपाभ्यां पं विद्यते तत्र पुराणानि तं सर्वनामिनं सर्वरूपिणं सर्वभावभयञ्च वदन्ति। वेदस्यैव ब्रह्म, पुराणेषु असंख्यै नामरूपभावैः विभिन्नरूपे आत्मानं प्रकटयति। तदेव ब्रह्म ब्रह्मा विष्णुः शक्तिः गणेशः सूर्यादिश्चास्ति, तदेव रामः क-ष्णो वामन। नृसिंहः मत्स्यो वराहो वौद्धश्चास्ति, तदेवेन्द्र आदित्योः यमो वरुणः कुवेरोऽग्निश्चास्ति। यत्र वेदेषु ब्रह्म एकमेवास्ति तत्र पुराणेषु सर्वसम्प्रदायसिद्धानां विविधानां देवानां देवीनाञ्चोपासनां स्वीकृत्य सर्वेषां माहात्म्यं गौरवं च वर्णयद्भिः पुराणैः सर्वे सम्प्रदाया एकत्वसूत्रे निवद्धाः सर्वाणि धर्ममतसाधनप्रमालीवैशिष्ट्यादीनि चाक्षुण्णानि स्थापयदिभिः तेषामान्तरिका अभेदाश्च सुरक्षिताः सन्ति।

पुराणानुसारं सर्वे सम्प्रदाया विभिन्ननामरूपभावेषु एकस्यैव विश्वात्मन उपासनं कृत्वा स्वीयं जीवनं कृतार्थं कुर्वन्ति। पुराणानां प्रभावेण बारतीयधर्मजिज्ञासवः तत्तत्सम्प्रदायेषु विभक्ता अपि एकस्य वैदिकस्य सनातनधर्गस्यानुसारणं कुर्वन्ति। विविधानां देवानां देवीनामुपासकाः सन्तोपि कस्यैवाद्वितीयस्य ब्रह्मण उपासकाः सन्ति। सर्वसम्प्रदायोपासकाः इदं जानन्ति यद् वैष्णवाः विष्णोः विभिन्नैर्नामरूपभावैः यमुपासन्ते, तमेव शैवा शिवस्य विभिन्ननामरूपभावैः शाक्ताश्चोपासकाः कालीदुर्गाचण्डीभगवती-त्यादिरूपैः तमेवाराधयन्ति। तत्तत्पुराणानि तत्तन्नामरूपलीलीनामाश्रयं कृत्वा एकस्यैव ब्रह्मणो विशिष्टाविर्भावस्य महिमानं कीर्तयन्ति, विभिन्नोपासकसम्प्रदायहृदयानि चावर्जयन्ति।

पुराणैः सर्वातीतं ब्रह्म जडजगतो मानवसमाजमध्ये नीय भगवता सह मनुष्याणां सर्वविधं व्यवधानं दूरीकृत्य मनुष्षु देवत्वावबोधो भगवत्सत्तानुभूतिश्चोद्भाविता। पुराणनां जगत् न केवलं जडजगदेवास्ति किन्तु तत् सच्चिदानन्दघनस्य भगवतो लीलाभूमिरस्ति। भगवान् विशुद्धेन सत्वमयेनालैकिकेन देहेनविर्भूय अस्मिन् देवश्लाघ्ये भवभीतिभञ्जनार्थसमुद्भवभगवतीभागीरथीकालिन्दीसरयूर्नमदादिभिः नदीभिः परमपवित्रे भव्ये भारतभूभागे ब्रह्मन् सर्वत्र विशुद्धसत्वस्याविच्छिन्नां धारां प्रवाहयति। पुराणानि सर्वश्रेणीमनुष्यान् भगवत आविरभावं लीलां च दर्शयन्ति। पुराणद्वारा भारतवर्षस्यासंख्यानां नगर ग्राम-नदी वन-पर्वत-सरोवर-सागरादीनां ज्ञानं भवति। पुराणेषु सर्वेषां कृते नैकमेव किमपि तीर्थं निश्चितमस्ति किन्तु भारतवर्षस्य सर्वेषु प्रान्तेषु पवित्राणि तीर्थानि सन्ति सर्वत्र च भगवतो लीलाऽभवत्। एवम् पुराणानि समस्तां

भारतभूमिं चिन्मयस्य भगवतो लीलाधामरूपेणोपस्थापयन्ति। पुराणानां कृपया एकैकस्य भारतवर्षवासिनः कृते सर्वा भारतभूमिः सत्कार्या स्नेहमयी वात्सल्यमयी आनन्दमयी जननीच पूज्या रक्षणीया चास्ति। अनया दृष्ट्या भारतभूमेः दर्शनस्य सेवायाश्च शिक्षादानं पुराणानामेव पवित्रं कर्तव्यमस्ति।

पुराणेषु मानवजातेरितिहासो विशेषतश्च प्राचीनस्य भारतस्येतिवृत्तं वर्णितमस्ति। तत्र कियतामुत्थानं बहूनां च पतनं कवित्वपूर्णभाषायामालोचितमस्ति। किन्तु अस्य वर्णनस्यान्तरिको दृष्टिकोणः साधारणस्येतिहासस्य दृष्टिकोणात्पृथगस्ति। अत्र घटनानामुल्लेखमात्रमुद्देश्यं नास्ति नापि राज्ञामुत्थानपतनयोः समावेशः पुराणानां प्रधानं कार्यं विद्यते। एतत्तु पुराणानां दृष्टौ भगवल्लीलाया अङ्गमात्रमस्ति। पुराणेषु सृष्टिस्थितिप्रलयानां वैचित्र्यपूर्णेतिहासाश्रयेण वर्णनं विद्यते। मनुष्या मानवेतिहासस्य श्रवणमध्ययनं च कृत्वा तत्र भगवल्लीलाया एवास्वादं कुर्वन्त्विति मुख्यमुद्देश्यमस्ति। एवं पुराणैः जगत्, जीवम्, ईश्वरञ्चैकरूपे प्रस्तुत्य समस्तस्य मानवजगतः संस्कृतिरेकस्यामुन्नततरभूमिकायां प्रतिष्ठापिता।

आध्यात्मिकसाधनाय बहूनि स्तोत्रकवचसहस्रनामदीनि पुराणेषूपलभ्यन्ते। वेदेषु पुराणेषु प्रकृतेर्निरूपणं विद्यते तत्र पुराणेषु अधिष्ठात्री देवीरूपेण प्रकृतेर्विशदीकरणं कृतमस्ति। अस्मिन्नेवाधारे महर्षिभिः स्मृतिग्रन्थेषु व्यवहारभागस्य प्राशस्त्यं गीतमस्ति। तथाच वेदवेदाङ्गपुराणस्मृत्यादयो धर्मशास्त्राणि कथ्यन्ते। एवेषां श्रवणेन मननेन निदिध्यासनेन च प्राणिमात्रस्य अवश्यं कल्याणं भवति।

## पुराणानां विज्ञानोपयोगित्वम्

विंशतिशताब्दी विज्ञानस्य मध्याह्नं कथ्यते। इदानीं विज्ञानं चरमं सीमानमुपगतं श्रूयते। किन्तु अद्यत्वे यावन्ति विज्ञानानि उच्चभूमिकायामुपगतानि विद्यन्ते यावन्ति च अपूर्णानि सन्ति, तेषु एकमपि विज्ञानं एतादृशं नास्ति यस्योल्लेखो येन केनापि प्रकारेण संस्कृतवाङ्मये न स्यात्। सम्प्रति यावन्तोपि आर्थिक-सामाजिक-राजनैतिकादयो वादा उपलभ्यन्ते, तेषु कस्यचित् संक्षेपेण कस्यचन विस्तारेण कस्यचित् पूर्वं पक्षरूपेण कस्यचन च निन्दारूपेणोल्लेखस्तु संस्कृतवाङ्मये विद्यत एव।

संस्कृतसाहित्ये पुराणेषु आध्यात्मिकाधिदैविकविषयाणां विवेचनेन सह आधिभौतिकवादस्यापि प्रचुरा सामग्री समुपलभ्यते।साम्प्रतं भौतिकपदार्थानामनुसन्धानकर्तृभिः महता परिक्षमेण कथञ्चित् संहारिकाया एवाणुशक्तेः अन्वेषणं कृत्वा परमाण्वस्त्रादिषु तस्या उपदेशं विधाय आत्मनो धन्यतमान् मन्यमान आश्चर्यचकितान् कुर्वन्ति समस्तान् मानवान्। परन्तु प्रजननात्मिकायाः पालनात्मिकायाश्चाणुशक्तेर्ज्ञानं नाधुना यावज्जातं तेषाम्। संस्कृतवाङ्मये तु तद्विज्ञानं प्रतिपदं प्राप्यते। यद्यत्र विषये विशेषं ध्यानं प्रदाय विशिष्टैः विद्वद्भिः सह विमर्शं विधाय समुपलभ्यमानैः सूक्ष्मयन्त्रादिभिः प्रत्यक्षीकरणाय अनुसन्धानं क्रियेत, तर्हि अधुनापि निश्चप्रचं विश्वस्य महानुपकारो भवितुमर्हति।

सौन्दर्यलहर्यां महाशक्तिः परमाणूनामुत्पत्तिकलपनायां दृष्टिदानेनायासं प्रजनन-पालन संहारकारिका ब्राह्मी वैष्णवी रौद्री चेति त्रिविधा अणुशक्तयः प्रत्यक्षगोचरी भवन्ति। यथा-

तनीयांसं पांसुं तवचरणपङ्केरुहभवम्

विरञ्चिः संचिन्वन् विरचयति लोकानविकलम्।
वहत्येनं शौरिः कथमपि सहस्रेण शिरसा
हरः संक्षुभ्यैनं भजति भासितोदिधूलनविधिम्।।

अनेन पद्येनेदं व्यज्यते यद् आकाशात्मिकाया अव्यक्तशक्तितः अपूनां वृष्टिरजायत। ततः सृजनात्मकानामणूनां संचयं कृत्वा लोकविधाता ब्रह्म अखिलं लोकं सृजति।पालनात्मकानणून् लोकपालको भगवान् विष्णुः समस्तं विशव् पालयति। संहारात्मकैश्च अणूभिः भूतभावनो भगवान् सदाशिवः संहरति सकलं संसारम्।

संस्कृतवाङ्मयप्राणभूतेभ्यः पुराणेभ्य एव अणुशक्तेः ज्ञानं प्राप्य अलौकिकज्ञानसंपन्नो भगवानक्षपादः कणादो मुनिः स्वकीये वैशेषिकदर्शने चेष्टाहीनानां परमाणूनां परस्परं सम्पर्केण द्रव्य-गुण कर्म-सामान्य-विशेष-समवायाभावानां सप्तानां पदार्थानामुत्पत्तिसिद्धान्तं स्थिरं कृत्वा लोकोत्तरं चमत्कारं प्रदर्शितवान्।

**परमाणुलक्षणञ्च-**

जलान्तर्गते भानौ सूक्ष्णं यद् दृश्यते रजः।
तस्य षष्टतमो भागः परमाणुरिहोच्यते।

दार्शनिकानां नये परमाणवो नित्या अतिसूक्ष्माश्च सन्ति। सूक्ष्मत्वादेव परमाणवो नास्माकं स्थूलदृशां मानवानां प्रत्यक्षगोचरा भवन्ति। किन्तु सर्वशक्तिमतः अघटितघटनापटीयसः परमेश्वरस्य अलौकिकशकत्सम्पन्नानां योगिनां च परमाणूनां प्रत्यक्षं जायते। प्राणिनामदृष्टवशात् परमाणूनां परस्परं सम्पर्केण तत्तत्कार्यमुत्पद्यते। परमाणवो द्विधा भन्नित-कारणरूपाः कार्यरूपाश्च। तत्र कारणरूपाः परमाणवो नित्याः,

अनित्याश्च कार्यरूपाः। तथाच कारणरूपाणां परमाणूनामप्रत्यक्षत्वेऽपि कार्यरूपेण परिणतानां तेषां तु प्रत्यक्षं भवत्येव।

अतएव परमाण्वस्त्रे उपलभ्यमानाः कार्यरूपाः परमाणवो न पदार्थन्तरं भवितुमर्हन्ति, कारणभूतेषु परमाणषु एव तेषामन्तभविस्वीकारान्नकोऽपि शङ्कापङ्ककलङ्कलेशस्यावकाशः सम्भवति।

स्कन्दपुराणे चैका कथोपलभ्यते यद् आसीद् वर्करी नाम्नी एकाराजकुमारी, यस्या मुख वर्करीमुखमिव सीत्। सा शारीरिकनिर्माणकारणं ज्ञात्वा वैज्ञानिकक्रियाभिः तस्मिन्नेव शरीरे वर्करीमुखं मानवमुखरूपे परिवर्त्य विधुवदनी बभूव। तस्या अपरेपि आसन् अष्टौ भ्रातरः। तज्जनकश्च समस्तं विश्वं नवसु खण्डेषु विभज्य प्रत्येकस्मै एकमेकं खण्डं प्रदात्। ततः कालादेव भारतवर्षमिदं नव खण्डात्मकं प्रसिद्धमभवत्।

तत्र प्रत्येकखण्डे विविधप्रकाराणां भूगर्भगतानां धातूनाम्, पुण्यसलिलानां सरोवराणाम्, परिपूतजलानां नदीनाम्, सघनानां वनानाम्, दुर्गमाणां गिरीणाम्, सर्वसिद्धिप्रदायकानां सिद्धपीठानाम्, महतो मरुस्थलस्य. शस्यश्यमलस्य भूभागस्य च पर्याप्तं वर्णनं विद्यते। एवं व्योमवर्तिनां ग्रहणक्षत्रादीनां दूरस्थिति-गति-शिशुमारचक्र-ध्रुवस्थान-दक्षिणायनोत्तरायणवर्षर्तु-मास-पक्ष-दिन-घटी-पल-विपल-निमेषादीनां सूक्ष्मतमो विचारो वर्तते। येन भूगोलखगोलविषयकं प्रचुरं ज्ञानं विधाय ब्राह्मी-वैष्णवीरौद्रीणामणुशक्तीनां विषयेऽनुसन्धानं सफलं भवितुमर्हति। यदीदानीमपि अणुवीक्षणसमितिः उपलब्धेः आधुनिकैः साधनैः अनेकप्रकाराणामणूनामन्वेषणाय पुराणमर्मज्ञैः संस्कृतरहस्यविद्भिः विशिष्टैः विद्वद्धौरेयैः सम्यक् सहयोगं प्रचुरः प्रयत्नः

क्रियते, तदा सम्भावये पुराणेतिहासकालिकं वैज्ञानिकं महत्वमिदानीमपि पुनः प्राप्तुं शक्यते। येन सकलस्य लोकस्य वास्तविकं कल्याणं सम्भवेत्। पौराणिकीः कथा आश्रित्यैव कालिदासादयो बहवो महाकवयोऽप्यनेकानि महाकाव्यानि नाटकादीनि च विरचय्यात्मनो धन्यान् मन्यन्ते। यैश्च महानुपकारो भवति संस्कृतसाहित्यस्य, वर्धते च गौरवमुत्तरोत्तरम्।

## पुराणानां प्राचीनत्वम्

किं पुराणानि अर्वाचीनानि प्राचीनानि वा ? इति विविच्यमाने प्रथमं तावत्पुराणशब्दव्युत्पत्तौ ध्यानं देयम्।

पुराभवमिति विग्रहे सायञ्चिरंप्राह्णेप्रगेऽव्ययेभ्यस्ट्युट्युलौ तुट् च इतिपाणिनीयसूत्रेण ट्युप्रत्यये निपातनात् तुडभावे युवोरनाकौ इति अनादेशे णत्वे च कृते निष्पद्यते पुराणशब्दः। यद्वा पुरा नीयते इत्यर्थे पुरापुर्वकणीञ् धातोः डप्रत्यये कृते सिध्यति पुराणशब्दः। पुराणं कस्मात् पुरा नवं भवतीति निरुक्ते च यास्कमुनिः। एवञ्च पुराणशब्दस्य पुरातनपर्यायवाचित्वेऽपि विशेषरूपेण व्यासकृताष्टादशग्रन्थेषु एव पुराणशब्दो रूढः जातोऽस्ति।

ननु पुराणेषु अर्वाचीनकथानामुपलम्भात् तेषां प्राचीनत्वं न सम्भवतीति वदतां पाश्चात्योपनेत्रधारिणामाधुनिकानां मतं युक्तमिति चेन्न, वक्ष्यमाणानाम् अथर्ववेद-शतपथब्राह्मणोपनिषद्-भाष्य-गृह्यसूत्र-स्मृति-रामायण-महाभारतादिवाक्यानां विद्यमानत्वेन पुराणानां प्राचीनत्वे क्षोदक्षेमासम्भवात्। तथाहि-

अथर्ववेदे- ऋचः सामानि छन्दांसि पुराणं यजुषा सह।

उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रिताः।। ११।७।२५

शतपथब्राह्मणे- 'ऋग्वेदो यजुर्वेदः सामवेदोऽतर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः,

इत्यादि।

छान्दोग्योपनिषदि- 'ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमथाथर्वाणं चतुर्थमितिहासं

पुराणं पञ्चमं वेदानां वेदम्'। ७।१।२

वृहदारण्यकोपनिषदि- 'अरेऽस्य महतो भूतस्य निश्वसितमेतद् यद् ऋग्वेदो यजुर्वेदः

सामवेदोऽथर्वाङ्गिरसः इतिहासः पुराणम्'।

आश्वलायनगृह्यसूत्रे- 'इतिहासपुराणे अमृतस्य कुल्याः'।

याज्ञवल्क्यस्मृतौ- पुराणन्याय-मीमांसा-धर्मसास्त्राङ्ग-मिश्रिताः।

वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश।। १।२

वाल्मीकीये- 'इत्युक्त्वाऽन्तःपुरद्वारमाजगाम पुराणवित्'। २।५।२७

महाभारते च- अष्टादशपुराणानि कृत्वा सत्यवतीसुतः।

पश्चाद्भारतमाख्यानां चक्रे तदुपबृंहितम्।।

एभिः प्रमाणैः सिद्ध्यति यत्पुराणं प्राचीनम्, नित्यम्, अपौरुषेयञ्चास्ति। अतः वेद इव तस्यापि समादरः करणीयः। किञ्चमत्स्यपुराणे-

पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम्।

अनन्तरं च वक्रेभ्यो वेदास्तस्य विनिर्गताः।। ५३।३

आख्यानस्यास्य विषये पुराणं वर्तते द्विजाः।

अन्तरिक्षस्य विषये प्रजा इव चतुर्विधाः।। आ. प. २।३८६

इति मत्स्य-पद्मपुराणवचनात्पुराणस्य वेदेभ्योऽपि प्राचीनत्वमनादित्वं च सिद्ध्यति। एवञ्च यथा ब्रह्मणः सकाशात् महर्षिहृदयेषु वेदा आविर्भूताः, तथैव पूर्वं तेषामेव महर्षिणां हृदयेषु ईश्वरानुग्रहेण पुराणमपि प्रादुरभवत्।

तदनन्तरं पराशरमुनिनां सत्यवत्यामुत्पन्नेय महर्षिणा व्यासेन यथा वेदस्यैकस्य चत्वारो भेदाः कृताः, तथैव पुराणस्यापि अष्टादशः भेदाः कृताः। साम्प्रतं प्रचलितानि एष्टादश पुराणानि प्राचीनतमस्यैकस्य पुराणस्याशयं गृहीत्वा व्यासेन निर्मितानि सन्ति। आदौ व्यासेन पुराणेषु सर्वे विषया यथा-योग्यं निश्चिताः, पाश्चात्यस्य शिष्यैः सूतादिभिः यत्र यत्र श्रावितानि, प्रश्नोत्तराणि च कृतानि, तान्यपि संगृह्य संकलितानि। तथाचोक्तं शिवपुराणे स्कन्दपुराणस्य रेवाखण्डेऽपि-

पुराणमेकमेवासीदस्मिन् कल्पान्तरे नृप ! ।।
त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरम्।।
कालेनाग्रहणं दृष्ट्वा पुराणस्य ततो नृप ! ।।
व्यासरूपो विभुर्भूत्वा संहरेत् स युगे युगे।
चतुर्लक्षप्रमाणेन द्वापरे द्वापरे सदा।।
तदष्टादशधा कृत्वा भूर्लोकेस्मिन् प्रभाषते।।
अद्यापि देवलोके तच्छतकोटिप्रविस्तरम्।।
तदर्थोऽत्र चतुर्लक्षं संक्षेपेण निवेशितः।
पुराणानि दशाष्टौ च साम्प्रतं तदिहोच्यते।। १।२४-२८.५

अपि च पद्मपुराणे-

प्रवृत्तिः सर्वशास्त्राणां पुराणस्याभवत्तदा।।

कलिना ग्रहणं दृष्ट्वा पुराणस्य तदा प्रभुः।।

व्यासरूपी तदा ब्रह्मा संग्रहार्थं युगे युगे ।।

चतुर्लक्षप्रमाणेन द्वापरे द्वापरे पुनः।।

तदष्टादशधा कृत्वा भूर्लोकेस्मिन् प्रकाशते।।

देवीभागवते च-

द्वापरे द्वापरे विष्णुर्व्यासरूपेण सर्वदा।।

वेदमेकं तु कुरुते बहुधा हितकाम्यया।।

अल्पायुषोऽल्पबुद्धीश्चं विप्रान् ज्ञात्वा कलावपि।।

पुराणसंहितां पुण्यां कुरुतौ युगे युगे।। १।३।१९-२०

किच- इह लोकहितार्थाय संक्षिप्तं परमर्षिणा।

## पुराणानां परिचयः

सृष्टेः आरम्भकालतः प्रलयपर्यन्तं समस्तस्य विश्वस्य क्रमवद्धस्यैतिहासस्य निर्देशकानां भारतीयसंस्कृतेः प्रतीकानां वैदिकस्य धर्मस्य परिपोषकायाः सर्वविषयपरिपूर्णानामष्टादशानां पुराणानां परिचयो विष्णुपुराणस्य तृतीयेऽपि एवं प्रदत्तो विद्यते-

तथा श्रीमद्भागवतस्य द्वादशस्कन्धे सप्तमेऽध्याये च एवं प्रदत्तो विद्यते-

ब्राह्मं पाद्मं वैष्णवं च शैवं लिङ्गं सगारुडम्।

नारदीयं भागवताग्नेयं स्कन्दसंज्ञितम्।।२३

भविष्यं ब्रह्मवैवर्तं मार्कण्डेयं सवामनम्।

वाराहं मात्स्यकौमं च ब्रह्माण्डख्यमिति त्रिषट्।।२४

**विष्णुपुराणेऽपि-**

(१) ब्रह्मपुराणम् (२) पद्मपुराणम् (३) विष्णुपुराणम् (४) शिवपुराणम् (५) भागवतपुराणम् (६) नारदीयपुराणम् (७) मार्कण्डेयपुराणम् (८) अग्निपुराणम् (९) भविष्यपुराणम् (१०) ब्रह्मवैवर्तपुराणम् (११) लिङ्गपुराणम् (१२) वाराहपुराणम् (१३) स्कन्दपुराणम् (१४) वामनपुराणम् (१५) कुर्मपुराणम् (१६) मत्स्यपुराणम् (१७) गरुडपुराणम् (१८) ब्रह्माण्डपुराणम् ।

यद्यपि तत्तपुराणेषु तेषां क्रमस्थितौ विदुषां मतभेदो वर्तते, तथापि एतानि व्यासोक्तानि अष्टादशसर्वमान्यानि पुराणानि सन्ति, एतानि महापुराणान्यपि उच्यन्ते।

प्रथमं ब्रह्मपुराणमन्तिमश्च ब्रह्माण्डपुराणमिति निश्चप्रचं विद्यते। एतेनेदं सूच्यते यत्सृष्ट्यादौ ब्रह्मण एग्राविर्बूय सर्वमिदं जगत्प्रलये ब्रह्मणि एव लीयते। ब्रह्मसृष्टि विवरिणयन्ति एतानि महापुराणानि ब्रह्मण आरभ्यास्माकं ज्ञानं ब्रह्मपर्यन्तं चोपस्थापयन्ति।

देवीबागवतेऽष्टादशानां पुराणानां संक्षेपेणैवं गणना कृतास्ति-

मद्वयं भद्वयं चैव व्रत्रयं बचतुष्टयम्।

अनापलिङ्गकूस्कानि पुराणान्यनुपूर्वशः।। १।२।३

अष्टादशमहापुराणान् कलिद्वापरयोः सन्धौ पराशरात्सत्यवत्यां जातेन भगवता वेदव्यासेन निर्मितानि सन्ति। एतत्समानि व १८ उपपुराणानि १८ औपपुराणानि च सन्ति। येषां रचना एतेषां महापुराणानामेवाधारेऽभवत्। प्राक्तना विबिन्नाः विद्वांसः पुराणानामाशयमादाय उपपुराणानि औपपुराणानि च रचितवन्तः। किन्तु कुत्रचित् कथाः सूक्ष्मीकृताः सन्ति, कुत्रचित् त्यक्ताः सन्ति, कुत्रचिच्च नवीनतां नेतुं कथासु परिवरितनं कृतं विद्यते, कुत्रचिच्च कथासु वैलक्षण्यमपि सम्पादितमस्ति। एवमपि एतेषां मूलमष्टादशपुराणान्येव सन्ति। श्रीमद्भागवतस्य प्रसिद्धटीकाकर्तुः श्रीधरस्वामिनः प्रधानशिष्येण नालकण्ठाचार्येण देवीभागवतस्य टीकायामेतत् स्पष्टीकृतमस्ति। एकादशशताब्द्यामुत्पन्नेन श्रीषडगुरुशिष्येण स्ववेदार्थदीपिकायां नृसिंहोपपुराणस्य बहवः श्लोका उद्धृताः सन्ति। किञ्च प्रसिद्धो भारतभ्रमणकर्ता यवनजातीयो विद्वान् अल्वेरुणी स्वकीये भारतभ्रमणवृत्तान्ते आदित्य-सोम-साम्बनृसिंहाद्युपपुराणानामौपपुराणानामपि विद्वद्वर्गे समादरः आसीत्। अतस्तेषामपि प्राचीनत्वे सन्देहो नास्ति।

**१८ उपपुराणानि यथा कूर्मपुराणस्योत्तरार्द्धे-**

आद्यं सनत्कुमारोक्तं नारसिंहमथापरम्।
तृतीयं स्कान्दमुद्दिष्टं कुमारेण चु भाषितम्।।
चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम्।
दुर्वाससोक्तमाश्चर्यं नारदोक्तमतः परम्।।
कपिलं वामनं चैव तथैवोशनससेवितम्।
ब्रह्माण्डं वारुणं चाथ कालिकाह्वयमेव च।

माहेश्वरं तथा साम्बं सैरं सर्वार्थस्चयम्।

परासरोक्तमपरं मारीचं भास्कराह्वयम्।। १।१७२०

**१८ औपपुराणानि च यथा वृहद्विवेके-**

आद्यं सनत्कुमारं च नारदीयं वृहच्च यत्।

आदित्यं मनवं प्रोक्तं नन्दिकेश्वरमेव च।।

कौमं बगवतं ज्ञेयं वाशिष्ठं भार्गवं तथा।

मुद्गलं कल्किदेव्यौ च महाभागवतं ततः।।

बृहद्धर्मं परानन्दं वह्नि पशुपति तथा।

हरिवंशं ततो ज्ञेयमिदमौपपुराणकम्।।

**पुराणानां सात्त्विक-राजस-तामसभेदाः-**

पद्मपुराणे भविष्यपुराणे च पुराणानां सात्त्विकराजस-तामससभेदाः भेदत्रयं कृतमस्ति। तत्र पद्मपुराणानुसारं सात्त्विकराजसतामसभेदादष्टादशपुराणानां त्रिधा वर्गीकरणं विद्यते। तत्र ६ सात्त्विकानि, त्र राजसानि, ६ तामसानि च पुराणानि सन्ति। तत्र तामसेषु पुराणेषु मत्स्यपुराणस्य, कूर्मपुराणस्य, लिङ्गपुराणस्य, शिवपुराणस्य, स्कन्दपुराणस्य, अग्निपुराणस्य च गणनास्ति-

मात्स्यं कौमं तथा लैङ्गं शैवं स्कान्दं तथैव च।

आग्नेयं च षडेतानि तामसानि निबोधत।। उ. ख. २३६.१८

सात्त्विकपुराणानि सन्ति विष्णुपुराणम्, नारदीयपुराणम्, श्रीमद्भावतम्, गरुडपुराणम्, पद्मपुराणम्, वाराहपुराणञ्च-

वैष्णवं नारदीयं च तथा भागवतं शुभम्।

गारुडं च तथा पाद्मं वाराहं शुबदर्शने।।

सात्त्विकानि पुराणानि विज्ञेयानि शुभानि वै।। २३६।१९

राजसानि पुराणानि च सन्ति, ब्रह्माण्डपुराणम्, ब्रह्मवैवर्तम्, मार्कण्डेयपुराणम्, भविष्यपुराणम्, वामनपुराणम्, ब्रह्मपुराणञ्च-

ब्रह्माण्डं ब्रह्मवैवर्तं मार्कण्डेयं तथैव च।

भविष्यं वामनं ब्राह्मं राजसानि निबोधत।। २३६।२०

सात्त्विकादिभेदेन पुराणानां त्रिधा वर्गीकरणस्येदं तात्पर्यं नास्ति यत् सात्त्विकानि पुराणानि श्रेष्ठानि, राजसानि मध्यानि, तामसानि च निकृ,टानि सन्ति, सात्त्विकानां पुराणानामध्ययनेन मोक्षप्राप्तिः, राजसानि पुराणानि स्वर्गप्रदानि सन्ति, तथा तामसानां पुराणानामनुशीलनेन तामसीवृत्तिर्जायते ययाऽधोगतिर्भवति, तथा चोक्तं पद्मपुराणे-

सात्त्विका मोक्षदा प्रोक्ता राजसाः स्वर्गदा शुभाः।

तथैव तामसा देवि ! नित्यप्राप्तिहेतवेः।। ५।२३६।२१

अपि तु सत्त्वरजस्तमांसि त्रीणि समस्तस्य विश्वस्योपादानभूतानि सन्ति। एतान्यादाय परमेश्वरो ब्रह्मविष्णुशिवरूपैः त्रिधा परिणतो भवति। तत्र समस्तस्य ब्रह्माण्डस्योत्पादको ब्रह्मा, विष्णुः पालकः, शिवश्च संहारकोस्ति। अत एवोक्तम्-

''एका मूर्तिस्त्रयो देवा ब्रह्मविष्णुमहेश्वराः ''

पद्मपुराणे सात्त्विकानि पुराणानि मोक्षप्रदानि सन्ति। राजसानि पुराणानि स्वर्गप्रदानि विद्यन्ते। तामसपुराणानि च नरकप्रदानि कथ्यन्तेष तथाहि-

सात्त्विका मोक्षदाः राजसाः स्वर्गदा शुभाः।

तथैव तामसा देवि ! नित्यप्राप्तिहेतवः ।। ६।२६३।८५

भविष्यपुराणानुसारं राजसपुराणेषु प्रायः कर्मकाण्डस्य प्रतिपादनं भवति तामसपुराणानि शाक्तपरायणानि भवन्ति।

राजसाः षट्स्मृता वीर कर्मकाण्डतया भुवि।

तामसाः षट् स्मृताः प्राज्ञैः शक्तिधर्मपरायणाः।।

(भवि.पु. ३।३।२८,१३-१५)

**पाराणाप्रादुर्भावक्रमः**

सर्वपापहरं पुण्यं पवित्रं च यशस्वि च।

ब्रह्मा ददौ शास्त्रमिदं पुराणं मातरिश्वने।।

मास्माच्चोशनसा प्राप्तं तस्माच्चापि वृहस्पतिः।

वृहस्पतिस्तु प्रोवाच सवित्रे तदनन्तरम्।।

सविता मृत्येव प्राह मृत्युश्चन्द्राय वै पुनः।

इन्द्रश्चापि वशिष्ठाय सोऽपि सारस्वताय च।।

सारस्वतस्त्रिधाम्ने च त्रिधामा च शरद्वते।

शरद्वतस्त्रिविष्टाय सोऽन्तरिक्षाय दत्तवान्।।

वर्षिणे चान्तरिक्षो वै सोऽपि त्रय्यारुणाय च।

त्रय्यारुणो धनञ्जये स च प्रादात्कृतञ्जये।।

कृतञ्जयात्तृणंजयो भरद्वाजाय सोऽप्यथ।

गौतमाय भरद्वाजः सोऽपि निर्यन्तरे पुनः।।

निर्यन्तरस्तु प्रोवाच तथा वाजश्रवाय च।

स ददौ सोममुष्माय स ददौ तृणबिन्दवे।।

तृणबिन्दस्तु दक्षाय दक्षः प्रोवाच शक्तये।

शक्तः पराशरश्चापि गर्भस्थः श्रुतवादिनम्।।

पराशराज्जातुकर्णस्तस्माद् द्वैपायनः प्रभुः।

द्वैपायनात्पुनश्चापि मया प्रोक्तं द्विजोत्तमाः ! ।।

**वैशम्पायन उवाच-**

मया वै तत्पुनः प्रोक्तं पुत्रायामितबुद्धये।

इत्येव वाचा ब्रह्मादिगुरुणा समुदाहृताः ।। (वायुपुराणम्)

**भाषाविमर्शः**

भरद्वाजसंहितायां भाषातत्वस्याधारे पौराणिकभाषायाः त्रिधा वर्गीकरणं विद्यते- (१) समाधिभाषा (२) लौकिकीभाषा (३) परकीयभाषा च। तथाहि-

समाधिभाषा प्रथमा लौकिकीति तथापरा।

तृतीया परकीयेति शास्त्रभाषा त्रिधा स्मृता।।

आसां त्रिविधानां भाषाणां ज्ञानमन्तरेण न कोऽपि वास्तविकं पौराणिकरहस्यमवगन्तुं प्रभवेयुः। तत्र समाधिबोध्यविषयाः समाधिभाषया समीर्यन्ते- यथात्मप्रकृतिकर्मादिस्वरपाणि धर्माधर्मनिरूपणयश्च यदा किल लौकिकरीतिसमाधिगम्य रहस्यानि रूपकालङ्कारे वर्णयित्वा श्रोतृवृन्दवुद्धयः सन्मार्गे प्रतिष्ठाप्यन्ते, तदा सा लौकिकी

भाषा कथ्यते, यथा भगवतो जन्मकर्मविवाहविलासादिवृत्तान्तस्य मध्यमाधिकारिमां कृते लौकिकदिशा वर्णनम्। तृतीया परकीया समाधिलौकिकभाषागोचरान् विषयान् द्रढयितुं युगान्तरीयं कल्पानरीयं च घटनाचक्रं गाथारूपेण प्रकाशयति। एवं निरुक्तेऽपि यास्काचार्येण त्रिविधभाषा नामान्तरेण स्मृता-

**ताःत्रिविधा ऋचः परोक्षकृताः प्रत्यक्षकृता आध्यात्मिक्यश्च।**

ॐ

अष्टादशपुराणानां नाम संख्या तथा क्रमः।

प्रतिपाद्याश्च विषयाः श्रवणादिफलन्ततः।।

संक्षेपेण प्रदीयन्ते वुधाः पश्यन्तु सम्मुदा।

किं किं तत्त्वं पुराणेषु वर्ततेऽत्र मनोहरम्।।

**पुराणानां समीक्षा**

**१- ब्रह्मपुराणम्**

अष्टादशसु पुराणेषु ब्रह्मपुराणं प्रथमं पुराणं प्रोच्यते। अत्र भागौ स्तः पूर्वभाग उत्तरभागश्च। अत्र २४५ अधायायेषु निम्नाङ्किता विषयाः सन्ति। इदं श्रीमद्भागवत-विष्णु-शिव-ब्रह्मवैलर्त-मार्कण्डेय-नारदीयपुराणानुसारं दशसहस्र(१००००) संख्याकं मत्स्यपुराणानुसारञ्च त्रयोदशसहस्र(१३००००) संख्याकमस्ति एतत्परिचयश्चैवं विद्यते-

पुराणानि दशाष्टौ च साम्प्रतं तदिहोच्यते।

नामतस्तानि वक्ष्यामि शृणुध्वं मुनिसत्तमाः।।

ब्रह्मणाऽभिहितं पूर्वं यावन्मात्रं मरीचये।

ब्राह्मं क्षिदशसाहस्त्रं पुराणं परिकीर्त्यते।।

( मत्स्यपुराणे ५3 अध्यायः)

ब्राह्मं पुराणं तत्रादौ सर्वलोकहिताय वै।

व्यासेन वेदविदुषा समाख्यातं महात्मना।।

तद्वै सर्वपुराणग्र्यं धर्मकामार्थमोक्षदम्।

नानाख्यानेतिहासाढ्यं दशसाहस्त्रमुच्यते।।

(नारदीयपुराणे ९२ अध्यायः)

**पूर्वभागस्य प्रमुखविषयाः**

देवानामसुराणाञ्च यत्रोत्पत्ति प्रकीर्तीता।

प्रजापतीनाञ्च तथा दक्षादीनां मुनीश्वर ! ।।

ततो लोकश्वरस्यात्र सूर्य्यस्य परमात्मनः।

वंशानुकूर्त्तनं पुण्यं महापातकनाशनम्।।

तत्र3वतारः कथितः परमानन्दरूपिणः।

श्रीमतो रामचन्द्रस्य चतुर्व्यूहावतारिणः।।

ततश्च सोमवंशस्य कीर्त्तनं यत्र वर्णितम्।

कृष्णस्य जगदीशस्य चरितं कल्मषापहम्।।

द्वीपानाञ्चैव सिन्धूनां वर्षाणाञ्चाप्यशेषतः।

वर्णनं यत्र पातालस्वर्गाणाञ्च प्रदृश्यते।।

नरकाणां समाख्याने सूर्य्यस्तुतिकथानकम्।

पार्वत्याश्च तथा जन्म विवाहश्च निगद्यते।।

दक्षाख्यानं तत- प्रोक्तमेकाम्रक्षेत्रवर्णनम्।

पूर्वभागोऽयमुदितः पुराणस्यास्य मानद ! ।।

**उत्तरभागस्य च प्रधानविषयाः**

अस्योत्तरे विभागे तु पुरुषोत्तमवर्णनम्।

विस्तरेण समाख्यातं तीर्थयात्राविधानतः।।

अत्रैव कृष्णचरितं विसितरात् समुदीरितम्।

वर्णनं मम लेकस्य पितृश्राद्धविधिस्तथा।।

वर्णाश्रमाणां धर्माश्च कीर्तिता यत्र विस्तरात्।

विष्णुधर्मयुगाख्यानं प्रलयस्य च वर्णनम्।।

ब्रह्मवादसमुद्देशः पुराणस्य च संशनम्।

एतद् ब्रह्मपुराणन्तु भागद्वयसमाचितम्।।

वर्णितं सर्वपापघ्नं सर्वसौख्यप्रदायकम्।।

**अस्य श्रवणफलमितकर्तव्यतानिर्देशो यथा**

सूतशौनकसम्वादं भूक्तिमुक्तिप्रदायकम्।

लिखित्वैतत्पुराणं यो वैशाख्यां हेमासंयुतम्।।

जलधेनुयुतञ्चापि भक्त्या दद्याह द्विजातये।

पौराणिकाय सम्पूज्य वस्त्रभोज्यविभूषणैः।।

स वसेद् ब्रह्मणो लोके यावच्चन्द्रार्कतारकम्।

यः ठेपच्छ्रृणुयाद्वाऽपि ब्रह्मानुक्रमणीं द्विज ! ।।

सोऽपि सर्वपुराणस्य श्रोतुर्वक्तुः फलं लभेत्।

श्रृणोति यः पुराणन्तु ब्राह्मं सर्वं जितेन्द्रियः।

हविष्याशी च नियमात् स लभेद् ब्रह्मणः पदम्।।

किमत्र बहुनेक्तेन यद् यदिच्छति मानवः।

तत्सर्वं लभते वत्स ! पुराणस्यास्य कीर्त्तनात्।।

अस्मिन पुराणे सर्वेषु पात्रेषु पुराणज्ञो विद्वान् श्रेष्ठं सत्पात्रं प्रोच्यते। ततः चोक्तम्-

सर्वेषामेव पात्राणां श्रेष्ठं पात्रं पुराणवित्।

पतनात्त्रायते यस्मात्तस्मात्पात्रमुदाहृतम्।।

ब्राह्मणेषु पुराणेषु गंगायां गोसु पिप्पले।

नारायणधिया पुम्भिर्बक्तिः कार्या ह्यहैतुकी।।

## २-पद्मपुराणम्

पद्मपुराणे पञ्च खण्डाः सन्ति, (१) सृष्टिखण्डः (२) भूमिखण्डः (३) स्वर्गखण्डः (४) पाताल खण्डः (५) उत्तरखण्डः। अत्र क्रमशः ८२, १२७, ३९, १२३, २८२ संकलनया ६४१ अध्यायेषु निम्नाङ्किताः विषयाः सन्ति। त्पञ्चपञ्चाशत्सहस्त्र (५५००००) संख्याकमस्ति। एतत्परिमाणयश्चैवमस्ति-

एपदेव यदा पद्मं ह्यभूद्धैरण्मयं जगत्।

वृत्तान्तादयं तद्वत् पाद्ममित्युच्यते बुधैः।।

पाद्मं तत्पञ्चाशात् सहस्रामीह कथ्यते।

(मत्स्यपुराणे ४६ अध्यायः)

ब्रह्मोवाच-

श्रृणु पुत्र ! प्रवक्ष्यामि पुराणं पद्मसंज्ञकम्।

महत्पुण्यप्रदं नृणां सृणुतां पठतां मुदा।।

यथा पञ्चेन्द्रियः सर्वः शरीरीति निगद्यते।

तथेदं पञ्चबिः खण्डैरुदितं पापनाशनम्।।

**(१) सृष्टिखण्डस्य प्रधानविषयाः**

पुलस्त्येन तु भीष्माय सृष्ट्यादिक्रमतो द्विज।

नानाख्यानेतिहासाद्यैर्यत्रोक्तो धर्मविस्तरः।।

पुष्करस्य च माहात्म्यं विस्तरेण प्रकीर्तितम्।

ब्रह्मयज्ञविधानञ्च वेदपाठादिलक्षणम्।

दानानां कीर्त्तनं यत्र वृत्तानाञ्च पृथक् पृथक्।

विवाह शैलजायाश्च तारकाख्यानकं महत्।।

माहात्म्यञ्च गवादीनां कीर्त्तितं सर्वपुण्यदम्।

कालकेयादिदैत्यानां वधो यत्र पृथक् पृथक्।।

ग्रहणामर्चनं दानं यत्र प्रोक्तं द्विजोत्तम् ! ।

तत्सृष्टिखण्डमुद्दिष्टं व्यासेन सुमहात्मना।।

(२) **भूमिखण्डस्य प्रधानविषयाः**

पितृमात्रादिपूज्यत्वे शिवशर्मकथा पुरः।

सुव्रत्य कथा पश्चात् वृत्रस्य च वधस्तथा।।

पृथोर्वैणस्य चाख्यानं धर्माख्यानं ततःपरम्।

पितृशुश्रूषणाख्यानं नहुषस्य कथा ततः।।

ययातिचरितञ्चैव गुरुतीर्थनिरूपणम्।

राज्ञा जैमिनिसम्वादो बह्वाश्चर्यकथायुतः।।

कथा ह्यशोकाख्यानकं तत्र विहुण्डवधसंयुतम्।।

कुञ्जुगम्य च सम्वादश्च्यवनेन महात्मना।

सिद्धाख्यानां ततः प्रोक्तं खण्डस्यास्य फलोहनम्।।

सूतशौनकसम्वादं भूमिखण्डमिदं स्मृतम्।

(३) **स्वर्गखण्डस्य प्रमुखविषयाः**

ब्रह्माण्डोत्पत्तिरुदिता यत्रर्षिभ्यश्च सौतिना।

सभूमिलो कंसस्थानं तीर्थाख्यानं ततःपरम्।।

त्रमदोत्पत्तिकथनं तत्तीर्थानां कथा पृथक्।

कुरुक्षेत्रादितीर्थानां कथा पुण्याः प्रकीर्तिताः।।

कालिन्दीपुण्यकथनं काशीमाहात्म्यवर्णनम्।

गयायाश्चैव माहात्म्यं प्रयागस्य च पुण्यकम्।।

वर्णाश्रमानुरोधेन कर्मयोगनिरूपणम्।

व्यासजैमिनिसम्वादः पुण्यकर्मकथाचितः।।

समुद्रमथनाख्यानं व्रताख्यानं ततःपरम्।

ऊर्ज्जपञ्चाहमाहात्म्यं स्तोत्रं सर्वापराधनुत्।।

एतत्स्वर्गाभिधं विप्र ! सर्वपातकनाशनम्।

**(४) पातालखण्डस्य विषयाः**

रामाश्वमेधे प्रथमं रामराज्याभिषेचनम्।

अगस्त्याद्यागमश्चैव पौलस्त्यान्वयकीर्तनम्।।

अश्वमेधोपदेशश्च हयचर्य्या ततःपरम्।

नानाराजकथाः पुण्या जगन्नाथानुवर्णनम्।।

वृन्दावनस्य माहात्म्यं सर्वपापप्रणाशनम्।

नित्यलीलानुकथनं यत्र कृष्णावतारिणः।।

माधवस्नानमाहात्म्ये स्नानदानार्चने पलम्।

म्वादो राजदूतानां कृष्णस्तोत्रनिरूपणम्।

शिवशम्भुसमायोगो दधीच्याख्यानकन्ततः।।

भस्ममाहात्म्यमतुलं शिवमाहात्म्यमुत्तमम्।

देवरातसुताख्यानं पुराणज्ञप्रशंसनम्।।

गौतमाख्यानकञ्चैव शिवगीता ततःस्मृता।

कल्पान्तरी रामकथा भारद्वाजाश्रमस्थितौ।।

पातालखण्डमेतद्धि श्रृण्वतां ज्ञानिनां सदा।

सर्वपापप्रशमनं सर्वाभीष्टफलप्रदम्।।

**(५) उत्तरखण्डस्य विषयाः**

पर्वताख्यानकं पूर्वं गौर्यैं प्रोक्तं शिवेन वै।
जालन्धरकथा पश्चात् श्रीशैलाद्यनुकीर्त्तनम्।।
सागरस्य कथा पुण्या ततः परमुदीता।
गंगाप्रयागकाशीनां गयायाश्चाधिपुण्यकम्।।
आल्मादिदानमाहात्म्यं तन्महाद्वादशीव्रतम्।
चतुर्विंशैकादशीनां माहात्म्यं पृथगीरितम्।।
विष्णुधर्मसमाख्यानं विष्णुनामसहस्त्रकम्।
कार्तिकव्रतमाहात्म्यं माधवस्नानफलन्ततः।।
जम्बुद्वीपस्य तीर्थानां माहात्म्यं पापनाशनम्।
साधुमत्याश्च माहात्म्यं नृसिंहोत्पत्तिवर्णनम्।।
देवशर्मादिकाख्यानं गीतामाहात्म्यवर्णने।
भक्ताख्यानञ्च माहात्म्यं श्रीमद्भागवतस्य ह।।
इन्द्रप्रस्थस्य माहात्म्यं बहुतीर्थकथाचितम्।
मन्6रत्नाभिधानञ्च त्रिपाद्भूत्यनुवर्णनम्।।
अवतारकथा पुण्या मत्स्यादीनामतःपरम्।
रामनामशतं दिव्यं तन्माहात्म्यञ्च वाडव ! ।।
पराक्षणञ्च भृगुणा श्रीविष्णोर्वैभवस्य च।

इत्येतदुत्तरं खण्डं पञ्चमं सर्वपुण्यदम्।।

**एतच्छ्रवणफलमितिकरितव्यतानिर्देशो यथा**

पञ्चखण्डयुतं पाद्मं यः श्रृणोति नरोत्तमः।

स लभेद्वैष्णवं धाम भुक्त्वा भोगानिहेप्सितान्।।

एतद्वै पञ्चपञ्चाशत् सहस्त्रं पद्मसञ्ज्ञकम्।

पुराणं लेखयित्वा वै ज्यैष्ठ्यां स्वर्णाज्यसंयुतम्।।

यः प्रदद्यात्सुमतये पुराणज्ञाय मानदः ! ।

स याति वैष्णवं धाम सर्वदेवनमस्कृतः।।

पद्मानुक्रणीमेतां यः पठेत्छृणुयात्तथा।

सोऽपि पद्मपुराणस्य लभेत् श्रवणजं फलम्।।

**३-विष्णुपुराणम्**

विष्णुपुराणे भागद्वयमस्ति, पुर्वभाग उत्तरभागश्च। तत्र पूर्वभागे षड् अंशाः सन्ति। प्रथमेंशे २२, द्वितीयेंशे १६, तृतीयेऽशे १८, चतुर्थेंऽशे२४, पञ्चमेंऽशे ३८, षष्ठेंऽशे ३८, षष्ठेंऽशे च ८ अध्यायाः सन्ति, सङ्कलनया अत्र १२६ अध्यायेषु अधोङ्किता विषयाः सन्ति। एतत्त्रयोविंशतिसहस्त्र (२३००००) संख्याकमस्ति। एतत्परिचयश्चैवं वर्तते-

वाराहकल्पवृत्तान्तमधिकृत्य पराकरः।

यत्राह धर्मानखिलांस्तदुक्तं वैष्णवं विदुः।।

त्रयोविंशतिसाहस्त्रं तत्प्रमाणं विदुर्वुधाः।।

(मत्स्यपुराणे ४५३ अध्यायः)

श्रृणु वत्स ! प्रवक्ष्यामि पुराणं वैष्णवं महत्।

त्रयोविंशतिसीहस्त्रं सर्वपातकनाशनम्।।

यत्राविभागे निर्दिष्टाः षडांशाः शक्तिजेन ह।

मैत्रेयायादिमे तत्र पुराणस्यावतारिता।।

( नारदीयपुराणे ९४ अध्यायः)

**(१)प्रथमांशस्य प्रधानविषयाः**

आदिकारमसर्गश्च देवादीनाञ्च सम्भवः।

समुद्रमथनाख्यानं दक्षादीनं कथाचयः।।

ध्रुवस्य चरितं चैव पृथोश्चरितमेव च।

प्राचेतसं तथाख्यानं प्रह्लादस्य कथानकम्।।

पृथुराज्याधिकाराख्यः प्रथमोंऽश इतीरितः।

**(२)द्वितीयेंऽशे**

पातालनरकाख्यानं सप्तसर्गनिरूपणम्।

सूर्य्यादिचारकथनं पृथग्लक्षणसंगतम्।।

चरितं भरतस्याथ मुक्तिमार्गनिर्देशनम्।

निदाघऋतुसम्वादो द्वितीयोंऽश उदाहृतः।।

**(३) तृतीयेंऽशे**

मन्वन्तरसमाख्यानं वेदव्यासावतारकम्।

नरकोद्धारकं कर्म गदितञ्च ततःपरम्।।

सगरस्यौर्वसम्वादे सर्वधर्मनिरूपणम्।
श्राद्धकल्पं तथोद्दिष्टं वर्णाश्रमनिबन्धने।।
सदाचारश्च कथितो मायामोहकथा ततः।
तृतीयोंऽशोऽयमुदितः सर्वपापप्राणाशनः।।

(४) चतुर्थेंऽशे

सूर्यवंशकथा पुण्या सोमवंशानुकीर्तनम्।
चतुर्थेऽशे मुनिश्रेष्ठ ! नानाराजकथाचितम्।।

(५)पञ्चमेंऽशे

कृष्णावतारसम्प्रश्नो गोकुलीया कथा ततः।
पूतनादिवधो बाल्ये कौमारेऽघादिहिंसनम्।।
कैशोरे कंसहननं माथुरं चरितन्तथा।
ततस्तु यौवने प्रोक्ता लीला द्वारवतीभवा।।
सर्वदैत्यवधो यत्र विवाहाश्च पृथग्विधाः।
यत्र स्थित्वा जगन्नाथः कृष्णो योगेश्वरेश्वरः।।
भूभारहरणं चक्रे परस्वहननादिभिः।
अष्टावक्रीयमाख्यानं पञ्चमोंऽशइतीरितः।।

(६)षष्ठेंऽशे

कलिजं चरितम्प्रोक्तं चातुर्विध्यं लयस्य च।
ब्रह्मज्ञानसमुद्देशः खाण्डिक्यस्य निरूपितः।।

केशिध्वजेन चेत्येष षष्ठोंऽशः परिकीर्तितः।

अतः परन्तु सूतेन शौनकादिभिरादरात्।

पृष्टेन चोरिताः सश्वत् विष्णुधर्मोत्तराह्वयाः।।

नानाधर्मकथाः पुण्या व्रतानि नियमा यमाः।

धर्मशास्त्रञ्चार्थशास्त्रं वेदान्तं ज्योतिषन्तथा।।

वंशाख्यानम्प्रकरणात् स्तोत्राणि मनवस्तथा।

नानाविद्याश्रयाः प्रोक्ताः सर्वलोकोपकारकाः।।

एतद्विष्णुपुराणं वै सर्वशास्त्रार्थसंग्रहः।

**एतस्य पाठश्रवणफलमितिकर्त्तव्यतानिर्देशो यथा**

वाराहकल्पवृत्तान्तं व्यासेन कथितन्त्विह।

यो नरः पठते भक्त्या यः श्रृणोति च सादरम् ।।

तावुभौ विष्णुलोकं हि व्रजेताम्भुक्तभोगकौ।।

तल्लिखित्वा च यो दद्यादाषाढ्यां घृतधेनुना।।

सहितं विष्णुभक्ताय पुराणार्थविदे द्विज ! ।

कथयेच्छृणुयाद्वाऽपि स पुराणफलं लभेत्।।

## ४-शिवपुराणम्

शिवपुराणे सप्तसंहिताः सन्ति (१) विद्येश्वरसंहिता (२) रुद्रसंहिता (३) शतरुद्रसंहिता (४) कोटिरुद्रसंहिता (५) उमासंहिता (६) कैलाससंहिता (७) वायवीयसंहिता च। तत्रापि द्वितीयस्यां रुद्रसंहितायां सृष्टि सती-पार्वती-कुमार-युद्धनामानः

पञ्च खण्डाः सन्ति। सप्तमायां वायवीयसंहितायां पूर्वोत्तरभेदेन खण्डद्वयञ्चास्ति। तत्र सप्तसु संहितासु क्रमशः २५,९८७,४२,४३,५७,२३,७६ गणनया ४६४ अध्यायेषु अधोङ्किता विषयाः सन्ति। एतच्च चतुर्विंशतिसहस्र (२४००००) संख्याकमस्ति। एतत्परिचयश्चैवं विद्यते-

श्वेतकल्पप्रसङ्गेन धर्म्मान्वायुरिहाब्रवीत्।

यत्र तद् वायवीयं स्याद्रुद्रमाहात्म्यसंयुतम्।।

चतुर्विंशत्सहस्राणि पुराणं तदिहोच्यते। (मत्स्यपुराणे ५३ अध्यायः)

देवीभागवतादिपुराणेषु पुराणगमनायां शिवपुराणस्योल्लेको नास्ति, तस्य स्थाने वायवीयपुराणस्य नाम दृश्यते, किन्तु श्रीमद्भावतादिपुराणेषु शिवपुराणस्यैव नाम निर्दिष्टमस्ति, एवमुभयोर्महापुराणत्वविषये महान् मतभेदो दृश्यते। केचन शिवपुराणं महापुराणं मन्यन्ते, केचित्तु शिवपुराणमेव महापुराणं स्वीकुर्वन्ति, वायुपुराणञ्चोपपुराणं कथयन्ति। तथापि-

यथा शिवस्तथा शैवपुराणं वायुनोदितम्।

शिवभक्तिमसायोगान्नामद्वयविभूषितम्।।

इति रेवामाहात्म्यप्रामाण्येन एकस्यैव पुराणस्य शिवमहिम्नः सूचकत्वात् शिवपुराणम्, वायुनोक्तत्वाच्च वायवीयपुराणमिति नामद्वयमस्ति, यत्तु वायुपुराणं पृथगुपलभ्ते तत् उपपुराणमस्ति, न तु महापुराणम्।

यथा-चत्वारो वा इमे वेदा ऋग्वेदो यजुर्वेदः सामवेदो ब्रह्मवेदः, इत्यानुसारमर्थवेदस्य अथर्वऋषिसंगृहीतत्वात् अथर्ववेदः, ब्रह्माधिकृतत्वाच्च ब्रह्मवेद इतियापि नाम श्रूयते। यथा वा उत्तरमीमांसाया वेदान्तदर्शनं शिशुपालवधस्य च

माघकाव्यमपि नाम विद्वद्वर्गे प्रचलितमस्ति, तथैव एकस्यैवास्य पुराणस्य शिवपुराणं वायवीयपुराणमिति नामद्वयमुपभ्यते। वस्तुतः प्रथममेकलक्षात्मकं शिवपुराणं शिवद्वारोपविष्टमासीत्, परन्तु पश्चात् वायुना चतुर्विंशतिसहस्रात्मकमस्मिन्भूलोके प्रकाशितमित्यतो नामद्वयं प्रचलितमभवत्। तदुक्तम्-

तदिदं शैवमाख्यातं पुराणं वेदसम्मितम्।

निर्मितं तच्छिवेनैव प्रथमं ब्रह्मसम्मितम्।।

**५-श्रीमद्भागवतम्**

विबिन्नपुराणेषु पुराणगणनायां केवलं भागवतस्योल्लेखोऽस्ति, परन्तु वैष्णवा विष्णुमहत्वप्रकाशकं श्रीमद्भावतं शाक्ताश्च शक्तिसामर्थ्यसूचकं देवीभागवतं भागवतं मन्यन्ते। उभयत्रापि द्वादशस्कंधाः, अष्टादशसहस्र (१८०००) संख्याकाश्च श्लोकाः सन्ति। श्रीमद्भागवते ३३२ अध्यायाः सन्ति। तत्परिचयश्चैव वर्तते-

यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरम्।

वृत्रासुरवधोपेतं तद् भागवतमुच्यते।।

सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरोत्तमाः।

तद्वृत्तान्तोद्भवं लोकं तद्भागवतमुच्यते।

( मत्स्यपुराणे ५६ अध्यायः)

मरीचे ! शृणु वक्ष्यामि वेदव्यासेन यत्कृतम्।

श्रीमद्भागवतं नाम पुराणं ब्रह्मसंमितम्।।

तदष्टादशसाहस्रं कीर्तितं पापनाशनम्।

सुरपादरूपोऽयं स्कन्धैर्द्वादशभिर्युतः।।

भगवानेव विप्रेन्द्र ! विश्वरूपी समीरितः। (नारदीय पु ९६ अध्यायः)

**(१) तस्य प्रथमस्कन्धे-**

तत्र तु प्रथमे स्कन्धे सूतर्षीमां समागमः।

व्यासस्य चरितं पुण्यं पाण्डवानां तथैव च।।

पारीक्षितमुपाख्यानमितीदं समुदाहृतम्।

**(२) द्वितीयस्कन्धे-**

परीक्षिच्छुकसम्वादे सृतिद्वयनिरूपणम्।

ब्रह्मनारदसंवादेऽवतारचरितामृतम्।

पुराणलक्षणञ्चैव सृष्टिकारणसम्भवः।

द्वितीयोऽयं समुदितः स्कन्धो व्यासेन धीमता।।

**(३) तृतीयस्कन्धे-**

चरितं विदुरस्याथ मैत्रैयेणास्य सङ्गमः।

सृष्टिप्रकरणं पश्चाद् ब्रह्मणः परमात्मनः।।

कापिलं सांख्यमप्यत्र तृतीयोऽयमुदाहृतः।

**(४) चतुर्थस्कन्धे-**

यत्याश्चरितमादौ तु ध्रुवस्य चरितं ततः।

पृथोः पुण्यसमाख्यानं ततः प्राचीनबर्हिषः।।

इत्येष तूर्य्यो गदितो विसर्गे स्कन्ध उत्तमः।

(५) पञ्चमस्कन्धे-

प्रियव्रतस्य चरितं तद्वंश्यानाञ्च पुण्यदम्।
ब्रह्माण्डान्तर्गतानाञ्च लोकानां वर्णनन्ततः।।
नरकस्थितिरित्येव संस्थाने पञ्चमो मतः।

(६) षष्ठस्कन्धे-

अजामिलस्य चरितं दक्षसृष्टिनिरूपणम्।
वृत्राख्यानं ततःपश्चान्मरुतां जन्म पुण्यदम्।।
षष्ठोऽयमदितः स्कन्धो व्यासेन परिभाषणे।

(७) सप्तमस्कन्धे-

प्रह्लादचरितं पुण्यं वर्णाश्रमनिरूपणम्।
सप्तमो गदितो वत्स ! वासनाकर्मकीर्त्तने।।

(८) अष्टमस्कन्धे-

गजेन्द्रमोक्षमाख्यानं मन्वन्तरनिरूपणम्।
समुद्रमथनञ्चैव बलिवैभवबन्धनम्।।
मत्स्यावतारचरितमष्टमोऽयं प्रकीर्त्तितः।

(९) नवमस्कन्धे-

सूर्यवंशसमाख्यानं सोमवंशनिरूपणम्।
वंश्यानुचरिते प्रोक्ते नवमोऽयं महामते ! ।।

(१०)दशमस्कन्धे-

कृष्णस्य बालचरितं कैमारञ्च ब्रजस्थितिः।

कैशोरं मथुरास्थानं यौवनं द्वारिकास्थितिः।।

भूभारहरणञ्चात्र निरोधे दशमः स्मृतः।

(११) एकादशस्कन्धे-

नारदेन तु संवादो वसुद्वस्य कीर्तितः।

यदोश्च दत्तात्रेयेण श्रीकृष्णेनोद्धवस्य च।।

यादवानां म्थोऽन्तश्च मुक्तावेकादशः स्मृतः।

(१२)द्वादशस्कन्धे-

भविष्यकलिनिर्देशो मोक्षो राज्ञः परीक्षितः।

वेदशाखाप्रणयनं मार्कण्डेयतपःक्रिया।।

सौरी विभूतिरुदिता सात्त्वती च ततःपरम्।

पुराणसंख्याकथनमाश्रये द्वादशो ह्यहम्।।

इत्येवं कथितं वत्स ! श्रीमद्भागवतं तव।

श्रवणादिफलमिकर्तव्यतानिरदेशश्च

वक्तुः श्रोतुश्चोपदेष्टुरनुमोदितुरेव च।

साहाय्यकर्तुर्गदितं भक्तिभुक्तिविमुक्तिदम्।।

प्रौष्ठपद्यां पूर्णिमायां हेमसिंहसमाचितम्।

देयं भागवतायेदं द्विजाय प्रीतिपूर्वकम्।।

सम्पूज्य वस्त्रहेमाद्यैर्भगवद्भक्तिमिच्छता।

सोऽप्यनुक्रमणीमेतां श्रावयेच्छृणुयात्तथा।।

स पुराणश्रवणजं प्राप्नोति फलमुत्तमम्।

## ६-नारदीय पुराणम्

नारदपुराणे भागद्वयं विद्यते, पूर्वभाग उत्तरभागश्च। तत्र पूर्वभागे चत्वारः पादाः १२५ अध्यायाः, उत्तरभागे च ८२ अध्यायाः सन्ति, संकलनया अत्र २०७ अध्यायेषु अधोऽङ्किता विषयाः सन्ति। एतस्य श्लोकसंख्या पञ्चविंशति सहस्र (२५००००)मस्ति। एतत्परिचयश्चैवं विद्यते-

यत्राह नारदो धर्मान् वृहत्कल्पाश्रयाणि च।

पञ्चविंशति सहस्राणि नारदीयं तदुच्यते।।

(मत्स्यपुराणे ५३ अध्यायः)

शृणु विप्र ! प्रवक्ष्यामि पुराणं नारदीयकम्।

पञ्चविंशतिसाहस्रं बृहच्चित्रकथाश्रयम्।।

**(१)तत्र पूर्वभागस्य प्रथमपादे**

सूतशौनकसम्वादः सृष्टिसंक्षेपवर्णनम्।

नानाधर्मकथा पुण्याः प्रवृत्तेः समुदाहृताः।।

प्राग्भागे प्रथमे पादे सनकेन महात्मना।

**(२)पूर्वभागस्य द्वितीयपादे**

द्वितीये मोक्षधर्माख्ये मोक्षोपायनिरूपणम्।

वेदाङ्गानाञ्च कथनं शुकोत्पत्तिश्च विस्तरात्।।

सदानन्देन गदिता नारदाय महात्मने।

**(३) पूर्वभागस्य तृतीयपादे**

महातन्त्रे समुद्दिष्टं पशुपाशविमोक्षमम्।

मन्त्राणां शोधनं दीक्षा मन्त्रोद्धारश्च पूजनम्।।

प्रयोगाः कवचं चैव सहस्रं स्तोत्रमेव च।

गणेशसूर्यविष्णूनां शिवशक्त्योरनुक्रमात्।।

सनत्कुमारमुनिना नारदाय तृतीयके।

**(४) पूर्वभागस्य चतुर्थपादे**

पुराणलक्षणञ्चैव प्रामाणं दानमेव च।

पृथक् पृथक् समुद्दिष्टं दानकालपुरःसरम्।।

चैत्रादिसर्वमासेषु तिथीनां च पृथक् पृथक्।

प्रोक्तम्प्रतिपदादीनां व्रतं सर्वाघनाशनम्।।

सनातनेन मुनिना नारदाय चतुर्थके।

पूर्वभागोऽयमुदितो बृहदाख्यानसञ्ज्ञितः।।

**उत्तरभागे च**

अस्योत्तरे विभागे तु प्रश्न एकादशीव्रते।

वशिष्ठेनाथ सम्वादो मान्धातुः परिकीर्तितः।

रुक्माङ्गदकथा पुण्या मोहिन्युत्पत्तिकर्म च।

वसुशापश्च मोहिन्यै पश्चादुद्धरणक्रिया।।

गङ्गा कथा पुण्यतमा गयामात्रानुकीर्त्तनम्।

काश्या माहात्म्यमतुलम्पुरुषोत्तमवर्णनम्।।

प्रयागस्याथ माहात्म्यं कुरुक्षेत्रस्य तत्परम्।

हरिद्वारस्य चाख्यनं कामोदाख्यानकन्तथा।

बदरीतीर्थमाहात्म्यं कामाख्यायास्तथैव च।।

प्रभासस्य च माहात्म्यं पुराणाख्यानकन्तथा।

गौतमाख्यानकं पश्चाद् वेदपाठस्तवस्ततः।।

गोकर्णक्षेत्रमाहात्म्यं लक्ष्मणाख्यानकं तथा।

सेतुमाहात्म्यकथनं नर्मदातीर्थवर्णनम्।।

अवन्त्याश्चैव माहात्म्यं मथुरायात्ततःपरम्।

वृन्दावनस्य महिमा वसो- ब्रह्मान्तिके गतिः।।

मोहिनीचरितं पश्चादेवं वै नारदीयकम्।

**श्रवणादिफलमितिकर्तव्यतानिर्देशो यथा-**

यः शृणोति नरो भक्त्या श्रावयेद्वा समाहितः।

स याति ब्रह्मणो धाम नात्र कार्या विचारणा।।

यस्त्वेतदिषपूर्णायां धेनुनां सप्तकाञ्चितम्।

प्रदद्याद् द्विजवर्याय स लबेन्मोक्षमेव च।

यश्चानुक्रमणीमेतां नारदीयस्य वर्णयेत्।।

श्रृणुयाद्वैकचित्तेन सोऽपि स्वरगगतिं लभेत्।

### ७-मार्कण्डेयपुराणम्

मार्कण्डेयपुराणे १३४ अध्यायेषु निम्नाङ्किता विषया उपलभ्यन्ते। एतस्य श्लोकसंख्या नव सहस्र (९०००) विद्यते परमिदानीमत्र ६९०० एव श्लोका उपलभ्यन्ते, २१०० श्लोका नोपलभ्यन्ते) एतत्परिचयश्चैवमस्ति-

यत्राधिकृत्य सकुनीन्धर्मान्धर्म्मविचारणात्।

व्याख्याता वै मुने ! प्रश्ना मुनिभिर्धर्मचारिभिः।।

मार्कण्डेयेन कथितं तत्सर्वं व्स्तरेण तु।

पुराण नवसाहस्त्रं मार्कण्डेयमिहोच्यते।।

(मत्स्यपुराणे ५३ अध्यायः)

यत्राधिकृत्य शकुनीन् सर्वधर्मनिरूपणम्।

मार्कण्डेयेन मुनिना जैमिनेः प्राक् समीरितम्।।

पक्षिणां धर्मसंज्ञानां ततो जन्मनिरूपणम्।

पूर्वजन्मकथा चैषां विक्रिया च दिवस्पतेः।।

तीर्थयात्रा बलस्यातो द्रौपदेयकथानकम्।

हरिश्चन्द्रकथा पुण्या युद्धमाडीवकाङिधम्।।

पितृपुत्रसमाख्यानं दत्तात्रेयकथा ततः।

हैहयस्याथ चरितं महाख्यानसमाचितम्।।

मदालसाकथा प्रोक्ता ह्यलर्काचरिताचिता।

सृष्टिसंकीर्तनं पुण्यं नवधा परिकीर्तितम्।।

कल्पान्तकालनिर्देशो यक्ष्मसृष्टिनिरूपणम्।

रुद्रादिसृष्टिरप्युक्ता द्वीपवर्षानुकीर्त्तनम्।।

तत्पश्चात्प्रणवोत्पत्तिस्त्रयीतेजः समुद्भवः।

मारतण्डस्य च जन्माख्या तन्माहात्म्यसमाचिता।।

वैवस्वतान्वश्चापि वत्सव्याश्चरितं ततः।

खनिक्षस्य ततः प्रोक्ता कथा पुण्या महात्मनः।।

अविक्षिच्चरितं चैव किमिच्छ व्रतकीर्तनम्।

नरिष्यन्तस्य चरितं इक्ष्वाकुचरितं ततः।।

तुलास्यश्चरितं पश्चाद्रामचन्द्रस्य सत्कथा।

कुशवंशसमाख्यानं सोमवंशानुकीर्तनम्।।

ययाति चरितं पुण्यं यदुवंशानुकीर्तनम्।।

श्रीकृष्णबालचरितं माथुरं चरितं ततः।

द्वारकाचरितञ्चाथ कथा सर्वावतारजा।।

ततः सांख्यसमुद्देशः प्रपञ्चासत्वकीर्त्तनम्।

मार्कण्डेयस्य चरितं पुराणश्रवणे फलम्।।

**श्रवणादिफलमितिकर्तव्यतानिर्देशश्च**

यः श्र्णोति नरो भक्त्या पुराणमिदमादरात्।।

मार्कण्डेयाभिधं वत्स ! स लभेत्परमां गतिम्।

यस्तु व्याकुरुते चैतच्छैवं स लभते पदम्।।

तत्प्रयच्छेल्लिखित्वा यः सौवर्णकरिसंयुतम्।

कार्तिक्यां द्विजवर्षाय स लभेद् ब्रह्मणः पदम्।।

श्रृणोति श्रावयेद्वापि यश्चानुक्रमणीणिमाम्।

मार्कण्डेयपुराणस्य च लभेद्वाञ्छितम्फलम्।।

## ८-अग्निपुराणम्

अग्निपुराणे ३८३ अध्याया उपलभ्यन्ते। एतच्च नारदीयपुराणानुसारं पञ्चदश सहस्त्रा (१५००००) त्मकमस्ति। किन्तु मत्स्यपुराणानुसारमेतत् षोडशसहस्त्र (१६०००) संख्याकमेवास्ति। एतत्परिचयष्चैवं वर्तते-

यत्तदीशानकं कल्पं वृत्तान्तमधिकृत्य च।

वसिष्ठायाग्निना प्रोक्तमाग्नेयं तत्प्रचक्षते।।

तच्च षोडशसाहस्त्रं सर्वप्रतुफलप्रदम्। (मत्स्यपुराणे ५३ अध्यायः)

अथातः संप्रवक्ष्यामि तवाग्नेयपुराणकम्।

ईशानकल्पवृत्तान्तं वसिष्ठायानलोऽब्रवीत्।।

तत्पंचदशसाहस्त्रं नाम्ना चरितमद्भूतम्।

पठतां श्रृम्वतां चैव सर्वावतारजा।

सृष्टि प्रकरणं चाथ विष्णुपूजादिकं ततः।।

अग्निकार्यं ततः पस्चान्मंत्रमुद्रादिलक्षणम्।

सर्वदीक्षाविधानं च अभिषेकनिरूपणम्।।

लक्षणं मण्डलादीनां कुशापामार्जनं ततः।

पवि6रोपणविधिर्देवालयविधिस्तथा।।

शालग्रामादिपूजा च मूर्तिलक्ष्म पृतक् पृथक्।

न्यासादीनां विधानं च प्रतिष्ठापूर्तका ततः।।

विनायकादिदीक्षाणां विधिः ज्ञेयस्ततः परम्।

प्रतिष्ठा सर्वदेवानां ब्रह्माम्डस्य निरूपणम्।

गङ्गादितीर्थमाहात्म्यं जम्बादिद्वीपवर्णनम्।

ऊर्ध्वाघोलोकरचना ज्योतिश्चक्रनिरूपणम्।।

ज्योतिषं च ततः प्रोक्तं शास्त्र युद्धजयार्मवम्।

षड्कर्म्म च ततः प्रोक्तं मंत्रयंत्रौषधीगणः।।

कुब्जिकादिसमर्चा च षोडा न्यासविधिस्तथा।

कोटिहोमविधानं च तदन्तरनिरूपणम्।।

ब्रह्मचर्यादिधर्म्माश्च श्राद्धकल्पविधिस्ततः।

गृहयज्ञस्ततः प्रोक्तो वैदिकस्मार्त्तकर्म च।।

प्रायश्चित्तानुकथनं तिथीनां च व्रतादिकम्।

वारव्रतानुकथनं नक्षत्रव्रतकीर्त्तनम्।।

मासिकव्रतनिर्देशो दीपदानविधिस्तथा।

नवव्यूहार्चनं प्रोक्तं नरकाणां निरूपणम्।।

व्रतानां चापि दानानां निरूपणमिहोदितम्।

नाडीचक्रसमुद्देशः सन्ध्याविधिरनुत्तमः।।

गायत्र्यर्थस्य निर्ग्देशो लिङ्गस्तोत्रं ततः परम्।

राज्याभिषेकमंत्रोक्तिर्धर्मकृत्यं च भूभुजाम्।।

स्वप्नाध्यायस्ततः प्रोक्तः शकुनादिनिरूपणम्।

मण्डलादिनिर्देशो रणदीक्षा विधिस्ततः।।

रामोक्तमीति निर्देशो तत्नानां लक्षणं ततः।

धनुर्विद्या ततः प्रोक्ता व्यवहारप्रदर्शनम्।।

देवासुरविमर्द्दख्यां ह्यायुर्वेदनिरूपणम्।

गजादीनां चिकित्सा च तेषां शान्तिस्ततः परम्।।

गोनसादिचिकित्सा च नानपूजास्ततः परम्।

शान्तयश्चापि विविधाश्छन्दःशास्त्रमतः परम्।।

साहित्यं च ततः पश्चादेकार्णादिसमाह्वयाः।

सिद्धशिष्टानुशिष्टश्च कोषः स्वर्गादिवर्गके।।

प्रलयानां लक्षणं च शारीरकनिरूपणम्।

वर्णनं नरकाणां च योगशास्त्रमतः परम्।।

ब्रह्मज्ञानं ततः पश्चात् पुराणश्रवणे फलम्।

एतदाग्नेयकं विप्र ! पुराणं परिकीर्तितम्।।

## ९-भविष्यपुराणम्

भविस्यपुराणे पञ्चपर्वाणि सन्ति (१)ब्राह्मपर्वम् (२) वैष्णवपर्वम् (३) शिवपर्वम् (४) सौरपर्वम् (५) प्रतिसर्गपर्वञ्च। अत्र ६०५ अध्यायाः सन्ति नारदीयपुराणानुसारमेतत् चतुर्दशसहस्र (१४०००) संख्याकमस्ति, किन्तु मत्स्यपुराणानुसारं सार्धचतुर्दशसहस्र (१४५००) संख्याकमस्ति। एतत्परियश्चैवं वर्तते-

यत्राधिकृत्य माहात्म्यमादित्यस्य चतुर्मुखः।
अघोरकल्पवृत्तान्तप्रसङ्गेन जगात्स्थितम्।।
मनवे कथयामास भूतग्रामस्य लक्षणम्।
चतुर्दशसहस्राणि तथा पञ्चशतानि च।।
भविष्यचरितप्रायं भविष्यं तदिहोच्यते।

(मत्स्यपुराणे ५६ अध्यायः)

अथ ते सम्प्रबक्ष्यामि पुराणं सर्वसिद्धिदम्।
भविष्यं भवतः सर्वलोकाभीष्टप्रदायकम्।।
तत्राहं सर्वदेवानामादिकर्ता समुद्यतः।
सृष्ट्यर्थं तत्र सञ्जातो मनुः स्वायम्भुवः पुरा।।
स मां प्रणम्य पप्रच्छ धर्मं सर्वार्थसाधकम्।
अहं तस्मै तदा प्रीतः प्रावोचं धर्मसंहितम्।।
पुराणानां यदा व्यासो व्यासञ्चक्रे महामतिः।
तदा तां संहिता सर्वा पञ्चधा व्यभदन्मुनिः।।

अघोरकलपवृत्तान्तनानाश्चर्यकथाचिताम्।

(नारदीयपुराणे १०० अध्यायः)

**(१) तत्र प्रथमपर्वणि**

तत्रादिमं स्मृतं पर्व ब्राह्मं यत्रास्त्युपक्रमः।

सूतशौनकसम्वादे पुराणप्रश्नसंक्रमः।।

आदित्यचरितः प्रायः सर्वाख्यानसमाचितः।

सृष्ट्यादिलक्षणोपेतः शास्त्रसर्वसरूपकः।।

पुस्तलेखकलेखानां लक्षणञ्च ततः परम्।

संस्काराणाञ्च सर्वेषां लक्षणञ्चात्र कीर्तितम्।

पक्षत्यादितिथीनाञ्च कल्पाः सप्त च कीर्तिताः।

अष्टमाद्याः शेषकल्पा वैष्णवे पर्वणि स्मृताः।।

शैवे च कामतो भिन्ना सौरे चान्त्यकथाचयः।

प्रतिसर्गाह्वयं पश्चान्नानाख्यानसमाचितम्।।

पुराणस्योपसंहारसहितं पर्वपञ्चमम्।

एषु पञ्चसु पूर्वस्मिन् ब्रह्मणो महिमाधिकः।।

**द्वितीयतृतीयचतुर्थपञ्चमपर्वसु**

धर्मे कामे मोक्षे तु विष्मोश्चापि शिवस्य च।

द्वितीये च तृतीये च सौरोवर्गचतुष्टये।।

प्रतिसर्गाह्वयन्त्वान्त्यं प्रोक्तं सर्व कथाचितम्।

एतद्भविष्यं निर्दिष्टं पर्वं व्यासेन धीमता।।

चतुर्दशसहस्रं तु पुराणं परिकीर्तितम्।

भविष्यं सर्ववेदानां साम्यं यत्र प्रकीर्तितम्।।

गुणानां तारतम्येन समं ब्रह्मेति हि श्रुतिः।

**एतसर्य श्रवमफलमितिकर्तव्यतानिर्देशो यथा**

तल्लिखित्वा तु यो दद्यात्पौष्यां विद्वान्विमत्सरः।

गुडधेनुयुतं हेम वस्त्रमाल्यविभूषणैः।।

वाचकम्पुस्तकञ्चापि पूजयित्वा विधानतः।

गन्धाद्यैर्भोज्यभक्ष्यैश्च कृत्वा नीराजनादिकम्।।

यो वै जितेन्द्रियो बूत्वा सोपवासः समाहितः।

अथवा यो नरो बक्त्या कीर्तयेच्छुमुयादपि।।

स मुक्तः पातकैर्घोरैः प्रयाति ब्रह्मणः पदम्।

योऽप्यनुक्रणीमेतां भविष्यस्य निरूपिताम्।।

पठेद्वा श्रृणुयाच्चैतौ भुक्तिं मुक्तिञ्च विन्दतः।

**१०-ब्रह्मवैवर्तपुराणम्**

ब्रह्मवैवर्ते चत्वारः खण्डाः सन्ति (१) ब्रह्मखण्ड (२) प्रकृतिखण्ड (३) गणेसखण्ड (४) श्रीकृष्णजन्मखण्डश्च। तत्रान्ते भागद्वयमस्ति, पूर्वभाग उत्तरभागश्च। अत्र ( क्रमशः ३०, ५७, ४६, १३३) सङ्कलनया २६६ अध्यायाः सन्ति। एतस्य श्लोकसंख्या अष्टादशसहस्रात्मिका (१८०००) अस्ति। एतत्परिचयश्चैवमस्ति-

रथन्तरस्य कल्पस्य वृत्तान्तमधिकृत्य च।

सावर्णिना नारदाय कृष्णमाहात्म्यमुत्तमम्।।

यत्र ब्रह्मावराहस्य चरितं वर्ण्यते मुहुः।

तदष्टादशासहं ह्रह्मवैवर्तमुच्यते।। (मत्स्यपुराणे ५६ अध्यायः)

ब्रह्मोवाच-श्रृणु वत्स प्रवक्षामि पुराणं दशमं तव।

ब्रह्मवैवर्त्तकं नाम वेदमार्गानुदर्शकम्।।

सावर्णिर्यत्र भगवान् साक्षात् देवर्षयेऽतिथिः।

नारदाय पुराणार्थं प्राह सर्वमलौकिकम्।।

धर्मार्थकाममोक्षोणां सारः प्रीतिर्हरौ हरेः।

तयोरभेदसिद्ध्यर्थं ब्रह्मवैवर्त्तमुत्तमम्।।

(नारदीय १०१ अध्यायः)

रथन्तरस्य कल्पस्य वृत्तान्तं यन्मयोदितम्।

शतकोटिपुराणं तत् संक्षिप्य प्राह वेदवित्।।

व्यासश्चतुर्द्धा संव्यस्य ब्रह्मवैवर्तसंज्ञितम्।

अष्टादशसहस्रन्तत्पुराणं परिकीर्त्तितम्।।

ब्रह्मप्रकृतिविघ्नेश कृष्णखम्ड समाचितम्।

तत्र सूतर्षिसम्बादः पुराणपक्रमो मतः।।

**(१) तत्र प्रथमे ब्रह्मखण्डे**

सृष्टिप्रकरणं त्वाद्यं ततो नारदवेधसो।

विवादः सुमहान् यत्र द्वयोरासीत्पराभवः।।

शिवलोकगतिः पश्चाज्ज्ञानलाभः शिवान्मुनेः।

शिवं वाक्येन तत्पश्चात् मरीचेर्नारदस्य तु।।

मननञ्चैव सावर्णिर्ऽनार्थं सिद्धसेविते।

आश्रमे सुमहापुण्ये त्रैलोक्याश्चर्यकारिणि।।

एतद्धि ब्रह्मखण्डं हि श्रुतं पापविनाशनम्।

(२)द्वितीये प्रकृतिखण्डे

ततः सावर्णिसम्वादो नारदस्य समीरितः।

कृष्णमाहात्म्यसंयुक्तो नानाख्यानकथोत्तरः।।

प्रकृतेरंशभूतानां कलानाञ्चापि वर्णितम्।

माहात्म्यं पूजनाद्यञ्च विस्तरेण यथास्थितम्।।

एतत्प्रकृतिखण्डं हि श्रुतं भूतिविधायकम्।

(३)तृतीये गणेशखण्डे

गणेशजन्मसम्प्रश्नः सपुण्यकमहाव्रतम्।

पार्वत्याः कार्तिकेयेन सह विघ्नेशसम्भवः।।

चरितं कार्त्तवार्यस्य जामदग्न्यस्यचाद्भतम्।

विवादः सुमहान्वश्चाज्जामदग्न्यगणेशयोः।।

एतद्विघ्नेशखण्डं हि सर्वं विघ्नविनाशनम्।

(४)चतुर्थे श्रीकृष्णखण्डे

श्रीकृष्णडन्म सम्परश्नोजन्माख्यानं ततोऽद्भतम्।

गोकुलं गमनं पश्चात्पूतनादिवधोऽद्भुतः।।

बाल्यकौमारजा लीला विविधास्तत्र वर्णिताः।

रासक्रीडा च गोपिभिः शारदी समुदाहृता।।

रहस्ये राधया क्रीडा वर्णिता बहुविस्तरा।

सहाक्रूरेण तत्पश्चान्मथुरागमनं हरेः।।

कंसादीनां वदेवृत्तेसदस्यद्विजसंस्कृतिः।।

कांश्यसान्दीपनेः पश्चाद् विद्योपादनमद्भुतम्।।

यवनस्य वधः पश्चाद् द्वारकागमनं हरेः।

नरकादिवधस्तत्र कृष्मेन विहितोऽद्भुतः।।

कत्रृष्णखण्डमिदं विप्र ! नृणां संसारखण्डनम्।

श्रवणादिफलमितिकर्तव्यतानिर्देशो यथा

पठितञ्च श्रुतं ध्यातं पूजितं चाभिवर्णितम्।

इत्येतद् ब्रह्मवैवर्त्तं पुराणं चात्यलौकिककम्।।

व्यासोक्तं चादिसम्भूतं पठन् शृण्वन् विमुच्यते।

विज्ञानज्ञानशमनाद् घारात्संसारसागरात्।।

लिखित्वेदं च यो दद्यान्माघ्यां धेनुसमाचिरतम्।

ब्रह्मलोकमवाप्नोति स मुक्तोज्ञानबन्दनात्।

सोपि कृष्णप्रसादेन लभते वाञ्छितम्फलम्।।

## १०-लिङ्गपुराणम्

लिङ्गपुराणे द्वौ भागौ स्तः, अत्र पूर्वबागः उत्तरभागश्च। क्रमशः १०८, ५५, संकलनया १६३ अध्यायाः सन्ति। इदमेकादशसहस्त्र (११०००) संख्याकमस्ति। एतत्परिचयश्चैवं विद्यते-

यत्राग्निलिओङ्गमध्यस्थः प्राह देवो महेश्वरः।
धर्मार्थकाममोक्षार्थमाग्नेयमधिकृत्य च।।
कल्यान्ते लिङ्गमित्युक्तं पुराणं ब्रह्मणा स्वयम्।
तदेकादशसाहस्त्रं... ... ... (मत्स्यपुराणे ५६ अध्यायः)

ब्रह्मोवाच।

श्रणु पुत्र !प्रवक्षामि पुराणं लिङ्गसंज्ञितम्।
पठतां श्रण्वताञ्चैव भुक्तिमुक्तिप्रदायकम्।।
यच्च लिङिगाभिधे तिष्ठन् वह्निलिंगे हरोऽभ्यधात्।
मह्यं धर्मादिसिदिध्यर्थमग्निकल्पकथाश्रयम्।।
तदेकादशसाहस्त्रं हरमाहात्म्यसूचकम्।
पर सर्वपुरामानां सारभूतं जगत्त्रये।
पुराणोपक्रमे प्रश्नः सृष्टिसंक्षेपतः पुराः।।

(नारदीयपुराणे १०२ अध्यायः)

**(१)तत्रपूर्वभागे**

योगाख्यानं ततः प्रोक्तं कल्याख्यानं ततः परम्।
लिङ्गोद्भवस्तदर्चा च कीर्तिता हि ततः परम्।।
सनत्कुमारशैलादिसंवादश्चाथ पावनः।
ततो दधीचिचरितं युगधर्मनिरूपणम्।।
ततश्च विस्तरात्सर्गस्त्रिपुराख्यानकस्तथा।
लिङ्गप्रतिष्ठा च ततः पशुपासविमोक्षणम्।।
प्रायश्चित्तान्यरिष्टानि काशीश्रीशैलवर्णनम्।
अन्दकाख्यानकं पश्चात् वाराहचरितं पुनः।।
नृसिंहचरितं पश्चाज्जलन्धरवधस्ततः।
शैवं सहस्रं नामाथ दक्षयज्ञविनाशनम्।।
कामस्य दहनं पश्चात् गिरिजायाः करग्रहः।
ततो विनायकाख्यानं नृत्याख्यानं शिवस्य च।।
उपमन्युकथा चापि पूर्वभाग इतीरितः।

**(२) उत्तरभागे च**

विष्णुमाहात्म्यकथनमम्बरीषकथा ततः।
सनत्कुमारनन्दीशसम्वादश्च पुनर्मुने।।
शिवमाहात्म्यसंयुक्तस्नानयागादिकं ततः।
सूर्यपूजाविधिश्चैव शिवपूजा त मुक्तिदा।।

दानानि बहुधोक्तानि श्राद्धप्रकरणन्ततः।

प्रतिष्ठा तत्र गदिता ततोऽघोरस्य कीर्त्तनम्।।

व्रजेश्वरी महाविद्या गायत्री महिमा ततः।

त्र्यम्वकस्य च माहात्म्यं पुराणश्रवणस्य च।।

एतस्योपरिभागस्ते लैंगस्य कथितो मया।

व्यासेन हि निबद्धस्य रुद्रमाहात्म्यसूचिनः।।

**श्रवणादिपलमितिकरितव्यताज्ञाननिर्देशो यथा**

लिखित्वैतत्पुराणन्तु निलधेनुसमाचितम्।

फाल्गुन्यां पूर्णिमायां यो दद्याद्भक्त्या द्विजातये।।

यः पठेच्छृणुयाद्वापि लैंङ्गं पापापहं नरः।

स भुक्तभोगो लोकेऽस्मिन्ते शिवपुरं व्रजेत्।।

लिङ्गानुक्रमणीमेतां पठ्याः श्र्णुयात्तथा।

तावुभौ शिवभक्तौ तु लोकद्वितयभोग्नौ।।

जायेतां गिरिजाभर्त्तुः प्रासादान्नात्र संशयः।

## १२-वाराहपुराणम्

वाराहपुराणे भागद्वयमस्ति, पूर्वभाग उत्तरभागश्च। अत्र २१८ अध्यायाः सन्ति। एतच्चतुर्विंशतिसहस्र (२४०००) संख्याकमस्ति। एतत्परिचयश्चैवं विद्यते-

महावराहस्य पुनर्माहात्म्यमधिकृत्य च।

विष्णुमाभिहितं क्षुण्ण्यै तद्वाराहमिहोच्यते।

मानवस्य प्रसंगेन कल्पस्य मुनिसत्तमाः।

चतुर्विंशत्सहस्राणि तत्पुराणमिहोच्यते।। (मत्स्यपुराणे ५६ अध्यायः)

ब्रह्मोवाच

शणु वत्स ! प्रवक्ष्यामि वाराहं वै पुराणकम्।

भागद्वययुतं शश्वद्विष्णुमाहात्म्यसूचकम्।

मानवस्य तु कल्पस्य प्रसङ्ग मत्कृतं पुरा।

निबबन्ध पुराणेऽस्मिश्चतुर्व्विंशसहस्रके।

व्यासो हि विदुषां श्रेष्ठः साक्षान्नारायणो भुवि।

तत्रादौ शुभसंवादः स्मृतो भूमिवराहयोः।। (नारदीयपुराणे १०३ अध्यायः)

**(१) तत्राद्ये पूर्वभागे**

अथादिकृतवृत्तान्ते रभ्यस्य चरितं ततः।

दुर्ज्जयाय च त्तपश्चाच्छ्राद्धकल्प उदीरितः।

महातपस आख्यानं गौर्य्युत्पत्तिस्ततःपरम्।।

विनायकस्य नागानां सेनान्यादित्ययोरपि।।

गमानाञ्च तथा देव्या धनदस्य वृषस्य च।

आख्यानं सत्यतपसो व्रताख्यानसमन्वितम्।।

अगस्त्यगीता तत्पश्चादुद्रगीता प्रकीर्तिता।

महिषासुरविध्वंसे माहात्म्यञ्च त्रिशक्तिजम्।।

पर्वाध्यायस्ततः श्वेतोपाख्यानं गोतोपाख्यानं गोप्रदानिकम्।

इत्यादिकृतवृत्तान्तं प्रथमोद्देशनामकम्।।

भगवद्धर्मके पश्चात् व्रततीर्थकथानकम्।

द्वात्रिंशदपराधानां प्रायश्चित्तं शरीरकम्।।

तीर्थानाञ्चापि सर्वेषां माहात्म्यं पृथगीरितम्।

मथुराया विशेषेण श्राद्धादीनां विधिस्ततः।।

वर्णनं यमलोकस्य ऋषिपुत्रप्रसङ्गतः।

विपाकः कर्म्मणाञ्चैव विष्मुव्रतनिरूपणम्।।

गोकर्णस्य च माहात्म्यं कीर्तितं पापनाशनम्।

इत्येष पूर्वभागोऽस्य पुराणस्य निरूपितः।।

**(२) द्वितीये उत्तरभागे च**

उत्तरे  प्रविभागे तु पुलस्त्यकुरुराजयोः।

संवादे सर्वतीर्थानां माहात्म्यं विस्तरात्पृथक्।।

अशेषधर्माश्चाख्याताः पौष्करं पुण्यपर्व च।

इत्येव तव वाराहं प्रोक्तं पापविनाशनम्।।

**श्रवणादिफलमितिकर्त्तव्यानिर्देशो यथा**

पठतां श्रृम्वताञ्चैव भगवद्भक्तिवर्द्धनम्।

काञ्चनं गरुडं कृत्वा तिलधेनुसमाचितम्।।

लिखित्वैवच्च यो दद्याच्चैत्र्यां विप्राय भक्तितः।

स लभेद्वैष्णवं धाम देवर्षिगणवन्दितः।।

यो वानुक्रमणीमेतां शृणोत्यपि पठत्यपि।

सोपि भक्तिं लभेद्विष्णौ संसारोच्छेदकारिणीम्।

### १३-स्कन्दपुराणम्

स्कन्दपुराणे नारदीयपुराणानुसारं सप्तखण्डाः सन्ति (१) माहेस्वरखण्डः (२) वैष्णवखण्डः (३)ब्रह्मखण्डः (४) काशीकण्डः (५) अवन्तीखण्डः (६) नागरखण्डः (७) प्रभासखण्डश्च। तत्राप्यनेकेऽवान्तरखण्डाः सन्ति। अत्र क्रमशः १७४, १५३, ८७, ३८७, २७९, ४२१ संकलनया १६७१ अध्यायाः सन्ति। किन्तु मत्स्यपुराणानुसारमत्र सनत्कुमार-सूत-शङ्कर-वैष्णव-ब्राह्म-सौरभेदात् षट् संहिताः सन्ति। एतत् एकादशीतिसहस्र (८१००००) संख्याकमस्ति। एतत्परिचयश्चैवं विद्यते-

यत्र माहेश्वरान्धर्म्मानधिकृत्य च षण्मुखः।

कल्पे तत्पुरुषे वृत्तं चरितैरुपबृंहितम्।।

स्कान्दं नाम पुराणं वै तढेकाशीति गद्यते।

सहस्राणि शतं चैकमिति मर्त्येषु गद्यते।।

(मत्स्यपुराणे ५६ अध्यायः)

शृणु वक्ष्ये मरीचे ! च पुराणं स्कन्दसंज्ञितम्।

यस्मिन् प्रतिपदं साक्षान्महादेवो व्यवस्थितः।।

पुराणे शतकोटौ तु यच्छैवं वर्णितं मया।

लक्षितस्यार्थजातस्य सारो व्यासेन कीर्तितः।।

स्कन्दाह्वयस्यात्र खण्डाः सप्तैव परिकल्पिताः।

एकाशीतिसहस्रन्तु स्कान्दं सर्व्वाघकृन्तनम्।।

यः शृणोति पठेद्वापि स तु साक्षाच्छिवः स्थितः।

यत्र माहेश्वरा धर्मा षण्मुखेन प्रकाशिताः।।

कल्पे तत्पुरुषे वृत्ताः सर्वसिद्धिविधायिकाः।

(नारदपुराणे १०४ अध्यायः)

**(१)तत्र प्रथमे खण्डे**

तस्य माहेश्वरश्चाद्यः खण्डः पापमाशनः।।

किञ्चिन्न्यूनार्कसाहस्रो बहुपुण्यो वृहत्कथः।

सूचरित्रशतैर्युक्तः स्कन्दमाहात्म्यसूचकः।।

यत्र केदारमाहात्म्ये पुराणपोक्रमः पुरा।

दक्षयज्ञकथा पश्चाच्छिवलिङ्गार्च्चने फलम्।।

समुद्रमथनाख्यानं देवेन्द्रचरितं ततः।

पार्वत्या समुपाख्यानं विवाहस्तदन्तरम्।।

कुमारोत्पत्तिकथनं ततस्तारकसङ्गरः।

ततः पशुपताख्यानं चण्डाख्यामसमाचितम्।।

द्यूतप्रवर्त्तनाख्यानं नारदेन समागमः।

ततः कुमारमाहात्म्ये ऽ्चतीर्थकथानकम्।।

धर्म्मवर्म्मनृपाख्यानं नदीसागरकीर्त्तनम्।

इन्द्रद्युम्नकथा पस्चान्नाडीजङ्घकथाचिता।।

प्रादुर्भावस्ततो मह्याः कथा दमनकस्य च।

महीसागरसंयोगः कुमारेशकथा ततः।।

ततस्तारकयुद्धञ्च नानाख्यानसमाचितम्।

वधश्च तारकस्याथ पञ्चलिङ्गनेवेशनम्।।

द्वीपाख्यानं ततः पुण्यं ऊर्ध्वलोकव्यस्थितः।

ब्रह्माण्डस्थितिमानञ्च वर्करेशकथानकम्।।

महाकालसमुद्भूतिः कथा चास्य महाद्भुता।

वासुदेवस्य माहात्म्यं कोरितीर्थं ततः परम्।।

नानातीर्थसमाख्यानं गुप्तक्षेत्रे प्रकीर्त्तितम्।

पाण्डवानां कथा पुण्या महाविद्याप्रसाधनम्।।

तीर्थयात्रासमाप्तिष्च कौमारमिदमद्भुतम्।

अरुणाचलमाहात्म्ये सनकब्रह्मसंकथा।।

गौरीतपःसमाख्यानं तत्तत्तीर्थनिरूपणम्।

महिषासुरजाख्यानं वधश्चास्य महाद्भुतः।

शोणाचले शिवास्थानं नितियदा परिकीर्त्तिनम्।

इत्येष कथितः स्कन्दे खण्डो माहेश्वरोऽद्भुतः।।

**(५)द्वितीये वैष्णवखण्डे**

द्वितीयो वैष्णवः खण्डस्तस्याख्यानानि मे श्रृणु।

प्रथमं भूमिवाराहं समाख्यानं प्रकीर्तितम्।।

यत्र वोचककुघ्रस्य माहात्म्यं पापनाशनम्।

कमलायाः कथा पुण्या श्रीनिवासस्थितिस्ततः।।

कुलालाख्यानकश्चात्र सुवर्णमुखरी कथा।

नानाख्यानसमायुक्ता भारद्वाजकथाद्भुता।।

मतङ्गाञ्जनसंवादः कीर्त्तितः पापनासनः।

पुरुषोत्तममाहात्म्यं  कीर्त्तितं चोत्कले ततः।।

मार्कण्डेयसमाख्यानमम्बरीषस्य भूपतेः।

इन्द्रद्युम्नस्य चाख्यानं विद्यापतिकथा शुभा।।

जैमिने समपाख्यानं नारसिंहोपवर्णनम्।।

अश्वमेदकथा राज्ञो ब्रह्मलोकगतिस्तथा।

रथयात्राविधिः पश्चाज्जन्मस्नानविधिस्तथा।।

दक्षिणामूर्त्त्युपाख्यानं गुण्डिचाख्यानकं ततः।

रथरक्षाविधानञ्च शयनोत्सेवकीर्त्तनम्।।

श्वेतोपाख्यानमत्रोक्तं वह्न्युत्सवनिरूपणम्।

दोलोत्सवो भगवतो व्रतं सांवत्सराभिधम्।।

पूजा च कामिभिर्वि,मोरुद्दालकनियोगकः।

मोक्षसाधनमत्रोक्तं नानायोगानरूपणम्।।

दशावतारकथनं स्नानादिपरिकीर्तनम्।

अग्नादितीर्थमाहात्म्यं वैनतेयशिलाभवम्।

कारणं बगवद्वासे तीर्थं कापालमोचनम्।।

पञ्चधाराभिधं तीर्थं मेरुसंस्थापनं तथा।

ततः कार्त्तिकमाहात्म्ये माहात्म्यं  मदनालसम्।।

धूम्रकोशसमाख्यानं दिनकृत्यनि कार्तिके।

पञ्चभीष्मव्रताख्यानं कीर्त्तिदं भुक्तिमुक्तिदम्।।

तद्व्रतस्य च माहात्म्ये विधानं स्नानजं तथा।

पुण्ड्रादिकीर्त्तनञ्चात्र मालाधारणपुण्यकम्।।

पञ्चामृतस्नानपुण्यं घन्टानादिजं फलम्।

नानापुष्पार्चनफलं तुलसीदलजं फलम्।।

नैवेद्यस्य च माहात्म्यं हरिवासन (र) कीर्त्तिनम्।

अखण्डैकादशीपुण्यं तथा जागरणस्य च।।

मत्स्योत्सवविधानञ्च नाममाहात्म्यकीर्त्तनम्।

ध्यानादिपुण्यकथनं माहात्म्यं मथुराभवम्।।

मथुरातीर्थमाहात्म्यं पृथगुक्तं ततः परम्।

वनानां द्वादशानाञ्च माहात्म्यं कीर्तितं ततः।।

श्रीमद्भागवतस्यात्र माहात्म्यं कीर्त्तितं परम्।

वज्रशाम्डिल्यसम्वादमन्तर्लीलाप्रकाशकम्।।

ततो माधस्य माहात्म्यं स्नानदानजपोद्भवम्।

नानाख्यानसमायुक्तं दशाध्याये निरुपितम्।।

ततो वैसाखमाहात्म्यं शय्यादानादिजं फलम्।

जलदानादिविधयः कामाख्यानमतः परम्।।

श्रुतदेवस्य चरितं व्याधोपाख्यानमद्भुतम्।

तथाक्षयतृतीयादेर्विशोषात्पुण्यकीर्त्तनम्।

ततस्त्वयोध्यामाहात्म्ये चक्रब्रह्माह्वतीर्तके।।

ऋणपापविमोक्षाख्ये तथाधारसहस्त्रकम्।

स्वर्गद्वारं चन्द्रहरिधर्म्महर्य्युपवर्णनम्।।

स्वर्णवृष्टेरुपाख्यानं तिलोदा सरयू युतिः।

सीताकुम्डं गुप्तहरि- सरयूर्घर्घराचयः।।

गोप्रचारश्च दुग्धोदं गुरुकुण्डादिपञ्चकम्।

घोषार्कादीनि तीर्थानि त्रयोदश ततः परम्।।

गयाकूपस्य माहात्म्यं सर्व्वाघविनिवर्त्तकम्।

माण्डव्याश्रमपूर्वाणि तीर्थानि तदनन्तरम्।।

अजितादिमानसादितीर्थानि गदितानि च।

इत्येष वैष्णवः खण्डो द्वितीयः परिकीर्तितः।।

**(३)तृतीये ब्रह्मखण्डे**

अतः परं ब्रह्मखण्डं मरीचे ! श्रृणु पुण्यदम्।

यत्र वै सेतुमाहात्म्ये पलं स्नानेक्षणोद्भवम्।।

गालवस्य तपश्चार्य्या राक्षसाख्यानकं ततः।

चक्रतीर्थादिमाहात्म्यं देवीपतनसंयुतम्।।

वेतालतीर्थमहिमा पापनाशादिकीर्त्तनम्।

मङ्गलादिकमाहात्म्यं ब्रह्मकुम्डादिवर्मनम्।।

हनूमत्कुण्डकहिमागस्त्यतीर्थभवं फलम्।

रामतीर्थादिकथनं लक्ष्मीतीर्थनिरूपणम्।।

शङ्खादितीर्थमहिमा तथासाध्यामृतादिजः।

धनुष्कोट्यादिमाहात्म्यं क्षीरकुण्जादिजं तथा।।

गायत्र्यादिकतीर्थानां माहात्म्यं चात्र कीर्त्तितम्।

रामनाथस्य महिमा तत्त्वज्ञानोपदेशनम्।।

यात्राविधानकथनं सोतै मुक्तिप्रदं नृणाम्।

धर्म्मारम्यस्य माहात्म्यं ततः परमुदीरितम्।।

स्थाणुः स्कन्दाय भगवान् यत्र कीर्त्तनम्।।

वर्णनामाश्रमाणाञ्च धर्म्मतत्त्वनिरूपणम्।

अप्सरातीर्थमुख्यानां माहात्म्यं यत्र कीर्त्तनम्।।

वर्मनामाश्रमाणाञ्च धर्म्मतत्त्वनिरूपणम्।

देवस्थानविभागञ्च वकुलार्ककथा शुभा।।

छत्रा नन्दा तथा शान्ता श्रीमाता च मतङ्गिनी।

पुम्यदात्र्यः समाख्याता यत्र देव्यः समास्थिताः।।

इन्द्रश्वरादिमाहात्म्यं द्वारकादिनिरूणम्।

लोहासुरसमाख्यानं गङ्गाकूपनिरूपणम्।।

श्रीरामचरितञ्चैव सत्यमन्दिरवर्णनम्।

जीर्णोद्धारस्य कथनं शासकप्रतिपादनम्।।

जातिभेदप्रकथनं स्मृतिधर्म्मनिरूपणम्।

ततत्सु वेष्मवा धर्म्मा नानाख्यानैरुदीरिताः।।

चातुर्म्मास्ये ततः पुण्ये सर्वधर्म्मनिरूपणम्।

दानप्रशंसा तत्पश्चाद् व्रतस्य महिमा ततः।।

तपसश्चैव पूजायाः सच्छिद्रकथनं ततः।

तद्धृत्तीनां भिदाख्यानं शालाग्रामनिरूपणम्।।

तारकस्य वधोपायो त्र्यत्रार्चा महिमा तथा।

विष्णोः शापश्च वृक्षत्वं पार्व्वत्यनुतपस्ततः।।

हरस्य ताण्डवं नृत्यं रामनामनिरूपणम्।

हरस्य लिङ्गपतनं तथा बैजवनस्य च।।

पारवतीजन्मचरितं तारकस्य वधोऽद्भुत-।

प्रणवैश्वर्यकथनं तारकाचरितं पुनः।।

दक्षयज्ञसमाप्तिश्च द्वादशाक्षरेः।।

श्रवमादिकपुण्यञ्च कीर्त्तिनं शर्म्मदं नृणाम्।

**तृतीयब्रह्मखण्डस्योत्तरभागे**

ततो ब्रह्मोत्तरे भागे शिवस्य महिमाद्भुतः।

पञ्चाक्षरस्य महिमा गोकर्णमहिमा ततः।।

शिवरात्रेश्च महिमा प्रदोषव्रतकीर्त्तनम्।

सोमवारव्रतञ्चापि सीमन्तिन्याः कथानकम्।।

भद्रायूत्पत्तिकथनं सदाचारनिरूपणम्।

शिववर्म्म समुद्देशो बद्रायूद्वाहवर्णनम्।।

भद्रायुमहिमा चापि भस्ममाहात्म्यकीर्त्तनम्।

शवराख्यानकञ्चैव उमामाहेश्वरव्रतम्।।

रुद्राक्षस्य च माहात्म्यं रुद्राध्यायस्य पुण्यकम्।

श्रवणादिपुण्यञ्च ब्रह्मखण्डोऽयमीरितः।।

(४) चतुर्थे काशीखम्डे

अतः परं चतुर्थन्तु काशीखण्डमनुत्तमम्।

विन्ध्यनारदयोर्यत्र सम्वादः परिकीर्त्तितः।।

सत्यलोकप्रभावश्चागस्तवासे सुरागमः।

पतिव्रताचरित्रञ्च तीर्थचर्य्याप्रशंसनम्।।

ततश्च सप्तपुर्याख्या संयमिन्या निरूपणम्।।

बुधस्य च तथेन्द्राग्न्योर्लोकाप्तिः शिवशर्म्मणः।

अग्नेः समुद्भवशचैव क्रव्याद्वरुणसम्भवः।

गन्धवत्यलकापुर्य्योरीश्वर्य्याश्च समुद्भवः।।

चन्द्रोडुबुधलोकानां कुजेज्यार्कबुवां क्रमात्।

सप्तर्षीणां ध्रुवस्यापि तपोलोकस्य वर्णनम्।
ध्रुवलोककथा पुण्या सत्यलोकनिरीक्षणम्।
स्कन्दागस्त्यसमालापो मणिकर्णीसमुद्भवः।।
प्रभावश्चापि गङ्गाया गङ्गानामसहस्रकम्।
वाराणसीप्रशंसा च भैरवाविर्भवस्ततः।।
दण्डपाणिज्ञानवाप्योरुद्भवः समनन्तरम्।
ततः कलावत्याख्यानं सदाचारनिरूपणम्।।
ब्रह्मचारिसमाख्यानं ततः स्त्रीलक्षणानि च।
कृत्याकृत्यविनिर्देशो ह्यविमुक्तेशवर्णनम्।।
गृहस्थयोगिनो धर्म्माः कालज्ञानं ततः परम्।
दिवोदासकथा पुण्या काशीवर्णनमेव च।।
योगिचर्य्या च लोलार्कोत्तरशाम्बर्कजा कथा।
द्रुपदार्कस्य ताक्ष्यार्ख्यारुणार्कस्योदयस्ततः।।
दशाश्वमेधतीर्थाख्या मन्दराच्च गणागमः।
मायागणपतेश्चाथ भुवि प्रादुर्भवस्ततः।।
विष्णुमायाप्रपञ्चोऽथ दिवोदासविमोक्षणम्।।
ततः पञ्चनदोत्पत्तिर्बिन्दुमाधवसम्भवः।
ततो वैष्णवतीर्थाख्या शूलिनः काशिकागमः।।
जैगीषव्येण सम्वादो ज्योष्ठे शाखा महेशितुः।

क्षेत्राख्यानं कन्दुकेशव्याघ्रेश्वरसमद्भवः।।

शैलेशरत्नेश्वरयोः कृत्तिवासस्य चोद्भवः।

देवतानामधिष्ठानं दुर्गासुरपराक्रमः।।

दुर्गायाविजयश्चाथ ओह्कारेशस्य वर्णनम्।

पुनरोङ्कारमाहात्म्यं त्रिलोचनसमुद्भवः।।

केदाराख्या च धर्म्मेशकथा विष्णुभुजोद्भवा।

वीरेश्वरसमाख्यानं गङ्गामाहात्म्यकीर्त्तनम्।।

विश्वकर्म्मेशमहिमा दक्षयज्ञोद्भवस्तथा।

सतीशस्यामृतेशादेर्भुजस्तम्बः पराशरे।।

क्षेत्रतीर्थकदम्बश्च मुक्तिमण्डपसत्कथा।

विश्वेशविभवश्चाथ ततो यात्रापरिक्रमः।।

**(५) पञ्चमे अवन्तीकण्डे**

अतः परं त्ववन्त्याख्यं शृणु खण्डञ्च पञ्चकम्।

महाकालवनाख्यानं ब्रह्मशीर्षच्छिदा ततः।।

प्रायश्चित्तविधिश्चाग्नेरुत्पत्तिश्च सुरागमः।

देवदीक्षा शिवस्तोत्रं नानापातकनाशानम्।।

कपालमोचनाख्यानं महाकालवनस्थितिः।

तीर्थं कलकलेशस्य सर्व्वपापप्रणाशनम्।।

कुम्डमप्सरसञ्ज्ञञ्च सरो रुद्रस्य पुण्यदम्।

कुडवेशश्च विद्याघ्नं मर्कटेश्वरतीर्थकम्।।

स्वर्गद्वारं चतुःसिन्धुतीर्थं शङ्करवापिका।

संकरार्कं गन्धवती तीर्थं च हरिसिद्धिदम्।

पिशाचकादियात्रा च हूमत्कवचेश्वरौ।।

महाकालेशायात्रा च वल्मीकेश्वरतीर्थकम्।

शक्रेशमेशोपाख्यानं कुशस्थल्याः प्रदक्षिणम्।।

अक्ररमन्दाकिन्यङ्कपादचन्द्रार्कवैभवम्।

करमेस कुक्कुटेश लकुटकेशादितीर्थकम्।

मार्कण्डेशं यज्ञवापी सोमेशं नरकान्तकम्।

केदारेश्वररामेशसौभाग्येशनरार्ककम्।।

केशार्कं सक्तिभेदश्च स्वर्मसारमुखानि च।

ओङ्कारेशादितीर्थानि अन्धकस्तुतिकीर्त्तनम्।

कालारण्ये लिङ्गसंख्या स्वर्णश्रृङ्गाबिधानकम्।।

कुशस्थल्या अवन्त्याश्चोज्जयिन्ता अभिधानकम्।।

पद्मावती कुमुद्वत्यमरावतीतिनामकम्।

विशाला प्रतिकल्पाभिधाने च ज्वरशान्तिकम्।।

शिवनामादिकफलं नागोद्गीता शिवस्तुतिः।

हिरण्याक्षवधाख्यानं तीर्थं सुन्दरकुण्डकम्।।

पुरुषोत्तमाधिमासं तत्तीर्थञ्चाघनासनम्।

गोमती वामनं कुम्डो वि,मोर्नामसहस्त्रकम्।
वीरेश्वरसरः कालभैरवस्य च तीर्थकम्।।
महिमा नागपञ्चम्यां नृसिंहस्य जयन्तिका।
कुडुवेश्वरयात्रा च देवसाधककीर्त्तनम्।
कर्कराजाख्यतीर्थञ्च विघ्नशादिसुरोहनम्।
रुद्रकुण्डप्रबृतिषु बहुतीर्थनिरूपणम्।।
यात्राष्टतीर्थजा पुण्या रेवामाहात्म्यमुच्यते।
धर्म्मपुत्रस्य वैराग्ये मार्कण्डेयेन सङ्गमः।।
प्राग्लयानुभवाक्यानं अमृता परिकीर्त्तिनम्।
कल्पे कल्पे पृथक् नाम नर्म्मदायाः प्रकीर्त्तितम्।।
स्तवमार्षं नार्मदञ्च कालरात्रकथा ततः।
महादेवस्तुतिः पश्चात् पृथक्कल्पकथाद्भुता।।
विशाल्याख्यानकं पश्चाज्जालेश्वरकथा तथा।
गौरीव्रतसमाख्यानं त्रिपुरज्वालनन्ततः।।
देहपातलिधानञ्च कावेरीसङ्गमस्ततः।
दारुतीर्थं ब्रह्मावतं यत्रेश्वरकथानकम्।।
अग्नितीर्थं रवितीर्थं मेघनादादिदारुकम्।
देवतीर्थं नर्म्मदेशं कपिलाख्यकरञ्जकम्।।
कुण्डलेशं पिप्पलादं विमलेशञ्च शूलभित्।

शचीहरणमाख्यानमन्धकस्य वधस्ततः।।

शूलभेदोद्भवो यत्र दानधर्म्माः पृथग्विधाः।।

आख्यानं दीर्घतपसऋष्यश्रृङ्गकथा ततः।

चित्रसेनकथा पुण्या काशिराजस्य मोक्षणम्।

ततो देवशिलाख्यानं शवरीचरिताचितम्।

व्याधाख्यानं ततः पुण्यं पुष्करिण्यर्कतीर्थकम्।

कुमारेशमगस्त्येसं च्यवनेशञ्च मातृजम्।।

लोकेशं धनदेशञ्च मङ्गलेशञ्च कामजम्।।

नागेशञ्चापि गोपारं गौतमं शङ्खचूडजम्।।

मारदेशं नन्दिकेशं वरुणश्वरतीर्थकम्।

दधिस्कन्दादितीर्थानि हनूमन्तेस्वरन्ततः।।

रामेश्वरादितीर्थानि सोमेशं पिङ्गलेश्वरम्।

ऋणमोक्षं कपिलेशं पूतिकेशं जलेशयम्।।

चण्डार्कयमतीर्थञ्च कल्होडीशञ्च नान्दिकम्।

नारायणञ्च कोटीशं व्यासतीर्थं प्रभासकम्।।

नागेशं सङ्कर्षणकं मन्मथेश्वरतीर्थकम्।

एरण्डीसङ्गमं पुण्यं सुवर्णशिलतीर्थकम्।।

करञ्जं कामहं तीर्थं भाण्डीरं रोहिणीबवम्।

चक्रतीर्थं धौतपापं स्कान्दमाङ्गिरसाह्वयम्।।

कोटितीर्थमयोन्याख्यमङ्गाराख्यं त्रिलोचनम्।

इन्द्रेश कम्बुकेशञ्च सोमेशं कोहनेशकम्।।

नार्म्मदं चार्कमाग्नेयं भार्गवेश्वरमुत्तमम्।

ब्राह्मं दैवं च भागेशमादिवाराहकेश्वरम्।।

रामेशमथ सिद्धेशमाहाम्त्यं कङ्कटेश्वरम्।

शाक्रं सौम्यञ्च नान्देशं तापेसं रुक्मिणीभवम्।।

योजनेशं वराहेशं द्वादशीशिवतीर्थकम्।

सिद्धेशं मङ्गलेशाञ्च लिङ्गवाराहतीर्थकम्।।

कुण्डेशं श्वेतवाराहं भार्गवेशं रवीश्वरम्।

शुक्लादीनि च तीर्थानि हँकारस्वामितीर्थकम्।।

सङ्गमेशं नारकेशं मोक्षं सार्पञ्च गोपकम्।

नागं साम्बञ्च सिद्धेशं मार्कण्डाक्रूरतीर्थके।।

कामोदशूलारोपाख्यो माण्डव्यं गोपकेश्वरम्।

कपिलेशं पिङ्गलेसं भूतेशं गांगगौतमे।।

आश्वमेदं भृगुकच्छं केदारेशञ्च पापनुत्।

कनकलेशं जालेशं शालग्रामं वराहकम्।।

चन्द्रप्रभासमादित्यं श्रीपत्याख्यञ्च हंसकम्।

मूलस्थानञ्च शलेशमाश्विनं चित्रदैवकम्।।

शिखीशं कोटितीर्थञ्च दशकन्यं सुवर्णकम्।

ऋणमोक्षं भारतभूतिरत्रास्ते पुंखमुण्डिमम्।।

आमलेशं कपालेशं श्रृङ्गैरण्डीबवन्ततः।

कोटितीर्थं लोटणेशं फलस्तुतिरतः परम्।।

कृमिजाङ्गलमाहात्म्ये रोहिताश्वकथा ततः।।

धुन्धुमारसमाख्यानं वधोपायस्चतोऽस्य च।

वधो धुन्धोस्ततः पश्चात् सतश्चित्रवहोद्भवः।।

महिमास्य ततश्चण्डीशप्रभावो रतीश्वरः।।

केदारेशो लक्षतीर्थं ततो विष्णुपदीभवम्।

मुखारं च्यवनान्धाख्यं ब्रह्मणश्च सरस्ततः।।

चक्राख्यं ललिताख्यानं तीर्थञ्च बहुगोमयम्।

रुद्रावर्त्तञ्च मार्कण्डं तीर्थं पापप्रणाशनम्।।

रावणेशं शुद्धपटं देवान्धुप्रेततीर्थकम्।

जिह्वोदतीर्थसम्भूतिः शिवोद्भेदं फलस्तुतिः।

एष खण्डो ह्यवन्त्याख्यः श्रृण्वतां पापनाशनः।

**(६)षष्ठे नागरखण्डे**

अतः परं नागराख्यः खण्डः षष्ठोऽभिधीयते।

लिङ्गोत्पत्तिसमाख्यानं हरिश्चन्द्रकथा शुभा।।

विश्वामित्रस्य माहात्म्यं त्रिशङ्कुस्वर्गतिस्तथा।

हाटकेश्वरमाहात्म्ये वृत्रासुरवधस्तथा।।

नागविलं शङ्खतीर्थमचलेश्वरवर्णनम्।

चमत्कारपुराख्यानं चमत्कारकरं परम्।

गयशीर्षं बालशाख्यं बालभाण्डं मृगाह्वयम्।।

विष्णुपादञ्च गोकर्णं युगरूपं समाश्रयः।

सिद्धेश्वरं नागसरः सप्तर्षेयं ह्यगस्तकम्।।

भ्रूमगर्तं सोमनाथञ्च दौर्वेरमर्ककम्।

शार्मिष्ठं सोमनाथाञ्च दौर्गमानर्तकेश्वरम्।।

जामदग्निवधाख्यानं लैःक्षत्रियकथानकम्।

रामह्रदं नागपुरं जडलिङ्गञ्च यज्ञभूः।।

मुण्डारादि त्रिकार्कञ्च सतीपरिणयस्तथा।

बालखिल्यञ्च यागेशं  बालखिल्यञ्च गारुडम्।।

लक्ष्मीशापः साप्तविंशं सोमप्रासादेमेव च।

गोमुखं लोहयष्ट्याख्यमाग्नेयं ब्रह्मकुण्डकम्।।

शनैश्चरं राजवापी रामेशो लक्ष्मणेश्वरः।

कुशेशाख्यं लवेषाख्यानं लिङ्गं सर्वोत्तमम्।।

अष्टषष्ठिसमाख्यानं दमयन्त्यास्त्रजातकम्।

ततोऽम्बारेवती चात्र भट्टिकातीर्थसम्भवम्।।

क्षेमङ्करी च केदारं शुक्लतीर्थं मुखारकम्।

सत्यसन्नेश्वराख्यानं तथा कर्णोत्पला कथा।।

अटेश्वरं याज्ञवल्क्यं गौर्य्यं गाणेशमेव च।

ततो वास्तुपदाख्यानमजागृहकथानकम्।।

सौभाग्यान्धकशूलेशं धर्म्मराजकथानकम्।।

मिष्टान्नदेश्वराख्यानं गाणपत्यत्रयं ततः।

जाबालिचरितञ्चैव मकरेशकथा ततः।।

कालेश्वर्यन्धकाख्यानं कुण्डमाप्सरसन्तथा।

पुष्यादित्यं रौहिताश्वं नागरोत्पत्तिकीर्त्तनम्।।

भार्गवं चरितं चैव वैश्वामैत्रं ततः परम्।।

सारस्वतं पैप्पलादं कंसारीशञ्च पैण्डिकम्।

ब्रह्मणो यज्ञचरितं सावित्र्याख्यानसंयुतम्।।

रैवतं भर्तृयज्ञाख्यां मुख्यतीर्थनिरीक्षणम्।

कौरवं हाटकेशाख्यां प्रभासं क्षेत्रकत्रयम्।।

पौष्करं नैमिषं धार्म्ममरण्यत्रितयं स्मृतम्।

वाराणसीद्वारकाख्यावन्त्याख्येति पुरीत्रयम्।।

वृन्दावनं खाण्डवाख्यं मद्रैकाख्यं वनत्रयम्।

कल्पः शालस्तथा नन्दो ग्रामत्रयमनुत्तमम्।।

असिशुक्लपितृसञ्ज्ञं तीर्थत्रयमुदाहृतम्।

त्र्यर्बवदौ रैवतश्चैव पर्व्वतत्रयमुत्तमम्।।

नदीनां त्रितयं गङ्गा नर्मदा च सरस्वती।।

सार्द्धकोटित्रयफलमेकैकञ्चाषु कीर्त्तितम्।

कूपिका शङ्खतीर्थञ्चामरकं बालमण्डनम्।

हाटकेशक्षेत्रफलप्रदं प्रोक्तं चतुष्टयम्।।

शाम्बादित्यं श्राद्धकल्पं यौधिष्ठिरमथान्धकम्।

जलशायि चतुर्म्मास्यमशून्यशयनव्रतम्।।

मङ्कणेशं शिवरात्रिस्तुलापुरुषदानकम्।

पृथ्वीदानं वाणकेशं कपालमोचनेश्वरम्।।

पापपिण्डं साप्तलैङ्गं युगमानादिकीर्त्तनम्।।

निम्वेशशाकम्भर्याख्यं रुद्रैकादित्यकीर्त्तनम्।

दानमाहात्म्यकथनं द्वादशादित्यकीर्त्तनम्।

इत्येष नागरः खण्डः प्रभासाख्योऽधुनोच्यते।।

**(७) सप्तमे प्रभासखण्डे**

सोमेशो यत्र विश्वेशोऽर्कस्थलं पुण्यदं महत्।

सिद्धेश्वरादिकाख्यानं पृथगत्र प्रकीर्त्तितम्।।

अग्नितीर्थं कपर्द्दीशं केदारेशं गतिप्रदम्।

भीमभैरवचण्डीशभास्कराङ्गारकेश्वराः।।

बुधेज्यभृगुसौरेन्द्रशिखीशा हरविग्रहाः।

सिद्धेश्वराद्याः पञ्चान्ये रुद्रास्तत्र व्यवस्थिताः।

वरारोहा ह्यजापाला मंगला ललितेश्वरी।।

लक्ष्मीशो वाडवेशश्चाधीशः कामेश्वरस्तथा।

गौरीशवरुणेशाख्यां दुर्वासेशं गणेश्वरम्।

कुमारेशञ्च शाकल्यं शकुलोत्तङ्कगौतमम्।।

दैत्यघ्नेशं चक्रतार्थं सन्निहत्याव्ययन्तथा।

भूतशादीनि लिङ्गानि  आदिनारायणाह्वयम्।।

ततश्चक्रधराख्यानं शाम्बादित्यकथानकम्।

कथा कम्टकशोदिन्या महिषघ्न्यास्ततः परम्।।

कपालीश्वरकोटीशबालब्रह्माह्वसत् कथा।

नरकेशसम्वर्त्तेशनिधीश्वरकथा ततः।।

बलभद्रेश्वरस्याथ गंगाया गणपस्य च।

जाम्बवत्याखघ्यसरितः पाण्डुकूपस्य सत्कथा।।

शतमेधलक्षमेधकोटिमेधकथा तथा।

दुर्व्वासार्कघटस्थानं हिण्र्यासंगमोत्कथा।।

नगरार्कस्य कृष्णस्य सह्कर्शणसमुद्रयोः।

कुमार्य्याः क्षेत्रपालस्य ब्रह्मेशस्य कथा पृथक्।।

पिंगला संगमेशस्य शंकरार्कघटेशयोः।

ऋषितीर्थस्य नन्दार्कत्रिकूपस्य कीर्त्तनम्।।

शशीपानस्य वर्णार्कन्यङ्कुमत्योः कथाद्भुता।

वाराहस्वामिवृत्तान्तं छायालिंगाख्यगुल्फयोः।।

कथा कनकनन्दायाः कुन्तीगंगेशयोस्तथा।।

चमसोद्भेदविदुरत्रिलोकेशकथा ततः।

सूर्यप्राचीवीक्षणयोरुमानाथकथा तथा।

भूद्धारशूलस्थलयोश्च्यवनार्केशयोस्तथा।।

अजापालेशबालार्ककुवेरस्थलजा कथा।

ऋषितोया कथा पुण्या संगालेश्वरकीर्त्तनम्।।

नारदादित्यकथनं नारायणनिरूपणम्।

तप्तकुण्डस्य माहात्म्यं मूलचण्डीशवर्णनम्।

चतुर्वक्रगणाध्यक्षकलम्बेश्वरयोः कथा।

गोपालस्वामिवकुलस्वामिनोर्मरुतां कथा।।

क्षेमार्कोन्नतविघ्नेशजलस्वामिनोर्मरुतां कथा तथा।

कालमेघस्य रुक्मिण्या ऊर्वशीश्वरभद्रयोः।।

शङ्खावर्तमोक्षतीर्थं गोष्पदाच्युतसद्मनाम्।

जालेश्वरस्य हबङ्कारकबपचण्डीशयोः कथा।।

आशापुरस्थविघ्नेशकलाकुण्डकथाऽद्भुता।

कपिलेशस्य च कथा जरद्गवशिवस्य च।

नलकर्कोटकेश्वरयोर्हाटकेश्वरजा कथा।।

नारदेशमन्त्रभूषा दुर्गकटूगणेशजा।

सुपर्णेलाख्यभैरव्योर्मल्लतीर्थभवा कथा।।

कीर्त्तनं कर्दमालस्य गुप्तसोमेश्वरस्य च।

बहुस्वर्णेशशृंगेशकोटीश्वरकथा ततः।।

मार्कण्डेश्वरकोटीशदामोदरगृहोत्कथा।

स्वर्णरेखा ब्रह्मकुण्डं कुन्तीभीमेश्वरौ तथा।।

मृगोकुण्डञ्च सर्वस्वं क्षेत्रे वस्त्रापथे स्मृतम्।

दुर्गाविल्वेशगंगेशरैवतानां कथाऽद्भुता।।

ततोऽर्व्वुदेश्वरकथा अचलेश्वरकीर्त्तनम्।

नागतीर्थस्य च कथा वशिष्ठाश्रमवर्णनम्।।

भद्रंकर्णस्य माहात्म्यं त्रिनेत्रस्य ततः परम्।

केदारस्य च माहात्म्यं तीर्थागमनकीर्त्तनम्।।

कोटीश्वररूपतीर्थहृषीकेशकथा ततः।

सिद्धेशशुक्रेश्वरयोर्मणिकर्णीशकीर्त्तनम्।।

पुंगुतीर्थ-यमतीर्थ-वाराहतीर्थवर्णनम्।

चन्द्रप्रभासपिण्डोदक्षीमाता शुक्लतीर्थजम्।।

कात्यायन्याश्च माहात्म्यं ततः पिण्डारकस्य च।

ततः कनखलस्याथ चक्रमानुषतीर्थयोः।।

कपिलाग्नितीर्थकथा तथा रक्तानुबन्धजा।

गणेशपार्थेश्वरयोर्यात्राया मुद्गलस्य च।।

चण्डीस्थानं नागोद्भवशिरः कुण्डमहेशजा।

कामेश्वरस्य मार्कण्डेयोत्पत्तेश्च कथा ततः।।

उद्दालकेशसिद्धेशगततीर्थकथापृथक्।

श्रीद्वमातोत्पत्तिश्च व्यासगौतमीर्थयोः।।

कुलसन्तारमाहात्म्यरामकोट्याव्हतीर्थयोः।

चन्द्रोद्भेदेशानश्रृङ्गब्रह्मस्थानोद्भवोहनम्।।

त्रिपुष्कर-रुद्रहृद-गुहेश्वर-कथा शुभा।

अविमुक्तस्य माहात्म्यमुमाहेश्वरस्य च।।

महौजसः प्रभावश्च जम्बुतीर्थस्य वर्णनम्।

गङ्गाधरमिश्रकयोः कथा चाथ फलश्रुतिः।।

द्वारकायाश्च माहात्म्यं चन्द्रशर्म्मकथानकम्।

जागराद्याख्यव्रतञ्च व्रतमेकादशीभवम्।।

महाद्वादशीकाख्यानं प्रह्लादर्षिसमागमः।

दुर्व्वासस उपाख्यानं यात्रोपक्रमकीर्त्तनम्।।

गोमत्युत्पत्तिकथनं तस्यां स्नानादिजं फलम्।

चक्रतीर्थस्य माहात्म्यं गोमत्युदधिसङ्गमः।।

सनकादिह्रदाख्यानं नृगतीर्थकथा ततः।

गोप्रचारकथा पुण्या गोपीनां द्वारकागमः।।

गोपीसरः समाख्यानं ब्रह्मतीर्थादिकीर्त्तनम्।

पञ्चनद्यागमाख्यानं नानाख्यानसमन्वितम्।।

शिवलिङ्गमहातीर्थकृष्णपूजादिकीर्त्तनम्।

त्रिविक्रमस्य मूर्त्याख्या दुर्वासः कृष्णसंकथा।।

कुसदैत्यवधोऽर्चाख्या विशेषार्चनजम्फलम्।

गोमत्यां द्वारकायाञ्च तीर्थागमनकीर्त्तनम्।।

कृष्णमन्दिरसंप्रेक्षा द्वारवत्यभिषेचनम्।

तत्र तीर्थावासकथा द्वारका पुण्यकीर्त्तनम्।।

इत्येष सप्तमः प्रोक्तः खण्डः प्रभासिको द्विजः।

स्कान्दे सर्वोत्तरकथे शिवमाहात्म्यवर्णने।।

**एतस्य श्रवणादिफलम्**

लिखित्वैतत्तु यो दद्याद्धेमशूलसमाचितम्।

माघ्यां सत्कृत्य विप्राय स शैवे मीदते पदे।।

## १४-वामनपुराणम्

वामनपुराणे द्वौ भागौ स्तः, पूर्वभागे उत्तरभागश्च, नारदीयपुराणानुसारम् उत्तरभागस्य वृहद्वामनमपि नमास्ति। अत्र चतस्रः संहिताः सन्ति। (१)माहेश्वरी (२)भागवती (३)सौरी (४)गाणेश्वरी च। अत्र ९५ अध्यायाः सन्ति। एतत् दशसहस्र (१००००)संख्याकमस्ति। एतत्परिचयः वर्तते-

त्रिविक्रमस्य माहात्म्यमधिकृत्य चतुर्मुखः।

त्रिवर्गमब्रवीत्तच्च वामनं परिकीर्तितम्।।

पुराणं दशसाहस्रं कूर्मकल्पानुगं शिवम्। (मत्स्यपुराणे ५६ अध्यायः)

ब्रह्मोवाच।

श्रृणु वत्स ! प्रवक्ष्यामि पुराणं वामनाभिधम्।

त्रिविक्रमचरित्राढ्यं दशसाहस्रसंख्यकम्।।

कूर्म्मकल्पसमाख्यानं वर्गत्रयकथानकम्।

भागद्वयसमाख्यानं वक्तृश्रोतृशुभावहम्।।

(नारदीयपुराणे १०५ अध्यायः)

**(१)तत्र पूर्भागे**

पुराणप्रश्नः प्रथमं ब्रह्मशीर्षच्छिदा ततः।

कपालमोचनाख्यानं दक्षयज्ञविर्हिसनम्।।

हरस्य कालरूपाख्या कामस्य दहनन्ततः।

प्रह्लादनारायणोर्युद्धं देवासुराह्वयम्।।

सुकेश्यर्कसमाख्यानं श्रीदुर्गाचरितं ततः।

तपतीचरितं पश्चात्कुरुक्षेत्रस्य वर्णनम्।।

सरो माहात्म्यमतुलं पार्वतीजन्मकार्त्तनम्।

तपस्यास्य विवाहश्च गौर्य्युपाख्यानकन्ततः।

ततः कौशिक्युपाख्यानं कुमारचरितं ततः।।

ततोऽन्धकवधाख्यानं साध्योपाख्यानकन्ततः।

जाबालिचरितं पश्चादरजायाः कथाद्भुता।।

अन्धकेश्वरयोर्युद्धं गणत्वं चान्धकस्य च।

मरुतां जन्म कथनं बलेश्च चरितं ततः।।

ततस्तु लक्ष्म्याश्चरितं त्रैविक्रममतः परम्।

प्रह्लादतीर्थयात्रायां प्रोच्यन्ते तत्कथाः शुभाः।।

ततश्च धुन्धुचरितं प्रेतोपाख्यानकं ततः।

त्रिविक्रमचरित्रान्ते ब्रह्मप्रोक्तः स्तवोत्तमः।।

प्रह्लादवलिसंवादे सुतले हरिशंसनम्।

इत्येष पूर्वभागोऽस्य पुराणस्य तवोदितः।।

**(२) तदुत्तरभागे च**

श्रृणु तस्योत्तरं भागं बृहद्वामनसञ्ज्ञकम्।

माहेश्वरी भगवती सौरी गाणेश्वरी तथा।।

चतस्रः संहिताश्चात्र पृथक् साहस्रसंख्यया।

माहेश्वर्यान्तु कृष्णस्य तद्भक्तानाञ्च कीर्त्तनम्।।

भागवत्यां जगन्मातुरवतारकथाद्भुता।

सौर्य्यां सूर्यस्य महिमा गदितः पापनाशनः।।

गणेश्वर्य्यां गणेशस्य चरितश्च महेशितुः।

इत्येतद् वामनं नाम पुराणं सुविचित्रकम्।।

पुलस्त्येन समाख्यानं नारदाय महात्मने।

ततो नारदतः प्राप्तं व्यासेन सुमहात्मना।।

व्यासात्तु लब्धवान् वत्स ! तच्छिष्यो रोमहर्षणः।

स चाख्यास्यति विप्रेभ्यो नैमिषीयेभ्य एव च।।

एवं परम्पराप्राप्तं पुराणं वामनं शुभम्।

**एतच्छ्रवणफलमितिकर्तव्यतानिर्देशो यथा**

ये पठन्ति च श्रृण्वन्ति तेऽपि यान्ति परां गतिम्।

लिखित्वैतत्पुराणन्तु यः शरद्विषुवेऽर्पयेत्।।

विप्राय वेदविदुषे घृतधेनुसमाचितम्।

स समद्धृत्य नरकान्नयेत्स्वर्गं पितृन् स्वकान्।

देहान्ते भुक्तभोगोऽसौ याति विष्णोः परम्पदम्।।

## १५-कूर्मपुराणम्

कूर्मपुराणेऽपि भागद्वयं विद्यते, पूर्वभाग उत्तरभागश्च। तत्रोत्तरे भागे चतस्रः संहिताः सन्ति (१) ब्राह्मीसंहिता (२) भागवतीसंहिता (३) सौरीसंहिता (४) वैष्णवसंहिता च। तत्रापि भागवतीसंहितायां पञ्च पादाः सन्ति। अत्र पूवभागे ५३, उत्तरे च ४६ संकलनया ९९ अध्यायाः सन्ति। एतच्च नारदीयपुराणानुसारं सप्तदशसहस्र (१७०००) संख्याकमस्ति मत्स्यपुराणानुसारं च अष्टादश (१८०००) सहस्रात्मकमस्ति। एतत्परिचयश्चैवं विद्यते-

यत्र धर्म्मार्थकामानं मोक्षस्य च रसातले।

माहात्म्यं कथयामास कूर्मरूपो जनार्दनः।।

इन्द्रद्युम्नप्रसङ्गेन ऋषिभ्यः शुक्रसन्निधौ।

अष्टादशसहस्राणि लक्ष्मीकल्नुषङ्गिकम्।। (मत्स्यपुराणे ५३ अध्यायः)

ब्रह्मोवाच-

श्रृणु वत्स ! मरीचेऽद्य पुराणं कूर्म्मसंज्ञितम्।

लक्ष्मीकलपानुचरितं यत्र कूर्म्मवपुर्हरिः।।

धर्म्मार्थकाममोक्षाणां माहात्म्यञ्च पृथक् पृथक्।

इन्द्रद्युम्नप्रसंगेन प्राहर्षिभ्यो दयाधिकम्।।

तत्सप्तदशसाहस्रं सचतुःसंहितं शुभम्।

नानाकथाप्रसंगेन नृणां सद्गतिदायकम्।।

(नारदीयपुराणे १०६ अध्यायः)

**(१) तत्र पूर्वभागे**

तत्र पूर्वविभागे तु पुराणक्रमः पुरा।

लक्ष्मीप्रद्युम्नसम्वादः कूर्मर्षिगणसङ्कथा।।

वर्णाश्रमाचारकथा जगदुत्पत्तिकीर्त्तनम्।

कालसंख्या समासेन लयान्ते स्तवनं विभोः।।

ततः सङ्क्षेपेतः सर्गः शाङ्करं चरितं तथा।

सहस्रनाम पार्वत्या योगस्य च निरूपणम्।।

भृगुवशसमाख्यानं ततः स्वायम्भुवस्य च।

देवादीनां समुत्पत्तिर्दक्षयज्ञाहतिस्ततः।।

दक्षसृष्टिकथा पश्चात् कश्यपान्वयकीर्त्तनम्।

आत्रेयवंशकथनं कृष्माय चरितं शुभम्।।

मार्कण्डकृष्मसंवादो व्यासपाण्डवसंकथा।

युगधर्म्मानुकथनं व्यासपाण्डवसंकथा।

वाराणस्याश्च माहात्म्यं प्रयागस्य ततः परम्।

त्रैलोक्यवर्णनञ्चैव वेदशाख्यानिरूपणम्।।

**(२)उत्तरभागे च**

उत्तरेऽस्य विभागे तु पुरा गातेश्वरी ततः।

व्यासगीता ततः प्रोक्ता नानधर्म्मप्रबोधिनी।।

नानाविधानं तीर्थानां माहात्म्यञ्च पृथक् ततः।

नानाधर्मप्रकथनं ब्राह्मीयं संहिता स्मृता।।

अतः परं भगवती संहितार्थनिरूपणे।

कथिता यत्र वर्णानां पृथग्वृत्तिरुदाहृता।।

पादेऽस्याः प्रथमे प्रोक्ता ब्राह्मणानां व्यवस्थितिः।

सदाचारात्मिका वत्स ! भोगसौख्यविवर्द्धिनी।।

द्वितीये क्षत्रियाणान्तु वृत्तिः सम्यक्प्रकार्तिता।

यया त्वाश्रितया पापं विधूयेब ब्रजेद्दिवम्।।

तृतीये वैश्यजातीनां वृत्तिरुक्ता चतुर्विधा।

यया चरितया सम्यक् लभते गतिमुत्तमाम्।।

चतुर्थेऽस्यास्तथा पादे शूद्रवृत्तिरुदाहृता।

यया सन्तुष्यति श्रीशो नृमां श्रेयो विवर्द्धनः।।

पञ्चमेऽस्यास्ततः पादे वृत्तिः सङ्करजन्मनाम।

यया चरिताऽऽप्नोति भाविनीमुत्तमां जनिम्।।

इत्येषा पञ्चपाद्युक्ता द्वितीया संहिता मुने।

तृतीयात्रोदिता सौरी नृणां कामविधायिनी।।

षोढा षट्कर्मसिद्धिं सा बोधयन्ती च कामिनाम्।

चतुर्थी वैष्णवी नाम मोक्षदा परिकीर्तिता।।

चतुष्पदी द्विजादीनां साक्षाद् ब्रह्मस्वरूपिणी।

ताः क्रमात् षट्चतुर्द्वीषु साहस्राः परिकीर्तिताः।।

**श्रवणादिफलमितिकर्तव्यतानिर्देशो यथा**

एतत्कूर्मपुराणन्तु चतुर्वर्गफलप्रदम्।

पठतां शृण्वतां नृणां सर्वोत्कृष्टगतिप्रदम्।।

लिखित्वैतत्तु यो भक्त्या हेमकूर्मसमन्वितम्।

ब्राह्मणायायेन दद्यात् स याति परमां गतिम्।।

## १६-मत्स्यपुराणम्

मत्स्यपुराणे २९० अध्यायाः सन्ति। एतच्च मत्स्यनारदीयपुराणानुसारं चतुर्दशसहस्र (१४०००) संख्याकमस्ति। एतत्परिचयश्चैव विद्यते-

श्रुतीनां यत्र कल्पादौ प्रवृत्त्यर्थं जनार्दनः।
मत्स्यरूपेण मनवे नरसिंहोपवर्णनम्।।
अधिकृत्याऽब्रवीत् सप्तकल्पवृत्तं मुनीश्वराः।
तन्मात्स्यमिति जानीध्यवं सहस्राणि चतुर्दश।। (मत्स्यपुराणे ५३ अध्यायः)

सूत वाच-

एतद्वः कथितं सर्वं यदुक्तं विश्वरूपिणा।
मात्स्यं पुराणखिलं धर्मकामार्थसाधनम्।। (नारदीयपुराणे १०७ अध्यायः)

यत्रादौ मनुसम्वादो ब्रह्माण्डकथनन्तथा।
सांख्यं शारीरकम्प्रोकत् चतुर्मुखमुखोद्भवम्।।
देवासुराणामुत्पत्तिर्मारुतोत्पत्तिरेव च।
मदनद्वादशीतद्वल्लोकपालाभिपूजनम् ।।
मन्वन्तराणामुद्देशो वैन्यराजाभिवर्णनम्।।
सूर्याद्वैवस्वतोत्पत्तिर्बुधस्यागमनन्तथा।।

पितृवंशानुकथनं श्राद्धकालस्तथैव च।

पितृतीर्थप्रवासश्च सोमोत्पत्तिस्तथैव च।।

कीर्त्तनं सोमवंशस्य ययातिचरितं तथा।

कार्त्तवीर्यस्य माहात्म्यं वृष्टिवंशानुकीर्त्तनम्।।

भृगुशापस्तथा विष्णोर्दैत्यशापस्तथैव च।

कीर्त्तनं पुरुषशस्य वंशो दौताशनस्तथा।।

पुराणकीर्त्तनं तद्वत् क्रियायोगस्तथैव च।

व्रतं नक्षत्रसंख्याकं मार्कण्डेशयनं तथा।।

कृष्णाष्टमीव्रतं तद्वद्रोहिणीचन्द्रसंज्ञितम्।

तडागविधिमाहात्म्यं पादपोत्सर्ग एव च।।

सौभाग्यशयनं तद्वदगस्त्यव्रतमेव च।

तथानन्दतृतीया तु रसकल्याणिनी तथा।।

आर्द्रनन्दकरी तद्वद् व्रतं सारस्वतं पुनः।

उपरागाभिषेकश्च सप्तमीस्नपनं पुनः।।

भीमाख्या द्वादी तद्वदनङ्गशयनं तथा।।

अशून्यशयनं तद्वत्तथैवाङ्गारकव्रतम्।

सप्तमीसप्तकं तद्वद्विशोकद्वादशी तथा।

मेरुप्रदानं दशधा ग्रहशान्तिस्तथैव च।

ग्रहस्वरूपकथनं तथा शिवचतुर्दशी।।

तथा सर्वफलत्यागः सूर्यवारव्रतं तथा।

संक्रान्तिस्नपनं तद्वद्विभूतिद्वादशीव्रतम्।।

षष्ठीव्रतीनां माहात्म्यं तथा स्नानविधिक्रमः।

प्रयागस्य तु माहात्म्यं सर्वतीर्थानुकीर्त्तनम्।।

पैलाश्रमफलं तद्वद् द्वीपलोकानुकीर्त्तनम्।

तथान्तरिक्षचारश्च ध्रुवमाहात्म्यमेव च।

भवनानि सुरेन्द्राणां त्रिपुरायोधनं तथा।।

पितृपिण्डमाहात्म्यं मन्वन्तरविनिर्मयः।

वज्राङ्गस्य तु सम्भूतिः ब्रह्मदेवानुकीर्तनम्।

पार्वतीसम्भवस्तद्वत् तथा शिवतपोवनम्।।

अनङ्गदेहदाहस्तु रतिशोकस्तथैव च।

गौरीतपोवनं तद्वद्विश्वनाथप्रसादनम्।।

पार्वतऋषिसम्वादस्तथैवोद्वाहमङ्गलम्।

कुमारसम्भवस्तद्वत् कुमारविजयस्तथा।।

तारकस्य वधोघोरो नरसिंहोपवर्णनम्।

वाराणस्यास्तु माहात्म्यं नर्मदायास्तथैव च।

प्रवरानुक्रमस्तद्वत् पितृनाथानुकीर्त्तनम्।।

ततोभयमुखीदानं दानं कृष्णाजिनस्य च।

तथा सावित्र्युपुरव्यानं राजधर्मास्तथैव च।।

यात्रानिमित्तकथनं स्वप्नमाङ्गल्यकीर्त्तनम्।

वामनस्य तु माहात्म्यं तथैवादिवराहकम्।।

क्षीरोदमथनं तद्वत्कालकूटाबिसासनम्।

प्रासादलक्षणन्तद्वन्मण्डपानान्तु लक्षणम्।।

पुरुवंशे तु सम्प्रोक्तं भविष्यद्राजवर्णनम्।

तुलादानादि बहुशो महादानानुकीर्त्तनम्।।

कल्पानुकीर्त्तनं तद्वद्ग्रन्थानुक्रमणी तथा।

**एतन्महत्वं पठनादिफलं यया-**

एतत्पवित्रमायुष्यमेतत्कीर्तिविवर्धनम्।

एतत्पवित्रं कल्याणं महापापहरं शुभम्।।

अस्मात् पुराणादपि पादमेकं पठेत्तुः यः सोऽपि विमुक्तपापः।

नारायणाख्यं पदमेति नूनमनङ्गवद्दिव्यसुखानि भुङ्क्ते।।

## १७-गरुडपुराणम्

गरुडपुराणे खण्डद्वयं विद्यते, पूर्वखण्डे उत्तरखण्डश्च। तत्रोत्तरखण्डस्य प्रेतकल्प इत्यपि नामस्ति। यत्र शरीरत्यागानन्तरं परलोकगामिनां जीवानां विवरणं सविस्तरं प्रतिपादितमस्ति। अत्र क्रमशः २४०, ७८ संकलनया ३१८ अध्यायाः सन्ति। एतच्च नारदीयपुराणानुसारं एकोनविंशतिसहस्त्र (१९०००) संख्याकमस्ति। परं मत्स्यपुराणानुसारञ्चाष्टादशसहस्त्र (१८०००) संख्याकमस्ति। एतत्परिचयश्चावं वर्तते-

यदा च गरुडे कल्पे विश्वाण्डाद् गरुडोद्भवम्।

अधिकृत्याह्ववीद् विष्णुर्गारुडं तदिहोच्यते।।

तदष्टादशकं चैव सहस्राणीह कथ्यते। (मत्स्यपुराणे ५३ अधअयायः)

ब्रह्मोवाच-

मरीचे ! शृणु वक्ष्यामि पुराणं गारुडं शुभम्।

गरुडायाब्रवीत्पुष्टो भगवान्गरुडासनः।।

एकोनविंशसाहस्त्रं तार्क्ष्यकल्पकथान्वितम्।।

(नारदीयपुराणे १०८ अध्यायः)

(१) पूर्वखण्डे

पुराणोपक्रमो यत्र सर्गः संक्षेपतस्ततः।

सूर्यादिपूजनविधिर्दीक्षाविधिरतः परम्।

ध्यादिपूजा ततः पश्चान्नवव्यूहार्चनं द्विजः ! ।

पूजाविधानञ्च तया वै,णवं पञ्चरन्ततः।।

योगाध्यायस्ततौ विष्णोर्नामसाहस्रकीर्त्तनम्।

ध्यानं विष्णोस्ततः सूर्यपूजामृत्युञ्जयार्चनम्।।

माला मंत्राः शिवार्चाथ गणपूजा ततः परम्।

गोपालपूजा त्रैलोक्यमोहनं श्रीधरार्च्चनम्।।

विष्णवर्चा पञ्चतत्त्वार्चा चक्रार्चा देवपूजनम्।

न्यासादिसन्ध्योपास्तिञ्च दुर्गार्चाथ सुरार्चनम्।।

पूजा माहेश्वरी चातः पवित्रारोपणार्चनम्।

मूर्तिध्यानं वास्तुमानं प्रासादानाञ्च लक्षणम्।।

प्रतिष्ठा सर्वदेवानां पृथक् पूजाविधानतः।

योगोऽष्टाङ्गो दानधर्मः प्रायश्चित्तविधिक्रिया।।

द्वीपेशनरकाख्यानं सूर्य्यव्यूश्च ज्योत्षम्।

सामुद्रिकं स्वरज्ञानं नवरत्नपरीक्षणम्।।

माहात्म्यमथ तीर्थानां गयामाहात्म्यमुत्तमम्।

ततो मन्वन्तराख्यानं पृथक्पृथग्विभागशः।।

पित्राख्यानं वर्णधर्मा द्रव्यशुद्धिः समर्पणम्।

श्राद्धं विनायकस्यार्चा ग्रहयज्ञस्तथाऽऽश्रमाः।।

जननाख्यं प्रेतशौचं नीतिशास्त्रं व्रतोक्तयः।

सूर्यवंशः सोमवंशोऽवतारकथनं हरेः।।

रामायणं हरिवंशो भारताख्यानकन्ततः।

आयुर्वेदे निदानं प्राक् चिकित्साद्रव्यजा गुणाः।।

रोगघ्नं कवचं विष्णोर्गारुडंस्त्रेपुरो मनुः।

प्रश्नचूडामणिश्चान्ते हयायुर्वेदकीर्त्तनम्।।

औषधीनामकथनं ततो व्याकरणोहनम्।

छन्दःशास्त्रं सदाचारस्ततः स्नानविधिः स्मृतः।

तर्पणं वैश्वदेवञ्च सन्ध्यापार्वणकर्म च।

नित्यश्राद्धं सपिण्डाख्यं मर्मसारोऽघनिष्कृतिः।

प्रतिसङ्क्रम उक्तोऽस्माद् युगधर्माः कृतेः फलम्।
योगशास्त्रं विष्णुभक्तिर्नमस्कृतिफलं हरेः।।
माहात्म्यं वैष्णवञ्चाथ नारसिंहस्तवोत्तमम्।
ज्ञानामृतं गुह्याष्टकं स्तोत्रं विष्णर्च्चनाह्वयम्।।
वेदान्तसांख्यसिद्धान्तं ब्रह्मज्ञानात्मकं तथा।
गीतासारः फलोत्कीर्त्तिः पूर्वकण्डोऽयमीरितः।।

(२)उत्तरखण्डे च

अथास्यैवोत्तरे खण्डे प्रेतकल्पः पुरोदितः।
यत्र तार्क्ष्येण संस्पृष्टो भगवानाह वाडवः।।
धर्मप्रकटनं पूर्वं योनीनां गतिकारणम्।
दानादिकं फलञ्चापि प्रोक्तमत्रौर्ध्वदैहिकम्।।
यमलोकस्य मार्गस्य वर्णनञ्च ततः परम्।
षोडशश्राद्धफलकं वृत्तानाञ्चात्र वर्णितम्।।
निष्कृषतिर्यममार्गस्य धर्मराजस्य वैभवम्।
प्रेतपीडा विनिर्देशः प्रेतचिह्ननिरूपणम्।।
प्रेतानां चरिताख्यानं कारणं प्रेततां प्रति।
प्रेतकृत्यविचारश्च सपिण्डीकरणोक्तयः।।
प्रेतत्वमोक्षणाख्यानं दानानि च विमुक्तये।
आवश्यकोत्तरं दानं प्रेतसौख्यकरं हितम्।।

शारीरकविनिर्द्देशो यमलोकस्यवहर्णनम्।

प्रेतत्वोद्धारकथनं कर्मकर्तृविनिर्णयः।

मृत्योः पूर्वक्रियाख्यानं पश्चात्कर्मनिरूपणम्।।

मध्यषोडशकं श्राद्धं स्वर्गप्राप्तिक्रियोहनम्।

सीतकस्याथ संख्यानं नारायणबलिक्रिया।।

वृषोत्सर्गस्य माहात्म्यं निषिद्धपरिवर्जनम्।

अपमृत्युक्रियोक्तिश्च विपाकः कर्मणा नृणाम्।।

कृत्याकृत्यविचारश्च विष्णुध्यानं विमुक्तये।।

स्वर्गतो विहिताख्यानं स्वर्गसौख्यनिरूपणम्।

भूर्लोकवर्णनञ्चैव सप्तधा लोकवर्णनम्।।

पञ्चोर्ध्वलोककथनं ब्रह्माण्डस्थितिकीर्त्तनम्।

ब्रह्माण्डनेकचरितं ब्रह्मजीवनिरूपणम्।।

आत्यनित्कलयाख्यानं फलस्तुतिनिरूपणम्।

इत्येतद् गारुडं नाम पुराणं भुक्तिमुक्तिदम्।।

**श्रवणादिफलमितिकर्तव्यतानिर्देशश्च**

कीर्तितं पापशमनं पठतां श्रृण्वतां नृणाम्।

लिखित्वैतत्पुराणन्तु विषुवे यः प्रयच्छति।।

सौवर्णं हंसयुग्माढ्यं विप्राय स दिवं व्रजेत्।

## १८-ब्रह्माण्डपुराणम्

ब्रह्माण्डपुराणे चत्वारः पादाः सन्ति (१)प्रक्रियापादः (२)अनुषङ्गपादः (३)उपोद्घातपादः (४)उपसंहारपादश्च। तत्र प्रथमं पादद्वयं पूर्वभाग उच्यते, तृतीय पादौ मध्यमभागः कथ्यते, चतुर्थपादश्चोत्तभागो निगद्यते। अत्र १६१ अध्यायाः सन्ति। एतन्नारदीयपुराणानुसारं द्वादशसहस्र (१२०००) संख्याकमस्ति, मत्स्यपुराणानुसारं च शतद्वयाधिकद्वादशसहस्त्रं (१२२००) विद्यते। यथा ब्रह्मपुराणमादिपुराणमुच्यते, तथऐवेदन्तिमं पुराणमभिधीयते। मध्ये च ब्गह्मवैवर्तमस्ति। अतएवोक्तम्- आदावन्ते च मध्ये च हरिः सर्वत्र गीयते । एतत्परिचयश्चैवमस्ति-

ब्रह्मा ब्रह्माण्डमाहात्म्यमधिकृत्याब्रवीत्पुनः।
तच्च द्वादशसाहस्त्रं ब्रह्माण्डं द्विशताधिकम्।।
भविष्याणां च कल्यानां श्रूयते यत्र विस्तरः।
तद्ब्रब्रह्माण्डपुराणं च ब्रह्मणा समुदाहृतम्।।

(मत्स्यपुराणे ५३ अध्यायः)

श्रृणु वत्स्य ! प्रवक्ष्यामि ब्रह्माण्डाख्यं पुरातनम्।
तच्च द्वादशसाहस्त्रं भाविकल्पकथायुतम्।।
प्रक्रियाख्योऽनुषङ्गाख्य उपोद्घातस्तृतीयकः।
चतुर्थ उपसंहारः पादश्चत्वार एव हि।।
पूर्वपादद्वयं पूर्वो भागोऽत्र समुदाहृतः।
तृतीयो मध्यमो भागं चतुर्थस्तूत्तरो मतः।। (नारदीयपुराणे १०९ अध्यायः)

**(१) तत्र पूर्वभास्य प्रथमे प्रक्रियापादे**

आदौ कृत्यसमुद्देशो नैमिषाख्यानकं ततः।
हिरण्यगर्भोत्पत्तिश्च लोककल्पनमेव च।।
एष वै प्रथमः पादो द्वितीयं श्रृणु नारद ! ।

**(२)द्वितीये अनुषङ्गपादे**

कल्पमन्वन्तराख्यानं लोकज्ञानं ततः परम्।
मानसीसृष्टिकथनं रुद्रप्रववर्णनम्।।
महादेवविभूतिश्च ऋषिसर्गस्ततः परम्।
अग्निनां विचयश्चाथ कालसद्भाववर्णनम्।।
प्रियव्रतान्वयोद्देशः पृथिव्यायासविस्तरः।
वर्णनं भारतस्यास्य ततोऽन्येषां निरूपणम्।।
जम्ब्वादिसप्तदीपाख्या ततोऽधोलोकवर्णनम्।
ऊर्ध्वलोकानुकथनं ग्रहचारस्ततः परम्।।
आदित्यव्यूहकथनं देवग्रहानुकीर्त्तनम्।
नीलकण्ठाह्वयाख्यानं महाद्वस्य वैभवम्।।
अभावास्यनुकथनं युगतत्वनिरूपणम्।
यज्ञप्रवर्तनञ्चाथ युगयोरन्त्ययोः कृतिः।।
युगप्रजालक्षञ्च ऋषिप्रवरवर्णनम्।
वेदानां व्यसनाख्यानं स्वायम्भुवनिरूपणम्।।

शेषमन्वन्तराख्यानं पृथिवीदोहनन्ततः।

चाक्षुषेऽद्यतने सर्गो द्वितीयोऽङ्घ्रिः पुरादले।।

(३)तृतीये (मध्यमे) उपोद्घातपादे

अथोपोद्घातपादे च सप्तर्षिपरिकीर्त्तनम्।।

राजापत्यचयस्तास्माद् देवादीनां समुद्भवः।।

ततो जयाभिलाषश्च मरुदुत्पत्तिकीर्त्तनम्।

काश्यपेयानुकथनं ऋषिवंशनिरूपणम्।।

पितृकल्पानुकथनं श्राद्धकल्पस्ततः परम्।

वैवश्वतसमुत्पत्तिस्मृष्टिस्तस्य ततः परम्।।

मनुपुत्रान्वयश्चान्तो गान्धर्वस्य निरूपणम्।

इक्ष्वाकुवंशकथनं वंशोत्रेः सुमहात्मनः।।

अमावसोरन्वश्च रजेश्चरितमद्भुतम्।

ययातिचरितञ्चाथ यदुवंशनिरूपणम्।।

कारत्वीर्यस्य चरितं जामदग्न्यं ततः परम्।

वृष्णिवंशानुकथनं सगरस्याछ सम्भवः।।

भार्गवस्यानुचरितं तथार्यकवधाश्रयम्।

सगरस्याथ चरितं भार्वस्य कथा पुनः।।

देवासुराहवकथाः कृष्णाविर्भाववर्णनम्।

इन्द्रस्य च स्तवः पुण्यः शुक्रेण परिकीर्त्तितः।।

विष्णुमाहात्म्यकथनं बलीवंसनिरूपणम्।

भविष्यराजचरितं सम्प्राप्तेऽथ कलौ युगे।।

एवमुद्घातपादोऽयं तृतीयो मध्यमे दले।

**(४)चतुर्थे (उत्तरभागे) उपसंहारपादे**

चतुर्थमुपसंहारं वक्ष्ये खण्डे तथोत्तरे।।

वैवस्वतान्तराख्यानं विस्तरेण यथातथम्।

पूर्वमेव समुद्दिष्टं संक्षेपादिह कथ्यते।।

भविष्याणां मनुनां च चरितं हि ततः परम्।

कल्पप्रलयनिर्देशः ततः कथिता मानलक्षणैः।

वर्णनं नरकाणाञ्च विकरिमाचरणैस्ततः।।

मनोमयपुराख्यानं लयः प्राकृतिस्ततः।

शैवस्याथ पुरस्यापि वर्णनञ्च ततः परम्।।

त्रिविधाद् गुणसम्बन्धाज्जन्तूनां कीर्तितागतिः।

अनिर्देश्या प्रतर्क्यस्य ब्रह्मणः परमात्मनः।।

अन्वयव्यतिरेकाभ्यां वर्णनं हि ततः परम्।

इत्येष उपसंहारः पादो वृत्तः स चोत्तरः।।

चतुष्पादं पुराणन्ते ब्रह्माण्डं समुदाहृतम्।

अष्टादशमनौपम्यं सारात्सारतरं द्विज ! ।।

ब्रह्माण्डं यच्चतुर्वक्षं पुराणत्वेन पठ्यते।

तदेव व्यस्य गदितमत्राष्टादशमं पृथक्।।

पाराशर्येण मुनिना सर्वेषामपि मानद ! ।

वस्तुद्रष्ट्राथ तेनैव मनीनां भावितात्मनाम्।।

मत्तः श्रुत्वा पुराणानि लोकेभ्यः प्रचकाशिरे।

सुनयो धर्मशालास्ते दीनानुग्रहकारिणः।।

मया चेदं पुराणन्तु वशिष्ठाय पुरोदितम्।

तेन शक्तिसुतायोक्तं जातूकर्णाय तेन च।।

व्यासो लब्ध्वा ततश्चैतत् प्रभञ्जनमुखोद्गतम्।

प्रमाणीकृत्य लोकेऽस्मिन् प्रवार्त्तयदनुत्तमम्।।

**श्रवणादिफलमितिकर्तव्यतानिर्देशो यथा**

य इदं कीर्तयेद्वत्स ! शृणोति च समाहितः।

स विधूयेह पापानि याति लोकमनामयम्।।

लिखित्वैतत् पुराणन्तु स्वर्णसिंहासनस्थितम्।

पात्रेणाच्छादितं यस्तु ब्राह्मणाय प्रयच्छति।।

य याति ब्रह्मणो लोकं नात्र कार्या विचारणा।

मरीचेऽष्टादशैतानि मया प्रोक्तानि यानि ते।।

पुराणानि तु संक्षेपाच्छ्रोतव्यानि च विस्तरात्।

अष्टादशपुराणानि यः शृणोति नरोत्तमः।।

कथयेद्वा विधानेन नेह भूयः स जायते।

सूत्रमेतत्पुराणानां यन्मयोक्तं तवाऽधुना।।

तन्नित्यं शीलनीयं हि पापाय देवगुर्वनुसूयवे।।

देयं कदापि साधूनां द्वेषिणे न शठाय च।

शान्तायारागिचित्ताय शुश्रूषाभिरताय च।।

निर्मत्सराय शूचये देयं सद्वैष्णवाय च।

**मत्स्यनारदीयपुराणानुसारमष्टादशपुराणानां**

क्रमः, नामानि, श्लोकसंख्या, अध्यायाश्च

| क्रमः | पुराणानां नामानि | नारदीयपुराणानुसारं श्लोकसंख्या | मत्स्यपुराणानुसारं श्लोकसंख्या | अध्यायसंख्या |
|---|---|---|---|---|
| १ | ब्रह्मपुराणम् | १०००० | १३००० | २४५ |
| २ | पद्मपुराणम् | ५५००० | ५५००० | ६४१ |
| ३ | विष्णुपुराणम् | २३००० | २३००० | १२७ |
| ४ | शिवपुराणम् | २४००० | २४००० | ४६४ |
| ५ | श्रीमद्भागवतम् | १८००० | १८००० | ३३५ |
| ६ | नारदीयपुरराणम् | २५००० | २५००० | २०७ |
| ७ | मार्कण्डेयपुराणम् | ९००० | ९००० | १३४ |
| ८ | अग्निपुराणम् | १५००० | १६००० | ४८३ |
| ९ | भविष्यपुराणम् | १४००० | १४५०० | ६०५ |
| १० | ब्रह्मवैवर्तपुराणम् | १८००० | १८००० | २५६ |

| | | | | |
|---|---|---|---|---|
| ११ | लिङ्गपुराणम् | ११००० | ११००० | १६३ |
| १२ | वाराहपुराणम् | २४००० | २४००० | २१८ |
| १३ | स्कन्दपारणम् | ८१००० | ८११०० | १६७२ |
| १४ | वामनपुराणम् | १०००० | १०००० | ९५ |
| १५ | कूर्मपुराणम् | १७००० | १८००० | ९५ |
| १६ | मत्स्यपुराणम् | १५००० | १४००० | २९० |
| १७ | गरुडपुराणम् | १९००० | १८००० | ३१८ |
| १८ | ब्रह्माण्डपुराणम् | १२००० | १२२०० | १६१ |

अष्टादशपुराणानां नाम संख्या तथा क्रमः।

अध्याश्च विनिर्दिष्टाः चक्रेऽस्मिन् विदुषां मुदे।।

**श्रीमद्भागवते यथा**

ब्राह्मं दशसहस्राणि पाद्मं पञ्चोनषष्ठि च।

श्री वैष्णवं त्रयोविंशच्चतुर्विंशति शैवकम्।। १२।१३।४

दशाष्टौ श्रीभागवतं नारदं पञ्चविंशतिः।

मार्कण्डे नवहि च दशपञ्च चतुःशतम्।। १२।१३।५

चतुर्दशं भविष्यं स्यात्तथा पञ्चशतानि च।

दशाष्टौ ब्रह्मवैवर्तं लैङ्गमेकादशैव तु।। १२।१३।६

चतुर्विंशति वाराहमेकाशीति सहस्रकम्।

स्कान्दं शतं तथा चैकं वामनं दश कीर्त्तितम्।।१२।१३।७

कौर्मं सप्तदशाख्यातं मात्स्यं तत् चतुर्दश।
एकोनविंशति सौपर्णं ब्रह्माण्डं द्वादशैव तु।।१२।१३।८

एवं पुराणसन्देहश्चतुर्थक्ष उदाहृतः।

**देवीभागवते च**

चतुर्दशसहस्रं च मात्स्यमाद्यं प्रकीर्तितम्।
तथा ग्रहसहस्रं तु मार्कण्डेयं महाद्भुतम्।।
चतुर्दशसहस्राणि तथा पञ्चशतानि च।
भविष्यं परिसंख्यानं मुनिभिस्तत्वदर्शिभिः।।
अष्टादशसहस्रं वै पुण्यं भागवतं किल।
तथा चायुतसंख्याकं पुराणं ब्राह्मसंज्ञकम्।।
द्वादशैव सहस्राणि ब्रह्माण्डं च शताधिकम्।
तथाष्टादशसाहस्रं ब्रह्मवैवर्तमेव च।।
अयुतं वामनाख्यं च वायव्यं षड्शतानि च।
चतुर्विंशतिसंख्यातः सहस्राणि तु शौणक !।।
त्रयोविंशतिसाहस्रं वैष्णवं परमाद्भुतम्।
चतुर्विंशतिसाहस्रं वाराहं परमाद्भुतम्।।
षोडशैव सहस्राणि पुराणं चाग्निसंज्ञकम्।
पञ्चविंशतिसाहस्रं नारदं परमं मतम्।।
पञ्च पञ्चाशत्याहस्रं पद्माख्यं विपुलं मतम्।

एकादशसहस्राणि लिङ्गाख्यं चातिविस्तृतम्।।

एकोविंशत्साहस्रं गारुडं हरिभाषितम्।

सप्तदशसहस्रं च पुराणं कूर्मभाषितम्।

एकादशीतिसहस्राणि स्कन्दाख्यं परमाद्भुतम्। (१।३-१२)

स्कन्धपुराणे अष्टादशानां पुराणानां मध्ये दश पुराणानि शैवपुराणानि कथ्यन्ते, तेषु शिवस्य गौरवं गीयते। चतिवारि वैष्णवपुराणानि प्रोच्यन्ते, तेषु विष्णोर्महिमा वर्ण्यते। द्वयोः ब्रह्मणो महत्वं प्रकाश्यते। तथाहि-

तत्र शैवानि शैवं च भविष्यं द्विजोत्तमाः।

मार्कण्डेयं तथा लैङ्गं वाराहं स्कन्दमेव च।।

मात्स्यमन्यत्तथा कौमं वामनं च मुनीश्वगः।

ब्रह्माण्डं च दशेमानि त्रीणि लक्ष्याणि संख्यया।।

ग्रन्थानां महिमा सर्वैः शिवस्यैव प्रकाश्यते।

असाधारणया मूर्त्या नाम्ना साधारणेन च।।

वदन्ति शिवमेकानि शिवस्तेषु प्रकाश्यते।

विष्णोर्हि वैष्णवं तच्च तथा भागवतं शुभम्।।

नारदीयं पुराणं च गारुडं वैष्णवं विदुः।

ब्राह्मं पाद्मं ब्रह्मणो द्वे अग्नेराग्नेयमेककम्।।

सवितुर्ब्रह्मवैवर्तम् एवमष्टादशं स्मृतम्।

चत्वारि वैष्णवानीशविष्णोः साम्यपराणि वै।।

ब्रह्मादिभ्योऽधिकं विष्णुं प्रवदन्ति जगत्पतिम्।

ब्रह्माविष्णुमहेशानां साम्यं ब्राह्मे पुराणके।।

अन्वेषामधिकं देवं ब्रह्माणं जगतां पतिम्।

प्रवदन्ति दिनाधीशं ब्रह्मविष्णुशिवात्मकम्।।

एवमष्टादशभेदार्विभक्तेषु पुराणेषु योगवलेन त्रिकालदर्शिना महर्षिणा वेदव्यासेन आदर्शमानवचरित्रचित्रणं, सर्वधर्मरहस्यकीर्तनं, वर्णाश्रमव्यवस्थाप्रतिपादनं, सर्वदर्शनरहस्यसमर्थनं. कर्तव्यपथप्रदर्शनं, असत्थनिवृत्तिमार्गसूचनं, ज्ञानस्य भक्तेः कर्मणश्च निरूपणं, वतारस्य विवेचनं च महता कौशलेन कृतमस्ति। किं बहुना पुराणेषु सर्वोपयोगिनो ज्ञातव्या विषया यथास्थानं निवेशिताः सन्ति। अत एव पुराणानि भारतीयसंस्कृतेः हृदयमेवेति कथने नास्ति कश्चिदपि अतिशयोक्तिलेशः। अतो हिन्दुजातौ प्राणवत्प्रियस्य स्त्रवाभ्यर्हितस्य, वेदवदादरणीयस्य, सर्वैः धार्मिकशिरोमणिभिः सर्वथा समादृतस्य सम्प्रदायाविरोधेन सर्वदर्शनसिद्धान्तस्त्रवोपासनारहस्यसमर्थनशीलस्या - लौकिकभावगुम्फितस्य भगवत आज्ञास्वरूपस्य पुराणसमूहस्याध्ययनमवश्यं कर्तव्यमेव हिन्दुभिः। अत एवोक्तम्-

पुराणं मानवी धर्मः साङ्गोपाङ्गश्चिकित्सकः।

आज्ञासिद्धानि सर्वाणि न हन्तव्यानि हेतुभिः।।

पुराणेषु क्वचन समाविभाषायाः प्राधान्येऽपि तदर्थावगतये महत्सौविध्यं वर्तते। पुराणभाषा प्रसादगुणगुम्फिता भागमयी अति मञ्जुला च वर्तते। येन वाला अपि

स्वल्पप्रयासेनैव तदध्ययनतः पुराणमंज्ञा भवितुमर्हन्ति हिन्दुधर्मस्य च समुन्नति कर्तुं शक्नुवन्ति।

## पुराणपञ्चलक्षणम्

अत्र व्याख्याविहीनपारिभाषिकशब्दानां प्रयोगः तत्सार्वभौमलोकप्रियतायाः शङ्केतोऽभिमन्यते विद्वद्भिः।

वस्तुतः पुराणानां सर्वमान्यपरम्परानुसारं तेषु सर्वेषु पञ्चानामेव विषयाणां विशेषचो वर्णनं विध्यते। अन्येषां च पुराणोपयोगिनां विषयाणां प्रासङ्गिकतया यत्र यत्र विवेचनं कृतमस्ति।

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।

वंशानुचरितं चेति पुराणं पञ्चलक्षणम्।। वि. पु. ३।३।२४

एतत्पञ्चलक्षणलक्षितं पुराणभिधीयते। सर्वेषु पुराणेषु अस्य लक्षणं पञ्चकस्य न्यूनाधिकरूपेण समावेशोऽस्त्येव। एषां पञ्चानां विषयाणां मध्ये कस्मिंश्चित्पुराणे कस्यचिदकस्याधिक्येन वर्णनं विद्यते, कस्यचिच्च संक्षेपेण दृश्यते, कुत्रचिच्च कस्यचनैकस्य विषयस्य सातिशयवर्णनमुपलभ्यते- यथा मार्कण्डेयपुराणे मन्वन्तरवर्णनस्यैव प्राधान्यं विद्यते, श्रीमद्भागवते वंशशानुचरितस्यैव प्राधान्यं प्राप्यते, विष्णुपुराणे तु सर्गस्य मुख्यत्वं दृश्यते। एवं कुत्रचित् पुराणे एकस्य विषयस्याधिक्यमन्वेषां च न्यूनत्वं निभाल्यते तस्मात्सर्वेषां पराणानां यथावदध्ययनं विना पुराणानामध्यात्मिकरहस्यं नावगन्तुं शक्यते न वा यथार्थज्ञानपरिपाटी परिचेतुं पार्यते।

## (१)सर्गः

पुराणलक्षणानुसारं पुराणेषु सर्गप्रतिसर्गवंशानुचरितानामेषपञ्चानां मुख्यतया वर्णनं विद्यते। तत्र कः सर्ग इति जिज्ञायायां श्रीमद्भागवते-

अव्याकृतगुणक्षोभान् महतस्त्रिवृतोऽहमः।

भूतमात्रेन्द्रियार्थानां सम्भवः सर्गः उच्यते।। १२।७।११

साम्यवस्थापन्नस्य त्रिगुणात्मकस्य प्रधानतत्वस्य गुणक्षोभान्मदत्ततः ततोऽहंकारः तत एकादशेन्द्रियपञ्चतन्माञ्चा पञ्चमहाभूतानां सम्भवः सर्गो निगद्यते।

## (२)प्रतिसर्गः (प्रलयः)

अत्र प्रत्युपलर्गोस्ति विरोधार्थकः सर्गस्य विरोधी प्रलय इत्यर्थः। तस्मात् प्रतिसर्गपदेन सर्गस्य विपरीतं वस्तु प्रलयो ज्ञातव्यः। अयं प्रलयोभवति चतुर्धा- नैमित्तिकप्रलयः, प्राकृतिकप्रलयः, नित्यप्रलयः, आत्यन्तिकप्रलयश्च, तथादि विष्णुपुराणस्य प्रथमेंऽशे सप्तमेऽध्याये-

नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको लयः।

नित्यश्च सर्वभूतानां प्रलयोऽयं चतुर्विधः।।

श्रीमद्भागवते महापुराणे प्रलयशब्दस्य स्थाने संस्थाशको प्रयुक्तोऽस्ति।

नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः।

संस्थेति कविभिः प्रोक्ता चतुर्धास्य स्वभावतः।। १२।७।१७

## (३)वंशः

ब्रह्मणः सकाशादुत्पन्नानां राज्ञां भूतभविष्यवर्तमानकुलपरम्परा वंशः कथ्यते। तथाचोक्तं श्रीमद्भागवते द्वादशस्कन्धे सप्तमेऽध्याये-

राज्ञां ब्रह्मप्रसूतानां वंशकालिकोऽन्वयः। १२।७।१६

पुराणानि हिन्दुजातेरितिहासस्य मूलस्त्रोतांसि सन्ति। यद्यपि रामायणे महाभारते च प्रधानतया इतिहासस्यैव वर्णनं विद्यते, तथापि पुराणेषु इतिहासस्य विवेचनं सर्वोपकारकमतिसुगमतया कृतमस्तीति बहवः समालोचकाः सोल्लासं समर्थयन्ति। हिन्दुजातिप्रीचीनमास्ति, सृष्टिकालादिदानीं यावदियं स्वरूपं सम्यक् संरक्षन्ती तथैव तिष्ठति। बहुभिराक्रमणैरपि अस्या मूलं सुरक्षितमस्ति। यत्र अन्यासां जातीनां वंशस्य इतिहासो न सन्तोषजनक उपलभ्यते, तत्र हिन्दुजातेरितिहासस्य वर्णनमादिकालादेव व्यवस्थितं मिलति। हिन्दुजातौ सूर्यवंश-चन्द्रवंश-गौतमवंशादयोऽनेके वंशाः वर्तन्ते। सृष्टेरारम्भत एवैतेषां वास्तविकी सुव्यवस्थिता वंशपरम्परा पुराणेषु विद्यते। यदि पुराणानि नाभविष्यंस्तदा एवं क्रमबद्ध परम्परासम्पन्न इतिहासो नाप्राप्स्यत, हिन्दुजातेः प्राचीनतमं च गौरवमनायासोनानंक्ष्यत्। हिन्दुजातेः पुनरुत्थानम्, स्ववंशजानां कथायाः श्रवणेनैव भवितुमर्हति, नान्यथा। अतो हिन्दुजातेः वास्तविकस्येतिहासस्य ज्ञानाय, गौरवाय, समुन्नतये च पुराणानि अत्यादरणीयानि सन्ति।

शङ्का-कियन्तः समालोचकाः कथयन्ति यत् पुराणानां वंशावली परस्परविरुद्धा विद्यते, यतोहि एकस्मिन् पुराणे मनुमारभ्य रामपर्यन्तगणनायां यादृशो वंशक्रमो विद्यते स

एवान्यस्मिन् पुराणे तद्विपरीतं उपलभ्यते अतः परस्परविरुद्धत्वात् पुराणोक्ता वंशावली अप्रामाणिकी अस्ति।

समीक्षा-सृष्टिकालाद् आरभ्य प्रलयपर्यन्तं क्रमबद्धं वंशवर्णनं सुगमं कार्यं नास्ति। यदि एकैकं कृत्वा वर्णयेत् तदा कार्यमिदं सम्पन्नं न स्यात्। अतः पुराणेषु कचन वंशावली क्रमशः लिखिताऽस्ति क्वचमत्र साधारणान् पुरुषानगयित्वा प्रमुखाणामेवपुरुषाणामुल्लेखोऽस्ति। कुत्रापि तु तेषामेव महापुरुषाणामुल्लेखोति येषां धार्मिकेन जगता महत्वशालिना कार्येण सह सम्बन्धोऽस्ति। अतः पुराणोक्तावंशपरम्परा सर्वत्र पितृपुत्रक्रमानुसारमेव न मन्तव्यम्, किन्तु कुत्रचित् अमुकस्य पुत्रः क्वचन च अमुकस्य वंशजः अमुकपुरुषो जातः, इत्येवं विरोधाभासस्यपरिहारः कर्तव्यः।

## (४)मन्वन्तराणि

पुराणानुसारं सृष्टेर्विभिन्नस्य कालमानस्य द्योतकोऽयं शको़ऽस्ति। अतः पौराणिककालगणनायां महत्वं महदुपकारि वर्तते। चतुर्दशमन्वन्तराणां मध्येऽस्मिन् प्रत्येकस्य मन्वन्तररधिपतिः एको विशिष्टो भवति यस्य सहयोगे पञ्च पदार्थाः सन्ति। अतो मन्वन्तरं षडविधं प्रोच्यते।

मनोः मनुपुत्राणाम्, देवानामिन्द्रस्य, ऋषीनाम्, अंशावताराणाञ्च घटनाया उल्लेखः मन्वन्तरं कथ्यते। तथाचाह श्रीमद्भागवते-

मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वराः।

ऋषयोंऽशावतारश्च हरेः षड्विधमुच्यते।।१२।७।१५

पौराणिकवंशेषु उत्पन्नानां वसुंधाराणां मूलपुरुषाणां विशिष्टं विवरणं यत्र वर्ण्यते तद् वंशानुचरितमुच्यते। मनुष्यवंसे प्रसूतानां महर्षीमां राज्ञां च चरितानि अन्य समाविष्टानि सन्ति। महर्षीणां चरितार्थेक्ष्मा राज्ञां चरितानामेव विशेषविवरणं पुराणेषुपलभ्यते।

यदि मन्वन्तरज्ञानंन स्यात्तर्हि हिन्दूनामितिहासे महती अव्यवस्था समुपतिष्ठेत। स्वयम्भुमनोः समये के ऋषयः के च राजान आसन् स्वरोचिषस्य मनोः के के सहायका आसन् ? उत्तमस्य मनोः समये कस्य पुराणस्य प्राधान्यमासीत्, रैवतकमनुकाले कीद-शी व्यवस्था आसीत् इत्यादिप्रश्नानां यथार्थमुत्तरं पुराणैर्विना को दातुं शक्नुयात्। मन्वन्तज्ञानमन्तरा कस्यापि ऋषेः राज्ञे वा कालस्य कथं यथार्थं ज्ञानं भविष्यति ? एकस्मिन् कल्पे १४ मनवो भवन्ति, केन मनुना का स्मृतिः रचिता, तस्य स्त्रियाः किन्नामासीत् कियन्तष्चासन् तस्य तनयाः? इत्यादि ज्ञानं मन्वन्तरं विना न भवितुमर्हति। पुराणानुसारं सृष्टिकालादारभ्य प्रलयपर्यन्तं प्रायः चतुरर्वुदादधिक एव समयो व्यत्येति। एतावति महति समये का घटना कदाजीघटत ? कस्य प्रादुर्भावः कदाजायतेत्यादि रहस्यं ज्ञातुं भगवता व्यासेन मन्वन्तरपद्धतेराविष्कारः कृतः।

### (५)वंशानुचरितम्

वंशानुचरितं ते, वृत्तं वंशधराश्च ये।। १२।१७।१६

विशिष्टवंशेषु समुत्पन्नानां विशिष्टानां पुरुषाणां चरित्रवर्णनं वंशानुचरितमुच्यते। अत्र मृत्यलोकप्रभवामां पुण्यकर्मशालिनां षीणां धर्मरक्षणतत्पराणां राज्ञां च वंशजा व्रण्यते, सृष्टिश्रृङ्खलायाः सदाचारादिविभागानाञ्च विस्तृतं वृत्तान्तमुपलभ्यते।

मनुष्याणां समक्षे यदा घोराद्धोरतरापि विपदुपतिष्ठते, तदा महती महानपि धर्मवेत्ता किंकर्तव्यविमूढो भवति, मनसि च वहुविधो विचार उपतिष्ठते। तदेषदपि अनवधानतया पतनं

जायते। एवंविधविकटपरिस्थितौ स्वपूर्वजानां चरित्रं स्मृत्वा पतनादात्मनो रक्षणाय पुराणेषु वंशानुचरितस्य समावेशः कृतोऽस्ति।

## सृष्टेः पौर्वापर्यविवेचनम्

इदं दृश्यं जगत् कैः कैः तत्वैर्निर्मितं विद्यते ? एषां तत्वानां किमस्ति पौर्वापर्यम् ? सृष्टेरुत्पत्तिः कदाभूत् कथमभूत् ? प्रलयः कदा भविष्यति कथं च भविष्यति ? इत्यादीनां रहस्यात्मकानां प्रश्नानां यथार्थमुत्तरं विश्वस्य कस्मिन्नपि धर्मपुस्तके नोपलभ्यते । इतो लक्षवर्षपूर्वं किमासीत् ? कोटिवर्षपूर्वं किमासीत् ? अवुर्दर्षपूर्वं च किमासीत् इत्यादिप्रश्नानां सन्तोषजनकं वास्तविकमुत्तरमुपलब्धुं पुराणानामेव पारायणं कर्तव्यं भविष्यति।

संसारसृष्टेः किमपि वर्षाणि जातानीति प्रश्नस्योत्तरं पुराणानामाधारे एव दातुं शक्यते। यतोहि हिन्दुजातिः सृष्टेरारम्भकालाद् अद्यावधि प्रत्यहं नित्यनैमित्तिककाम्यादीनां कर्मणामनुष्ठानसमये-ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथम चरणे......अमुक कर्म करिष्ये इत्यादि संकल्पं पठित्वा सृष्टिगणनां कुर्वन्ती सम्यक् तद्विभागं च जानन्ती समयं यापयति।

एतस्यायमभिप्रायोस्ति यद् ब्रह्मणः पञ्चाशद् वर्षानन्तरं द्वितीयपरार्द्धसमये श्रीश्वेतवाराहकल्पे वैवश्वतनाम्नः सप्तमस्य मनोः समये अष्टाविंशतिमस्य कलियुगस्य प्रथम भागे अमुकं कर्म करिष्ये इति।

## कालपरिमाणविवरणम्

कालपरिमाणविवरणं हि पुराणेषु प्रचुरमात्रायामुपलभ्यते। तथाहि-

(विष्णुपुराणस्य प्रथमेंशे)

काष्ठाः पञ्चदशाख्याता निमेषा मुनिसत्तम्।

काष्ठास्त्रिंशत्कला त्रिंशत्कला मौहूर्तिको विधिः।।

तावत्संख्यैरहोरात्रं मुहूर्तैर्मुनिषं स्मृतम्।

अहोरात्राणि तावन्ति मासः पक्षद्वयात्मकः।।

तैः षड्भिरयनं वर्षं द्वेऽने दक्षिणोत्तरे।

अयनं दक्षिणं रात्रिर्देवानामुत्तरं दिनम्।।

चतुर्युगं द्वादशभिस्तद्विभागं निबोध मे।

दिव्यैर्वर्षसहस्रैस्तु कृतत्रेतादिसंज्ञितम्।।

प्रोच्यते तत्सह्सरं च ब्रह्मणो दिवसं मुने !

ब्रह्मणो द्वसे ब्रह्मण ! मनवस्तु चतुर्दश।।

ब्राह्मो नैमित्तिको नाम तस्यान्ते प्रतिसंचर।

अर्थात् १५ न्मेषाणामेका काष्ठा भवति, ३० काष्ठानामेका कला भवति, कलानामेका घटी भवति, द्वयोः घट्योरेकं मुहूर्तं भवति, ३० मुहूर्तैरेकमहोरात्रं भवति, ३० अहोरैत्रैः द्वौ पक्षौ भवत्, द्वयोः पक्षयोरेको मासो भवति, ६ मासानामेकमयनं भवति,२अयनयोरेकं मानववर्षं भवति, १ मानववर्षं देवानामेकं दिनं भवति। एवं दिव्यानां द्वादशसहस्रवर्षाणामेकं चतुर्युगं भवति। सहस्राणां महायुगाणां ब्रह्मण एकं दिनं भवति, यत्र १४ मनवो भवन्ति। ब्रह्मणो दिवसावसाने प्रलयो भवति, स एव ब्रह्मणो रात्रिरभिधीयते।इत्थं शतवार्षिकं ब्रह्मण आयुर्भवति तत्परमुच्यते, तदर्तं च परार्द्धं कथ्यते।

निजेन तस्य मानेन आयुः वर्षशतं स्मृतम्।

तत्पराख्यं तदर्थं च परार्द्धमभिधीयते।।

पुराणेषु कालनिर्णयानुसारं सत्ययुगस्य १७२८००० वर्षात्मकम् त्रेतायुगस्य १२९६००० वर्षात्मकम्, द्वापरयुगस्य ८६४००० वर्षात्मकम्, कलियुगस्य च ४३२००० वर्षात्मकं मानं विद्यते। संकलनया

सर्वेषां मानं ४३२०००० मानवर्षात्मकं भवति। चतुर्णां युगाणां संज्ञा महायुगमुच्यते। एकसप्ततति ७१ महायुगानामेकं मन्वन्तरं भवति। चतुर्दशानां मन्वमन्तराणामेकः कल्पः कथ्यते। एकः कल्पो ब्रह्मण एकं दिनं भवति।

एकस्मिन् कल्पे ४२९४०८०००० वर्षाणि भवन्ति। तत्र व्रमाने श्रीश्वेतवाराहकल्पे आरम्भतः २०३६ विक्रमाब्दपर्यन्तं मानववर्षेषु १९६४८५५०९३ वर्षाणि व्यतीतानि। २३२९२२४९०७ वर्षामि चावशिष्टानि सन्ति।

| | |
|---|---|
| सत्ययुगमानम् | १७२८००० |
| त्रेतायुगमानम् | १२९६००० |
| द्वापरयुगमानम् | ८६४००० |
| कलियुगमानम् | ४३२००० |
| चतुर्थयुगमानम् | ४३२०००० |
| | ७१ |
| मन्वन्तरमानम् | ३०६७२०००० |
| | १४ |
| कल्पमानम् | ४२९४०८०००० |
| तत्र भुक्तकल्पमानम् | १९६४८५५०९३ |
| भोग्यकल्पमानम् | २३२९२२४९०७ |

एतदतिरिक्तम्प्रतियुगं संध्यासंध्याशकालमानमपि भवति।

सृष्टेरारम्भविषये यत्र वर्तमानविज्ञानमिदादीं यावत् पञ्चसहस्राब्दारभ्य त्रिंशत्कोटिपर्यन्तं गतं विद्यते। तत्र पौराणिकीसृष्टिः प्रायः अर्बुदद्वयवर्षमनुगच्छति। यदि

आधुनिकं विज्ञानं शनैः शनैः उन्नतिं तिष्ठेत्, तर्हि मन्ये कियद्वर्षानन्तरं पौराणिकं सिद्धान्तमुपगच्छेदिति।

पुराषानुग्रहीतानामेतेषां वासनामयः।

विसर्गोयं समाहारो वीजाद् वीजं चराचरम्।। १२।७।

यथा वर्षर्तौ पृथिव्यामज्ञातरूपेण स्थितानि बीजानि बहुविधलतागुल्मतृणादिरूपेण स्वयं प्रादुर्भवन्ति, तथैव वर्तमानसृष्टेः पूर्वसृष्टौ समुत्पन्नानां जीवानां अवशिष्टवासनामयैः संस्कारैः पुनः सृष्टिरचना समये अनेके पदार्थाः तद्भोक्तारो जीवाश्च समुत्पद्यन्ते।

श्रीमद्भागवतस्य तृतीये स्कन्धे प्राकृतवैकृतभेदेन सृष्टेः नव भेदाः तेषां पौर्वापर्यक्रमश्चैवमुक्ताः सन्ति-

गुणव्यतिकराकारोऽनिर्विशेषोप्रतिष्ठितः।

पुरुषस्तदुपादानमात्मानं लीलयासृजत्।।

विश्वं वै ब्रह्मतन्मात्रं संस्थितं विष्णुमायया।

ईश्वरेण परिच्छिन्नं कालेनाव्यक्तमूर्तिना।।

यथेदानीं तथाग्रे च पश्चादप्येतदीदृशम्।

सर्गो नवविधस्तस्य प्राकृतो वैकृतस्तु यः।।

आद्यस्तु महतः सर्गो गुणवैषम्यमात्मनः।

द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियोदयः।।

भूतसर्गस्तृतीयस्तु तन्मात्रो द्रव्यशक्तिमान्।

चतुर्थ ऐन्द्रियः सर्गो यस्तु ज्ञानक्रियात्मकः।

वैकारिको देवसर्गः पञ्चमो यन्मयं मनः।।

षष्ठस्तु तमसः सर्गो यस्त्वबुद्धिकृतः प्रभो।

षडिमे प्राकृताः सर्गा वैकृतानपि मे श्रृणु।।

सप्तमो मुखसर्गस्तु षडविधस्तस्थुषां चयः।

वनस्पत्योषधिलतास्त्वक्सारवीरुधो द्रुमाः।।

उत्स्त्रोतसःतमःप्राया अन्तःस्पर्शाः विशेषिणः।

तिरश्चामष्टमः सर्गः सोऽष्टाविंशतिधो मतः।।

अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनः।

गौरजो महिषः कृष्णः सूकरो गवयो रुरुः।।

द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम !

खरोऽश्वोश्वतरो गौरः शरभश्चमरी तथा।।

एते चैकशफा क्षतः ! श्रृणु पञ्चनखान् पशून्।

श्वा श्रृगालो वृको ळ्याघ्रो मार्जारः शशशल्लकौ।।

सिंहः कपिर्गजः कूर्मो गोधा च मकरादयः।

कङ्क-गृध-वट-श्येन-भास-भल्लुक-बर्हिणः।।

हंस-सारसचक्राह्व-काकोलूकादयः खगाः।

अर्वाक् स्त्रोतस्तु नवमः क्षत्तरेकविधो नृणाम्।।

रजोऽधिकाः कर्मपराः दुःखे च सुखमानिनः।

आकाशतः पृथ्वीपर्यन्तं स्थूलबूतानामुत्पत्तिप्रकारोऽपि तत्रैव-

नभसोऽनृसृतं स्पर्शो विकुर्वन्निर्ममेऽनिलम्।

अनिलो हि विकुर्वाणो नभसोरुवलान्वितः।।

ससर्ज रूपतन्मात्रं ज्योतिर्लोकस्य लोचनम्।

अनिलेनान्वितं ज्योतिर्विकुर्वत्परवीक्षितम्।।

आधत्ताम्भो रसमयं कालमायांशयोगतः।

ज्योतिषाम्भोऽनुसंसृष्टं विकुर्वद् ब्रह्मवीक्षितम्।।

महीं गन्धगुणमाधात् कालमायांशयोगतः (श्रीमद्भागवतम् ३।५ ३३२-३५)

आधुनिकैर्विज्ञानविद्भिरेकस्वरेण स्वीकृतमस्ति यत् सृष्टिनिर्माणे कोटिवर्षेभ्यः न्यूनतमः समयो न व्यतीतः। यत आरम्भे इयं दाहकमग्निपिण्डमासीत्ततोत्र नृणगुल्मादयः प्रादुर्भूताः ततः कियद्वर्षं यावत् जंगलरूपे स्थिता आसीत्, ततो जीवानां निवासयोग्या जाता।

पाश्चात्यवैज्ञीनिकेषु प्रधानेन वैज्ञानिकेन लिछाफमहोदयेन स्वकीये सेक्रेट् आफ् डाक्ट्रिन् नामके पुस्तके लिखितमस्ति यत् पृथ्वाः द्विसहस्त्रडिगिरीतापमानतः द्वितीयडिग्रीतापमानं यावत् गमने ३५ कोटिवर्षेभ्यो न्यूनः समयो न व्ययीभवितुमर्हति। एतेन-

शतं मन्वन्तरं यावज्ज्वलन्ती ब्रह्मतेजसा।

सुषाव डिम्भं स्वर्णाभं विश्ववाधारालयपदम्।।

इति देवीभागवतपुराणोक्तसिद्धान्त एव सिध्यति।एतादृश एव सृष्टिक्रमो मनुस्मृतेः प्रथमाध्याये भगवता मनुनापि प्रदर्शितोस्ति। तस्मात् पौराणिकसृष्टिप्रक्रियाक्रमो वैज्ञानिकनिकषायां निर्मलः प्रतीयते।

## सृष्टिरहस्यम्

पुराणेषु सृष्टिप्रकरणमतिगहनं विद्यते। सर्गाविर्भावरहस्यज्ञानान्तरमेव दृश्यरहस्यज्ञानं भवितुमर्हति। सृष्टिस्तावच्चतुर्विधा भवति-प्राकृतिकी सृष्टिः ब्राह्मीसृष्टिः, मानससृष्टिः, मैथुनीसृष्टिश्च। तत्र सर्वप्रथमं ब्रह्मप्रकृतौ अव्यक्तावस्थातो व्यक्तावस्थामधिगतायां सृष्ट्यां

अनन्तकोटिब्रह्माण्डव्यापकस्य ब्रह्मण ईक्षणातो या सृष्टिः प्रादुर्भवति, सा प्राकृतिकी प्रथमा सृष्टिः कथ्यते। यतो हि सा प्रकृत्या स्वभावेनैव भवति। तदनन्तरं ब्रह्माविष्णुमहेशात्मकस्य मूर्तित्रयस्याविर्भावो भवति। इमे त्रय एव प्रतिब्रह्माण्डं सगुणब्रह्मणः प्रतिनिधयः ईश्वरा उच्यन्ते। तत्र ब्रह्मणः सकाशात् द्वितीया ब्राह्मी सृष्टिरुत्पद्यते। ततो ब्रह्मणो मानसपुत्रैः प्रजापतिभिर्देवदानवमानवादीनां विस्तीर्णा तृतीया मानसी सृष्टिरुच्यते। तदनन्तरं उद्भिज्जस्वेदजाण्डजजरायुजमानवेषु स्त्रीपुरुषसंयोगजन्या चतुर्थी मैथुनी सृष्टिः उत्पद्यते, सा वैजी सृष्टिरुच्यते। तत्र ब्राह्म्याःमानस्याश्च सृष्टेरहस्यं अन्तर्दृष्ट्यो योगिन एवानुभवन्ति न साधारणा जनाः तद्रहस्यमवगन्तुं पारयन्ति। ब्राह्म्यां मानस्याञ्च सृष्टावेव वेदाविर्भावः पुराणप्राकट्यं च भवति। अतो वेदानां पुराणानाञ्च वास्तविकं रहस्यं न साधारणबुद्धिगम्यं भवति।

पुराणेषु विवेचिता सृष्टिपद्धतिर्न दार्शनिकपरिपाटीमनुरुन्धे। किन्तु विविधानां सृष्टिस्तराणां प्रसङ्गेन एकत्रैव पुराणेषु वर्णनं क्रियते, येन विवेचनशैली अतिजटिलतामासाद्य साधारणबुद्धीनां मानवानामसंबद्धवत् प्रतीयते।

सत्वगुणाधिदेवो भगवान् विष्णुर्यदा योगनिद्रानिगूढनयनो भवति, तदारजोगुणाधिदेवो भगवान् महेशस्तयोरेव देहयोरलक्षितरूपेण निगूढस्तिष्ठति। अस्यामेव दशायां ब्रह्मदेवः सृष्टिचक्रं चालयति, विस्तारयति च। पूर्वकल्पानुसारं नवीने कल्पे योगयुक्तान्तःकरणेन ब्रह्मणा धात्रा यथापूर्वमकल्पयत् इति ऋग्वेदानुसारं मानसी सृष्टिश्च क्रियते तदैव भगवतो ब्रह्मणोऽन्तःकरणतः ऋषीणां अन्तःकरणे आनन्दानुगतसमाधिद्वारैव वेदानामाविर्भावो भवति। विचारानुगतसमाधिद्वारा च पूर्वकल्पीयगाथानां भावरूपेण पुराणात्मना प्राकट्यमपि विज्ञानसिद्धमेव। तत्र वेदा यथावच्छब्दद्वारा पुराणानि च भावद्वारैवाऽविर्भावमासादयन्तीति सर्वसिद्धः पन्थाः।

मानवपिण्डेषु देवासुरराक्षसात्मिका त्रिविधाः, सृष्टयः दृष्टिगोचरी भवन्ति। तत्रैतावान् भेदो विद्यते यत् असुरलोकेषु आसुरीसृष्टेराधिक्यं दैवलोकेषु च देवीसृष्टिः बाहुल्यनोपलभ्यते, किन्तु मृत्युलोके त्रिविधा सृष्ट्यो दृष्टिगोचरतामुपयान्ति। तत्र पूर्वकालिककर्मानुसारेण कदाचिद् दैव्याः प्रजायाः कदाचन आसुर्याः कदाचिच्च राक्षस्या प्रजाया आधिक्यं जायते।

**तपसो महत्त्वम्**

स्वर्गे पाताले मृत्युलोके च निवासिभिर्जीवैः अलौकिकीशक्तिरैश्वर्यञ्च दुष्करेण तपसा संख्याध्यते। तपो हि जीवेषु अलौकिकीं शक्तिं सञ्चारयति। संसारे नैवंविधं किञ्चित्कार्यं वर्तते, यत्तपसा न सिध्येत। तपसा हि साधकोऽसंभवमि कार्यं संभवं कर्तुमर्हति। तथाचाह भगवान् मनुः।

यद्दुष्करं यद्दुरापं यद्दुर्गं यच्च दुस्तरम्।
तत्सर्वं तपसा साध्यं तपो हि दुरतिक्रमम्।।

अत एव मानवेषु देवेषु असुरेषु च तपसि प्रवृत्तिः स्वाभाविकी भवति। तपोऽनुष्ठानाय इमामेव कर्मभूमिमाश्रयन्ति सर्वे। किं बहुना ? तपोबलेनैव ब्रह्मा संसारं सृजति, विष्णुः पालयति, शिवश्चान्ते संबरति। अतेएव ब्रह्मसृष्टौ वैविध्यं विद्यते। ब्रह्मसमानाः अनेके महर्षयोऽपि सन्ति, ये मानसीं सृष्टिकर्तुं प्रभवन्ति। अत एव महर्षेः कश्यपात् मनोश्ट देवतापशुपक्षिस्थावरजङ्गमानां सृष्टिरुद्भवति।

ब्रह्मणो मानसीसृष्टिः श्रीमद्भागवते यथा-

भगवद्ध्यानपूतेन मनसाऽन्याँस्तदाऽसृजत्।
सनकञ्च सनन्दञ्च सनातनमथात्मभूः ।।

सनत्कुमारं च मुनीन् निष्क्रियानूर्ध्वरेतसः।

तान् बभासे स्वभूः पुत्रान् प्रजाः सृजत पुत्रकाः।।

तेनैच्छत् मोक्षधर्माणो वासुदेवपरायणाः।

किञ्च-

अथाभिध्यायतः सर्गं दशपुत्राः प्रजज्ञिरे।

भगवच्छक्तियुक्तस्य लोकसन्तानहेतवे।।

मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहःक्रतुः।

भृगुर्वसिष्ठो दक्षश्च दशमस्तत्र नारदः।।

उत्सङ्गान्नारदो जज्ञे दक्षोऽङ्गुष्ठात्स्वयंभुवः।

प्राणात् वसिष्ठः संजातो भृगुस्त्वचि करात्क्रतुः।।

पुलहो नाभितो जज्ञे कर्णयोर्ऋषिः।

अङ्गिरा मुखतोऽक्ष्णोऽत्रिर्मरीचिर्मनसोऽभवत्।।

अपि च- एते मनूंस्तु सप्तान्यानसृजन् भूरितेजसः।।

पञ्चधावस्थितः सर्वो ध्यायतोऽप्रतिबोधवान्।

वहिरन्तो प्रकाशश्च संवृतात्मां नगात्मकः।।

मुख्या नगा यतश्चोक्ता मुख्यसर्गस्ततस्त्वयम्।

तं दृष्ट्वाऽसाधकं सर्गममन्यदपरं पुनः।।

त्याभिध्यायतः सर्गं तिर्यक् श्रीताभ्यवर्तत।

तमप्यसाधकं मत्वा ध्यातोऽन्यस्ततोऽभवत्।।

ऊर्ध्वस्त्रोतास्तृतीयस्तु सात्विकोर्द्धमवर्तत।

ततोऽन्यं शतधा दध्यौ साधकं सर्गमुत्तमम्।।

असाधकांस्तु तान् ज्ञात्वा मुख्यसर्गादिसंभवान्।

तथाभिध्यायतस्तस्य सत्याभिध्यायिनस्ततः।।

प्रादुबभूव चाव्यक्तादर्वाक् स्त्रोतसस्तु  ते।

ते च प्रकाशबहुलास्तमोद्रिक्ता रजोऽधिकाः।।

तस्मात्ते दुःखबहुला भूयोभूयश्च कारिणः।

प्रकाशा बहिरन्तश्च मनुष्याः साधकाश्च ते।।

विष्णुपुराणे १ अंशे ३ अध्याये च-

ततोऽभिध्यायतस्तस्य जज्ञिरे मनसा प्रजाः।

तच्छरीरसमुत्पन्नैः कार्यैस्तैः करणैः सह।।

यदास्य ताः प्रजाः सर्वा न व्यवर्धन्त धीमतः।

यथास्य मानसान् पुत्रान् सदृशानात्मनोऽसृजत्।

भृं पुलस्त्यं पुलहं क्रतुमङ्गिरसं तथा।

मरीचिं दक्षमत्रं च वसिष्ठं चैव मानसान्।।

न केवलं पुराणेष्वेव, किन्तु वेदेऽपि मानस्याः सृष्टेः वर्णनस्ति। तथा हि मनसा साधु पश्यति, प्रजाः असृजन्त महाभारते च भगवान् महर्षिर्व्यासः-

प्रजापतिरिदं सर्वं मनसैवासृजत् प्रभुः।

तथैव देवानृषयस्तपसा प्रतिपेदिरे।।

आदिद्वसमुद्भुता ब्रह्ममूलाक्षयाव्यया।

सा सृष्टिर्मानसी नाम धर्मतन्त्रपरायणा।

तथा च सर्वसमर्थो ब्रह्मा प्रथमं मनसा एव सृष्टिं करोति या मानसी सृष्टिः एतादृशी पूर्णा समुत्पन्ना, यत्ते इच्छाविरहान् सृष्टिप्रवृत्तिविरहिता अभूवन्। ततो ब्रह्मणो द्वितीयया प्रजापतयः समुत्पन्नाः, सेयं सृष्टिः प्रथमसृष्टिऽवराऽस्ति। ते च मानससृष्टिकरणे प्रवृत्ताः तत्र सफला समर्थाश्च जाताः। ततो मानवपिण्डनां सृष्टिः प्रारब्धा। तदानीं सर्वे मनुष्यपिण्डधारणो जीवाः विभिन्नरूपग्राहिणः समानाधिकारसौन्दर्यशालिनो मानसमैथुनोभसृष्टिकरणे दक्षा आस्तिकाः पूर्णावयवाः पर्याप्तभोगा धर्मशीलश्च भवन्ति स्म। अतः प्रवाहानुगामिनः शनैः शनैः मानसवलह्वासात् मानसस-ष्टिशक्तिविलोपोऽभूत्। केवलं मैथुनसृष्टिरेवावशिष्टा। सृष्टेः प्रवाह उत्तरोत्तरं अधोमुखीनो भवति। परमकारुणिको भगवान् मनुः मनुष्यसृष्टिमनुगृह्य दृढदार्शनिकमुक्तबलेन वर्णाश्रमाणां सामाजिकशृङ्खलां धर्मच्युता आध्यात्मिकभावविरहिता कर्तव्याक्रतव्याज्ञानशून्याः सन्तो विलयं गताः स्यूः।

विष्णुपुराणे सृष्टेः बहवः स्तरा व्रणिताः सन्ति। एका अज्ञानयुक्ता प्रकाशहीना स्थावर,ष्टिः, यत्र केवलस्य अन्नमयस्य कोषस्य विकाशो भवति। द्वितीया स्वेदजाण्डडरायुजानां सृष्टिः, यत्र प्राणमयमनोमयविज्ञानमयकोषाणां किञ्चिद्विकाशो भवति। तत्र ज्ञानस्य लक्ष्यं नास्ति। तृतीया सृष्टिर्देवानामस्ति, ये भोगयोनयः सन्ति। ततो मनुष्याणां चतुर्थी सृष्टिः। मनष्येषु पञ्चानामपि कोषाणां पूर्णो विकाशो जायते। अतः ते साधकाः कर्मप्रवीणाश्च भवन्ति।

योगवलेन मानसिकप्रेरणाद्वारा गर्भाधानपूर्वकं सन्तानोत्पतिरपि श्रूयते, यथा भगवतो व्यासस्य दृष्टिपातमात्रेण धृतराष्ट्रस्य, ण्डोः विदुरस्य चोत्पत्तिः। स्त्रीपुरुषयोः संयोगं विनापि मानसिकशक्तिवलेनमनुष्योत्पत्तिरपि दृश्यते, यथा धर्मराजेन्द्रवाय्वादीनां देवानां मानसिकप्रेरणया युधिष्ठिरभीमार्जुनादीनामुत्पतिः, कालक्रमेण कलियुगे शनैः शनैः तपः शक्तेः ह्रासात् उपर्युक्तानां सृष्टीनां प्रवाहोऽवरुद्धः। केवलं मैथुनी सृष्टिरेवावशिष्टा। यस्य विस्तार इदानीं प्रचलति संसारे।

शंका- बहवो देशीया विद्वांसः समये संदिहन्ते यत् हिन्दूनामितिहासे न कुत्रापि जन्मसंबदुल्लेखो विद्यते, नापि विशेषघटनानां समये निर्दिष्टोऽस्ति। अतो भारतीयेतिहासः अनुपयुक्तोऽन्धकारमयश्चाति।

समीक्षा-द्विसहस्त्रवर्षमात्रे इतिहासे ईशामाधअयमेन जन्मतिथेरुल्लेखो भवितुमर्हति, किन्तु अतिविपुले चतुर्बदवर्षमिते इतिहासे ईशासमाः अनेके उत्पन्नाः अतोऽकिञ्चित्करीमिमां मत्वा त्रिकालदर्शिना महर्षिणा वेदव्यासेन समाधिना मन्वन्तरप्रणाली समाश्रिता। किञ्च ईशाःविषयेऽप्ययं निश्चयो नास्ति, यदयं सृष्टेः कियद्वर्षानन्तरं जातः ? तर्हि एतस्य माधअयमेन कालविभागस्य किं मूल्यमस्ति ? अपिच किम् ईसावर्षमेवमेवं प्रलयपर्यन्तं प्रचलिष्यति? लक्षवर्षाणां वार्ता तु दूरे तिष्ठतु, पञ्चसहस्त्रवर्षपूर्वकं प्रचलितो यौधिष्ठिरः सम्बत्सरो न सर्वैरिदानीं ज्ञायते, तर्हि ईशासम्वत्सरः सदा चलिष्यत्येवेत्यत्र कोऽस्ति निश्चयः? संभाव्यते चाचिरमेव स्वतन्त्रे भारते कदाचिद्दीशासम्वत्सरस्स्थगितः स्यात्। अतोऽस्माकं पूर्वजैः किञ्चिदनिश्चितमुपायममत्वा प्रत्येकं सिद्धान्तं सुनिश्चते सीम्नि समुपस्थापयन्ति। यथा

घटिकायां द्वादशभिः चिह्नैः एकस्य दिनस्य २४ घटिकासमयज्ञास्य व्यवस्था कृतास्ति तथैव पुराणेषु एकस्य कलपस्य दीर्घसमयज्ञानाय १४ मन्वन्तरमाध्यमेन व्यवस्था कृतास्ति। अतः सृष्टिकालतः प्रलयपर्यन्तं घटनाज्ञानाय मन्वन्तरपद्धतेराविष्कारः सर्वथोपयोगी युक्तियुक्तश्चास्ति।

यदि मन्वन्तमानेन केवलमिदमेव ज्ञातुं शक्यते यद् अमुकमन्वन्तरस्यामुकयुगे इयं घटनाऽजीघटत, तर्हि पाश्चात्यपद्धत्यापि केवलमिदमेव ज्ञायते यत् अमुकघटना इयद्वर्षपूर्वं परं वाऽजायत। पाश्चात्यपद्धतौ अपि मासतिथिघटनापलप्रतिपालानां तु ज्ञानं भवत्येव नहि। यथा अल्पीयसी द्विसहस्रात्मके काले केवलं वर्षज्ञानमेव पर्याप्तं भवति तथैव चतुरर्बदवर्षाणामितिहासे केवलं मन्वन्तरमात्रं युगज्ञानं वा कथं न पर्याप्तं स्यात्। तस्माद् यथा हानिर्भवति, तथैव मन्वन्तरपद्धावपि वर्षज्ञानं विनापि न कापि क्षतिर्भवितुर्महति। अतएवोक्तमभियुक्तैः-

यश्चोभयोः समो दोषः परिहारोऽपि तादृशः।

लैकः पर्यनुयोक्तव्यः तादृगर्थविचारणे।।

द्विसहस्रायुष्मत्याः पाश्चात्यजातेः अर्बुदवर्षायुष्मत्याः हिन्दुजातेश्च गणनायामेतावदन्तरं स्वाभाविकमस्ति। अतो यदि पाश्चात्यपद्धतौ केवलं पर्याप्तं वर्तते तर्हि अर्बुदवर्षात्मके हिन्दूनामितिदासे मन्वन्तरयुगज्ञानमेव पर्याप्तं प्रतीयते-

पुराणेषु या गाथा यानि चरित्राणइ याश्च ऐतिहासिकघटना वर्ण्यन्ते, तासां सर्वासां स्वरूपं समाधियोगेन समाधिगम्यत्रिकालदर्शी महर्षिः व्यासो लोककल्याणाय वर्णितवान्। पुराणेषु प्रतिपादिता देवपदाधिकारिणं देवानां च गाथआ सृष्टिसम्बन्धेनास्माकं

परमोपयोगिनी वर्तते। दैवे जगति मनुपदमेकमत्यन्तमहत्वपूर्णं पदमास्ते, तत् खलु प्रतिमन्वन्तरं परिवर्तते। मन्वन्तरं नाम देवराज्ये नानापरिवर्तनकारकः कालविशेषोऽस्ति, यथाऽस्मिन् मर्त्यलोके राज्ञाम्परिवर्तने अनेकविधं परिवर्तनमुपाजायते, तथैव प्रतिमन्वन्तरं देवलोकमृत्युलोकयोः सभ्यतास्वरूपं तच्छृङ्गलाविधानम्, तच्छासनपद्धतिश्चेति सर्वं परिव्रतते। यथास्मिन् लोके एकद्वित्रिचतुःपञ्चशतवर्षेषु सभ्यतासदाचारादीनां परिव्रतनं दृश्यते, तथैव प्रतिमन्वन्तरम मनोः परिवर्तनेन साकं देवराज इन्द्रः अन्य महान्तो देवपदाधिकारिणो नित्यर्षयः पितरश्च परिवर्तन्ते। तथाचोक्तम्-

सप्तर्षयः सुरा शक्रो मनुस्तत्सूनवो नृपाः।
एककाले हि सृज्यन्ते संह्रियन्ते च पूर्ववत्।।

(विष्णुपुराणे १ अंशे ३ अध्यायः)

अतः प्रतिमन्वन्तरं जीवानां शक्तौ, ज्ञाने, दैवजागतिकश्रृङ्खलादौ च महत् परिव्रतनमूपजायते। प्रतिमन्वन्तरं देवाः कर्मचालकाः, ऋषयो ज्ञानसञ्चालकाः, पितरश्च स्थूलभूतसञ्चालका भवन्ति। तेषामधस्तादनेके लघीयांसो देवपदाधिकारिणो भवन्ति, यथैकस्मिन् साम्राज्ये सम्राट् माम्डलिकादयश्च कार्यकारिणश्च पृथक् पृथक् भवन्ति, तथैव देवराज्ये इन्द्रेण सह अनेकेषां देवपदाधिकारिणां सम्बन्धो भवति। प्रतिमन्वन्तरं यदा दैवी श्रृङ्खलापरिवर्तते, यदा सृष्टेः बहवोंऽशाः, देवराजस्यानेका व्यवस्था अपि परिवर्तनं प्राप्नुवन्ति। प्रतिमन्वन्तरं यद् ज्ञानातारतम्यमुपलभ्यते, तत् तात्कालिकानां देवर्षिगणनां परिवर्तनमूलकमेवास्ति।

मन्वन्तरीयभूगोलेतिहासवर्णनेन सह वर्तमानभूगोलेतिहासयोः महत्पार्थक्यमस्ति। अतः कल्पान्तरीयेण मन्वन्तरीयेण भूगोलेतिहासेन सह आधुनिकभूगोलेतिहासयोः यदि सामञ्जस्यं न स्यात् तर्हि न कापि हानिर्भवितुमर्हति। पुराणेतिहासेषु समुपवर्णिता विषया न लौकिकेतिहासरूपाः सन्ति, किन्तु प्राधान्येन धर्मरहस्यप्रदर्शनप्रधानाः सन्ति। पुराणेषु इतिहासवर्णने सह आध्यात्मिकाधिदैविकाधिभौतिकविषयवर्णनमस्ति। अतः पुराणानि न लौकिकेतिहासरूपाणि भवितुमर्हन्ति।

त्रिकालदर्शी महर्षिर्व्यासःसमाधिधिया मन्वन्तरीयाः कल्पान्तरीयाश्च गाथाः सङ्कलय्य लोककल्याणहेतवो पुराणेषुप्रकाशयाञ्चकार। अतो नासां लौकिकैरितिहासैः सर्वांशेन सम्बन्धः। किं बहुना यदा इदानीमपि शतवार्षिके सहस्राब्दिके वा काले लौकिकेतिहासे देशकालपात्राणां सभ्यतायाः संस्कृतेश्च महत् परिवरितनमलोक्यते, तदा अनेकमन्वन्तरीये कल्पान्तरीये च विपुले काले कियत् परिवर्तनं भवितुमर्हतीति विद्वद्भिः स्वयमेव विचारणीयम्।

दैवराज्यस्य प्रधानतया त्रीणि कार्याणि सन्ति (१) कालव्यवस्था (२) कर्मश्रृङ्खला (३) पदाधिकारिणां सुव्यवस्था च। तत्र कालव्यवस्थापको राजा मनुरभिधीयते, कर्मफलदानेन सह जीवानां नियामको धर्मराजो विद्यते। अनेकविधानां देवपदाधिकारिणां प्रतिष्ठापको देवसत्वसुरक्षको देवराज इन्द्र उच्यते।जीवानां गमनागमनचक्रस्य नियामका अपरेपि अनेके देवाः तत्तत्पदेषु प्रतिष्ठिताः सन्ति।

यथाऽस्मिन् मृत्युलोके राजा, प्रजाः, राज्यशक्तिः, प्रजाशक्तिः, देशकालपात्राणां स्वरूपं च पृथक् पृथक् प्राप्यते, तथैव प्रतिमन्वन्तरं विभिन्नप्रकारको देवर्षिपितृसङ्घो जायते। तस्मात् प्रतिमन्वन्तरं देवराजस्य देवपदानाञ्च शृङ्खलायामवश्यं महान् भेदो भवितुमर्हति। मन्वन्तरपरिवृत्तौ मनुपदोऽन्यो मनुः प्रतिष्ठितो भवति। इमं कालपरिमाणं निरीक्ष्य बुद्धिमन्तो विद्वांस इदमवधारयन्ति यदेतस्मिन् महति काले बहु परिवर्तनं भवति। पदार्थविद्यावेदिनस्त्विदमामनन्ति यत् द्विसह्स्रवर्षानन्तरं प्रस्तरगृहादीनामपि न कापि सत्ता स्थातुमर्हति। एतावता महता कालेन सर्वत्र वननदीप्रभृतिषु बहुविधं परिवर्तनं भवति।

ब्रह्मण एकं दिनं कल्पः कथय्ते। एकस्मिन् कलपे चतुर्दश मन्वन्तराणि सहस्त्रसंख्याका महायुगाश्च भवन्ति। सत्य-त्रेता-द्वापर-कलियुगानामेको महायुगो भवति। एको महायुगो देवानां द्वादशसहस्त्रव्रषाणां भवति। तत्र चतुःसहस्त्रदिव्यव्रषाणां सत्ययुगं भवति। यथैकस्मिन् दिने प्रातःसन्ध्याकालः सायं सन्ध्याकालश्च भवति। तत्र प्रतियुगं युगारम्भे सन्ध्याकालः अन्ते च सन्ध्यांशकालोपि भवति। तत्र चतुःसहस्त्रदिव्यवर्षाणां सत्ययुगम्, चतुःशतानि वर्षाणि सन्ध्या, संध्यांशश्चास्ति। त्रिसहस्त्रदिव्यवर्षाणां त्रेतायुगम्, शतत्रयवर्षाणां संध्या संध्याशश्च। द्विसहस्त्रवर्षाणां द्वापरयुगम्, द्विशतवर्षाणां संध्या संध्यांशश्च भवति। एवमेकसहस्त्रदिव्यव्रषात्मकं कलियुगम्, शतवर्षात्मिका संध्या शतवर्षात्मकः संध्यांशश्च भवति। एवं सङ्कलना द्वादशसहस्त्रवर्षाणां एकं चतुर्युगं भवति। तथआ चोक्तम् मार्कण्डेयपुराणे ४६ अध्याये-

दिव्यैर्वर्षसहस्त्रैस्तु कृतत्रेतासंज्ञितम्।

चतुर्युगं द्वादशभिः तद्विभागं श्रृणुष्व मे।।

चत्वारि तु सहस्त्राणि व्रषाणां कृतमुच्यते।

शतानि संध्या चत्वारि संध्यांशश्च तथाविधः।।

त्रेता त्रीणि सहस्त्राणि दिव्याब्दानां शतत्रयम्।

तत्संध्या तत्समा चैव संध्यांशश्च तथाविधः।।

द्वापरं द्वै सहस्त्रेतु वर्षाणां द्वे शते तथा।

तस्य संध्या समाख्याता द्वे शताब्दे तदंशकः।।

कलिःसहस्त्रम् दिव्यानामब्दानां द्विजसत्तम ! ।।

संध्या संध्यांशकस्चैव शतकौ समुदाहृतौ।

एषा द्वादशसाहस्त्री युगाख्या कविभिः कृता।।

एतत् सहसर्गुणितम् अहर्ब्राह्ममुदाहृतम्।

ब्रह्मणो दिवसे ब्रह्मन् मनवः स्युश्चतुर्दश।

बवन्ति बागशास्तेषां सहस्त्रम् तद्विभज्यते।।

विष्णुपुराणस्य प्रथमेंऽशे तृतीयेऽध्याये च-

दिव्यैर्वर्षसहस्त्रैस्तु कृतत्रेतादिसंज्ञितम्।

चतुर्युगं द्वादशभिस्तद्विभागं निबोध मे।।

चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम्।

दिव्याब्दानां सहस्त्राणि युगेष्वाहुःपुराविदः।।

तत्प्रमाणैः शतैः संध्या पूर्वा तत्राभिधीयते।

संध्यांश्चैव तत्तुल्यो युगस्यानन्तरो हि सः।।

संध्या संध्यांशयोरन्तर्यः कालो मुनिसत्तम !।

युगाख्यः स तु विज्ञेयः कृतत्रेतादिसंज्ञितः।।

कृतं त्रेता द्वापरश्च कलिश्चैव चतुर्युगम्।

प्रोच्यते तत्सहस्त्रञ्च हब्रह्मणो दिवसं मुने ! ।।

ब्रह्मणो दिवसे ब्रह्मण ! मनव्सतु चतुर्दश ।

बवन्ति परिमाणं च तेषां कालकृतं श्रृणु।।

**दिव्यव्रषविवरणम्**

| | कालः | संध्या | संध्यांशः | योगः |
|---|---|---|---|---|
| सत्ययुगस्य | ४००० | ४०० | ४०० | ४८०० |
| त्रेतायुगस्य | ३००० | ३०० | ३०० | ३६०० |
| द्वापरयुगस्य | १००० | २०० | २०० | २४०० |
| कलियुगस्य | १००० | १०० | १०० | १२०० |
| सङ्कलनम् | | | | १२००० |

मनुष्याणां एकं वर्षं देवानामेकं दिनं भवति। एवं मानवीय ३६० वर्षाणां देवानामेकं वर्षं भवति। तच्च दिव्यं वर्षं कथ्यते। द्वादशसहस्त्रदिव्यवर्षात्मके काले दशसहस्त्रैः गुणनं कृत्वा पुनः ३६० गुणनेन मनुष्यवर्षाणि सिद्यन्ति। तथाहि एकस्मिन् कल्पे-१२००० x १०००= १२०००००० देववर्षाणि१२०००००० x३६०=४३२०००००००० मनुष्यवर्षाणि भवन्ति।

श्रीमद्भागवते तृतीयस्कन्धस्यैकादेशेऽध्यायेऽपि-

कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगम्।

दिव्यैः द्वादशभिर्वर्षैः सावधानं निरूपितम्।।

चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रममे।

सङ्ख्यातानि सहस्राणि द्विगुणानि शतानि च।।

सन्ध्यांशयोरन्तरेण यः कालः शतसङ्ख्ययोः।

तमेवाहुर्युगं तज्ज्ञा यत्र धर्मो विधीयते।।

त्रिलोक्या युगसाहस्रं बहिराब्रह्मणो दिनम्।

तावत्येव निशा तात ! यन्निमीलति विश्वसृक्।।

निशावसान आरब्धो लोककल्पोऽनुवर्तते।

यावद्दिनं बगवतो मनून्भुञ्जंश्चतुर्दश।।

स्वं स्वं कालं मनुर्भुङ्क्ते साधिका ह्येकसप्ततिम्।

त्रिंशत्कोट्यस्तु सम्पूर्णाः संख्याताः संख्यया द्विज !

सप्तषष्टितथान्यानि नियुतानि महामुने !।.

विंशतिस्तु सहस्राणि कालोऽयमधिकं विना।

मन्वन्तरस्य संख्येयं मानुषैर्वत्सरैर्द्विज! ।।

इति विष्णुपुराणवचनानुसारं प्रत्येकमन्वन्तरकालः मानवीय ३०६७२०००० वर्षात्मको भवति। तत्र वैक्रमीयसंवत् २०३६ पर्यन्तं वर्तमानस्य सप्तमस्य वैवश्वतनाम्नो मन्वन्तरस्य १२०५३३०८० वर्षाणि व्यतीतानि, १८६१८६९२० वर्षाणि चावशिष्टानि सन्ति।

## चतुर्दशानां मनूनां नामनि

मन्वन्तरवर्णनं प्रायः सर्वेषु पुराणेषु विद्यते। तत्र विष्णुपुराणे १ अंशे ३ अध्याये १४ मनूनां नमानि एवं निर्दिष्टानि सन्ति-(१) स्वायम्भुवमनुः (२) स्वारोचिषमनुः (३) त्तममनुः (४) तामसमनुः (५) रैवतमनुः (६) चाक्षुषमनुः (७) वैवस्वतमनुः (८) सावर्णिकमनुः (९) दक्षसावर्णिकमनुः (१०) ब्रह्मसावर्णिकमतुः (११) धर्मसावर्णिकमनुः (१२) रुद्रसावर्णिकमनुः (१३) रुचिर्मनुः (१४) भौममनुः। तथाहि-

स्वायंभुवो मनुः पूर्वः परः स्वारोचिषस्तथा।
उत्तमस्तामसश्चैव रैवतश्चाक्षुषस्तथा।।
षडेते मनवोऽतीताः साम्प्रतं तु रवेः सुतः।
वैवश्वतोऽयं यस्यैत्सप्तमं वर्ततेऽन्तरम्।।
सावणिस्तु मनुर्योऽसौ मैत्रेय ! भविताष्टमः।
नवमो दक्षसावर्णिर्भविष्यति मुने ! मनुः।
दशमो ब्रह्मसावर्णिर्भविष्यति मनुः मुने !।
एकादशस्तु भविता धर्मसाव्रणिको मनुः।।
रुद्रपुत्रस्तु सावर्णिर्भविता द्वादशो ! मनुः।
त्रयोदशो रुचिर्नाम भविष्यति मुने ! मनुः।
भौमश्चतुर्दशश्चात्र मैत्रेय ! भविता मनुः।।

एष मृत्युलोको हि उपरिवर्तमानानां सप्तलोकानामन्ततमस्य भूलोकस्य चतुर्थो भागः। अत्रत्या जीवाः मातृगर्भादुत्पद्यन्ते मृत्युमपि प्राप्नुवन्तीति हेतोः अयं मृत्युलोक इति

उच्यते। किञ्च मृत्युलोकप्रभवाः प्राणिनः स्वकीयकर्मपरवशाः सन्तो मृत्योरनन्तरं आतिवाहिकेन शरीरेण दैवसाहाय्यमवाप्य देवलोकेषु गच्छन्ति। तत्र स्वस्वकर्मानुसारं केचन स्वर्गलोके विविधं स्वर्गीयसुखमुपभुञ्जते। केचिच्च नरलोके पापकर्मपरिणाममनेकप्रकारं दुस्सहं दुःखमनुभवन्ति। मृत्युलोकादपरे त्रयो लोकाः देवलोकाः कथ्यन्ते। तेषु देवपिण्डधारिणो देवाः निवसन्ति, मानवपिण्डधारिणो मनुष्याः तान् द्रष्टुं न प्रभवन्ति। यदि तेषामनुग्रहो भवेत्, तदा द्रष्टुं शक्नुवन्ति। देवलोका अस्माकं मानवलोकादतीताः सूक्ष्माश्च सन्ति। तत्र यथा देवा देवपिण्डानि बिभ्रति, तथैवासुरा अपि देवपिण्डं दधति। तत्र विशेषस्तु एतावानेव वर्तते यद् आत्मोन्मुखव-त्तिप्रधाना देवाः इन्द्रियोन्मुखवृत्तिमुख्या असुराश्च भवन्ति।

तत्रोन्नतिकारिणो देवा न कदाचिदसुराणामधिकारमपहर्तुमिच्छन्ति, स्वाधिकारे एव ते सन्तुष्यन्ति, किन्तु विषयलोलुपा असुराः सर्वदैव देवाधिकारमात्मसात् करत् यतन्ते। एतदेव देवासुरसङ्ग्रामस्य मूलङ्कारणमस्ति। यदा देवासुरसंग्रामेऽसुराणां विजयो जायते, पराजीयन्ते च देवाः, तदाऽघटितघटनापटीयस्या ब्रह्मशक्तेः महामायाय अनुकम्पया असुराणां पराजयेन दैवराज्ये पुनः शान्तिरायाति।

भूलोकस्य चत्वारो भेदाः सन्ति। एकः पितृलोकः, यत्र धर्मजापरनामधेयस्य यमस्य राजधानी, संयमिनी वर्तते। द्वितीया नरलोकः, यत्राशुभकर्मकारिणो जीवाः फलभोगाय गच्छन्ति। तृतीयः प्रेतलोकः, यत्र मरणानन्तरं प्रेतभूता जीवाः कियत्कालं तिष्ठन्ति। चतुर्थश्चायं मृत्युलोकः, यत्र वयं वसामः। अस्मिन् मृत्युलोके एव मातृगर्भाज्जीवा जायन्ते, अन्यलोकेषु अयोनिजा एव जीवाः उपलभ्यन्ते। अस्य मृत्युलोकस्य

गमनागमनकेन्द्रस्थानत्वाज् जीवा पितृप्रेतनरकात्मके लोकत्रये स्वस्वशुभाशुभकर्मफलभोगाय वम्भ्रम्यमाणा पुनः मृत्युलोके एव जन्म लभन्ते। २०३६ वैक्रमीयसम्बत्सरपर्यन्तं ४०८० वर्षाणि व्यतीतानि, शेषाणि च ४३१४९१९ वर्षाणि सन्ति। अतोऽस्मिन् कल्पे ४३ चतुर्युगानि ७ मन्वन्तराणि ८ सन्धयः अवशिष्टानि सन्ति।

तथा च तद्विवरणम्-

| | |
|---|---|
| वर्तमानकलेः भुक्तवर्षाणि | ५०८१ |
| वर्तमानकलेः भोग्यवर्षाणि | ४३१४९१९ |
| शेष ४३ चतुर्युगानां भोग्यवर्षाणि | १८५७६०००० |
| भोग्यसन्ध्या सन्ध्यांशवर्षाणि | १३८२४००० |
| भोग्यसप्तमनुवर्षाणि | २१४७०४००० |
| | २३४७०५०९६८ |

एवञ्च २०३६ सम्बत्सरतः २३४७०५९६८ वर्षानन्तरमस्य ब्रह्माण्डस्य प्रलयो भविष्यति।

**प्रलयश्चतुर्विधः**

विष्णुपुराणस्य प्रथमेंऽशे सप्तमेऽध्याये नित्यनैमित्तिकप्राकृतात्यन्तिकभेदात् चतुर्विधः प्रलयः उक्तोऽस्ति। तथाहि-

नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको द्विजः !

नित्यश्च सर्वभूतानां प्रलय़ोऽयं चतुर्विधः।।

ब्राह्मो नैमित्तिकस्तत्र शेतेऽयं जगतीपतिः।

प्रयाति प्राकृते चैव ब्रह्माण्डं प्रकृतौ लयम्।।

ज्ञानादात्यन्तिकः प्रोक्तो योगिनः परमात्मनि।

नित्यः सदैवभूतानां यो विनाशो दिवानिशम्।।

तत्रैव ६ अंशे अध्याये सर्वेषां प्राणीनां प्रलयस्तु त्रिविध उक्तः।

तथाहि-

सर्वेषामेव भूतानां त्रिविधः प्रतिसञ्चरः।

नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको लयः।।

ब्राह्मो नैमित्तिकस्तेषां कल्पान्ते प्रतिसञ्चरः।

आत्यन्तिकस्तु मोक्षाख्यः प्राकृतो द्विपरार्द्धकः।।

तत्र श्रीमद्भागवतस्य १२ स्कन्धे ४ अधअयाये प्राकृतप्रलयो यथा-

द्विपरार्धे त्वतिक्रान्ते ब्रह्मणः परमेष्ठिनः।

तदा प्रकृतयः सप्त कल्पान्ते प्रलयाया वै।।

एष प्राकृतिको राजन् ! प्रलयो यत्र लीयते।

अण्डकोषस्तु संघातो विघात उपसाधिते।।

पर्जन्यः शतवर्षाणि बूमौ राजन्न ! वर्षति।

क्षयं यास्यन्ति शनकैः कालेनोपद्रिताः पर्जाः।।

सामुद्रं दैहिकं भौमं रसं सांवर्तको रविः।

रश्मिभिः पिवते घोरैः सर्वं नैव विमुञ्चति।।

ततः संवर्तको वह्निः संकर्षणमुखोत्थितः।

दहत्यनिलवेगोत्थः शून्.न् भूविवरानथ।।

उपर्यधःसमन्ताच्च शिखाभिर्वह्निसूर्ययोः।

दह्यमानं विभात्यण्डं दग्धगोमयपिण्डवत्।।

ततः प्रचण्डपवनो वर्षाणामधिकं शतम्।

शतवर्षाणि वर्षन्ति नदन्ति रभसस्वनैः।।

तत एकोदकं विश्वं ब्रह्माण्डविवरान्तरम्।

अर्थात्-ब्रह्मण आयुषः समाप्तौ प्राकृतः प्रलयः प्रारभते। तत्र प्रथमं शतवर्षाणि यावद्वृष्टिर्न भवति, प्रलयकालिकप्रखरसूर्यरश्मयो जलानि शोषयन्ति, येन सर्वे जीवाः कालकवलिता भवन्ति। ततः संकर्षणमुखोद्गतोऽनलः स्थावरजंगमात्मकं समस्तं संसारं भस्मसात्करोति। दह्यमानं चेदमखिलं विश्वं गोमयपिण्डमिव प्रतीयते। तदनन्तरं शतवर्षपर्यन्तं निरन्तरं धारासंपातं वर्षणं भवति, येन सकलं जगज् जलमयं जायते। उत्पत्तिसमयेऽनुलोमक्रमेण यत्तत्वं यत उत्पद्यते, प्रलयसमये विलोमक्रमेण तत्तत्वं तत्रैव लीयते। तथाचोक्तं श्रीमद्भागवते १२ स्कन्धे ४ अध्याये-

तदा भूमेर्गन्धगुणं ग्रसन्त्याप उदप्लवे।

ग्रस्तगन्धा तु पृथिवी प्रलयत्वाय कल्पते।।

अपां रसमयो तेजस्तल्लीयन्तेऽथ नीरसाः।

ग्रसते तेजसो रूपं वायुस्तद्रहितं तदा।।

लीयते चानिले तेजो वायोः खं ग्रसते गुणम्।

स वै विंशति खं राजंस्ततश्च नभसो गुणम्।।

शब्दं ग्रसति भूतादिर्नभस्तमनुलीयते।

तैजसश्चेन्द्रियाण्यङ्ग ! देवान् वैकारिको गुणैः।।

महान्ग्रसत्यहङ्कारं गुणाः तस्वादयश्च तम्।

ग्रसतेऽव्याकृतं राजन् ! गुणान् कालेन चोदितम्।

न तस्य कालावयवैः परिणामादयो गुणाः।

अनाद्यनन्यमव्यक्तं नित्यं कारणमव्ययम्।।

न यत्र वाचो न मनो न सत्त्वं

तमो रजो वा महदादयोऽमी।

न प्राणबुद्धीन्द्रियदेवता वा

न सन्निवेशः खलु लोककल्पः।।

नैमित्तिकप्रलयो यथा विष्णुपुराणे ६ अंशे ३ अध्याये-

चतुर्युगसहस्रान्ते क्षीणप्राये महीतले।

अनावृष्टिरतीवोग्रा जायते शतवार्षिकी।।

ततो यान्यल्पसाराणि तानि सत्त्वान्यशेषतः।

क्षयं यान्ति मुनिश्रेष्ठ ! पार्थिवान्यनुकीडनात्।।

ततः स भगवान्विष्णू रुद्ररूपधरोऽव्ययः।

क्षयाय यतते कर्तुमात्मस्थास्सकलाः प्रजाः।।

ततस्स भगवानविष्णुर्भानोस्सप्तसु रश्मिषु।

स्थितः पिबत्यशेषाणि जलानि मुनिसत्तम !।।

पीत्वाम्भांसि समस्तानि प्राणिभूमितान्यपि।

शोषं नयति मैत्रेय ! समस्तं पृथिवीतलम्।।

समुद्रान्सरितः शैलनदीप्रस्त्रवणानि च।

पातालेषु च यत्तोयं त्तसर्वं नयति क्षयम्।।

ततस्तस्यानुभावेन तोयाहारोपवृंहिताः।

त एव रश्मयस्सप्त जायन्ते सप्त भास्कराः।।

अधश्चोर्ध्वं च ते दीप्तास्ततस्सप्त दिवाकराः।

दहन्त्यशेषं त्रैलोक्यं सपातलतलं द्विज !।।

दह्यमानं तु तैर्दीप्तैस्त्रैलोक्यं द्विज ! भास्करैः ।

साद्रिनद्यर्णवाभोगं निःस्नेहमखिलं द्विज !।

भवत्येषा च बसुधा कूर्मपृष्ठोपमाकृतिः।।

ततः कालाग्निरुद्रोऽसौ भूत्वा सर्वहरो हरिः।

शेषो हि शअवाससम्भूतः पातालानि दहत्यधः।।

पातालानि समस्तानि स दग्ध्वा ज्वलनो महान्।

भूमिमभ्येत्य सकलं बभस्ति वसुधातलम्।।

भुवर्लोकं ततस्सर्वं स्वर्लोकं च सुदारुणः।

ज्वालामालामहावर्तस्तत्रैव परिवर्तते।।

अम्बराषमिवाभाति त्रैलोक्यमखिलं तदा।

ज्वालावर्तपरिवारमुपक्षीणचराचरम्।।

ततस्तापपरीतास्तु लोकद्वयनिवासिनः।

कृताधिकारा गच्छन्ति महर्लोकं महामुने ! ।।

तस्मादपि महातापतप्ता लोकात्तत परम्।

गच्छन्ति जनलोकं ते रुद्ररूपी जनार्दनः।

मुखनिःश्वासजान्मेघान्करोति मुनिसत्तमः ! ।।

ततो गजकुलप्रख्यास्तडित्वन्तोतिनादिनः।

उत्तिष्ठन्ति तथा व्योम्नि घोरास्संवर्तका घनाः।।

महारावा महाकायाः पूरयन्ति नभस्थलम्।

वर्षन्तस्ते महासारंस्तमग्निमतिभैरवम्।।

शमयन्त्यखिलं विप्र ! त्रैलोक्यान्तरधिष्ठितम्।

नष्टे चाग्नौ च सततं वर्षमाणा ह्यहर्निशम्।।

प्लावयन्ति जगत्सर्वमम्भोभिर्मुनिसत्तम् !

धाराभिरतिमात्राभिः प्लावयित्वाखिलं भुवम्।।

भुवर्लोकं तथैवोर्द्धं प्लावयन्ति हि ते द्विज !।

अन्धकारीकृते लोके नष्टे स्थावरजङ्गमे।।

वर्षन्ति ते महामेधा वर्षाणामधिकं शतम्।

एवं भवति कल्यान्ते समस्तं मुनिसत्तम !।

वासुदेवस्य माहात्म्यान्नित्यस्य परमात्तमः।।

सप्तर्षिस्थानमाक्रम्य स्थितेऽम्भसि महामुने !।

एकार्णवं भवत्येतत्त्रैलोक्यमखिलं ततः।।

मुखनिःश्वासजो विष्णोवार्युस्ताञ्जलदांस्ततः।

नाशयन्वाति मैत्रेय ! वर्षाणामपरं सतम्।।

अनादिरादिर्विश्वस्य पीत्वा वायुमशेषतः।।

एकार्णवे ततस्तस्मिञ्च्छेषशय्यागतः प्रभुः।

ब्रह्मरूपधरश्शेते भगवानादिकृद्धरिः।।

जनलोकगतैस्सिद्धैस्सनकाद्यैरभिष्टुतः।

ब्रह्मलोकगतैश्चैव चिन्त्यमानो मुमुक्षुभिः।।

आत्ममायामयीं दिव्यां योगनिद्रां समास्थितः।

आत्मानं वासुदेवाख्यं चिन्तयन्मधुसूदनः।।

एष नैमित्तिको नाम मैत्रैय प्रतिसञ्चरः।

निमित्तं तत्र यच्छेते ब्रह्मरूपधरो हरिः।।

प्रलयस्वरूपञ्च यथा यत्रैव-

नाहो न रात्रिर्न नभो न भूमिर्नासीत्तमो ज्योतिरभूच्च नान्यत्।

श्रोत्रादिबुद्ध्यानुपलभ्यमेकं प्राधानिकं ब्रह्म पुमांस्तदासीत्।।

**आवश्यकं वर्णाश्रमव्यवस्थासंरक्षणम्।**

पुराणानां प्रभावेण यावत्कालपर्यन्तं पवित्रतमेऽत्र भारतवर्षे वर्णाश्रमव्यवस्था सुरक्षिता स्थास्यति, तावत्कालमाध्यात्मिकलक्ष्योपेता धर्मप्राणा दिन्दूजातिर्न विनासमेष्यति, तद् द्वारा देवानां मानवानाञ्च कल्याणं सततं संपत्स्यते एव। यदा

वर्णसाङ्कर्येण पवित्रतमेयं वर्माश्रमश्रृङ्खला प्रणङ्क्ष्यति,तदा हिन्दुजातेः पतनमवश्यं भविष्यति। वर्णाश्रमश्रृङ्खलायां नारीणां पातिव्रत्यधर्मस्य महत्वं सर्वमतिशेते। पातिव्रत्यधर्मो हि वर्णाश्रमव्यवस्थायाः मूलमस्ति। व्रणाश्रमधर्मह्रासेनैव पातिव्रत्यधर्मस्य ह्रासः संभवति। राजेव प्रजा धर्ममार्गे प्रचालयितुं शक्नोति। यश्च नरेन्दो वर्णाश्रमश्रृङ्खलां सम्यक् प्रचालयति, स त्रिलोके वन्दितः स्वर्गसुखभाग् च भवति। तथाचोक्तं मार्कण्डेयपुराणस्य सप्तविंशे अध्याये-३०-३१।

वर्णधर्मा न सीदन्ति यस्य राज्ये तथाऽश्रमाः।
वत्स ! तस्य सुखं प्रेत्य परत्रेह च शाश्वतम्।।
उत्पथग्राहिणो मूढान् स्वधर्माच्चलतो नरान्।
यः करोति निजे धर्मे स राजा स्वर्गमृच्छति।।
वर्णाश्रमविरुद्धं च कर्म कुर्वन्ति ये नराः।
कर्मणा मनसा वाचा निरयेषु पतन्ति हि।।

वस्तुतो व्रणाश्रमव्यवस्थापालकानां सनातनधर्मिणाम् सकलं कर्मकदम्वं व्रणाश्रमधर्ममूलकमेवास्ति। व्रणाश्रमपरम्परायां रजोवीर्यशुद्धिः प्रधानास्ति। अत एव सवर्णविवाहः कामजः पापमयश्च आख्यायते। वर्णाश्रमव्यवस्थोपेक्षणात् ११३ अध्यायतोऽवगम्यते। वर्णाश्रमधर्मस्य मौलिकं दार्शनिकं च रहस्यमवलम्व्य हिन्दुजातिरस्मिन् विकरालेऽपि काले स्थिरा वर्तते। अत एव हिन्दूजातेः पवित्रतायाः संरक्षणाय व्रणाश्रमव्यवस्थायाः संरक्षणमत्यावश्यकमस्तीति पुराणानां सिद्धान्तः।

## मुक्तिप्रयोजकानि पुराणानि

ननु पुराणानां मुक्तिप्रयोजकत्वं कथमितिचेत्, अत्रोच्यते, ऋतम्भरप्रज्ञया कृतसर्वतत्वसाधश्रात्काराः लब्धयथार्थज्ञाना हि भारतीयसमाजनियमप्रवर्तका व्यासवाल्मीकिप्रभ-तयो महामुनयो समाजोपकाराय निरन्तरं प्रयतमाना आसन्। यथा यथा समाजेभ्यः पापानि दूकीभवितुमर्हन्ति, तथा तथा सततंते च्ष्टन्ते स्म। यथआ वा दुर्वृत्तेः सवलैः सुवृत्ताः दुर्वला नाभिभूयेरन्, पापाचारिभिः सत्क्रमचारिणो न पराभूयेरन्, समाजे किमप्यपूर्वं स्वर्गसुखमुपस्थाय मानवजन्म सार्थकं सम्भवेदिति सत्कर्मसु लोकानं स्पृहा समुपजायते, तथा नियमान् व्यवसथापयन्तः जगतीतलेऽस्मिन् आर्यं सनातनधर्ममक्षुण्णं परिपालयितुकामाः निष्कामा महामनसः पूज्यतमाः अपि भूतले विहरन्ति स्म।

इदमसत्कर्म, एतदाचरेणन एतदाचरणेन गाढतममसुखमुत्पद्यते सद्यः, येन पृथ्वीमिमां परिहाय लोकान्तरगमनेऽपि नास्ति निस्तारः। तत्र प्राक्तनेन दुष्कर्मणा प्राप्तं नरकमपि सर्वविद्दुःखदायकमुपस्थितं भवति, तदा समुपतिष्ठते चात्मनि ग्लानिः, जायते च पापकर्मणो घृणा, उत्पद्यते च मनसि एवंविधा भावना यत् यदि कदाचिद् भूयः मानवजन्म लभेयं तदा न पुनः पापलेशमपि समुपार्जयेयम्, येनेदानीमीदृशं कठोरतरं दुःसहं दुःखमनुभूयत इति।

एतच्च विवरणं पुराण-प्रणेता व्यासः सरसेन, सरलेन, सुगेन समीचीनेनोपन्यासमुखेन संयोजयामास। पुराणेषूपन्यासमुखेन पूर्ववृत्तं पठन्तो विजानन्तो जीवाः असत्कर्मणो विपन्निर्वर्तकतां सत्कर्मणश्च सुखादिसम्पादकतां ज्ञात्वा शुभकर्मणि

प्रवर्तन्तेऽसत्कर्मभ्.श्च प्रतिनिवृत्य सुखमयं संसारं कर्तुं प्रभवन्ति, विलसन्ति च स्वयं परमानन्दे परमात्मनि।

प्रथमतो वाल्मीकिनाम महर्षिः रामयणप्रणेताऽत्मनोऽद्भुते प्रब्नधकाव्ये वाल्मीकिरामायणे प्राधान्येन रामचरितं रावणचरितं च व्रणनीयतयाऽवाललम्वे। तत्र श्रीरामस्य मर्यादापुरुषोत्तमस्य स्त्रवजनप्रियस्य पुण्यमयं चरितम्, तदनुयायिनां लक्ष्मणादीनां विशुद्धं प्रेम, कौशल्यादीनां मातृणामादर्शं स्नेहातिरेकम्, हनुमदादीनां भक्तिवैलक्षण्यम्, सुग्रीवादीनामनुकरणीयं सख्यम्, निषादाधिपतेः सेवाकार्यं च प्रदर्शयामास। योनातिनिकृष्टे कष्टे निपतितोऽपि रामभद्रः कष्टं कष्टतया विज्ञानं न शशाक, महादुःखेऽपि काञ्चित् सुखसन्तर्तिं समाशिश्रिये।

तस्य ललनाजनललामभूता त्रिलोकरमणीमणिः सहधर्मिणी जनकनन्दिनी भगवती सीता मूर्तिमतीव सतीत्वख्यातेः, सर्वभोग्ययोग्ये यौवने वयसि सर्वं राजकीयं सुखमेकपदे परित्यज्य घोरप्रचारे कान्तारे सुखेन स्वं पतिदेवं श्रीराममनुवब्राज। पतिसुखेनैव सर्वं मन्यमाना यथा पत्युर्म क्लेशलेशः सम्भवेत्तथा सर्वदा यततेस्म।

रामः लोकशिक्षार्थमेव पितुरादेशसंकेतमात्रेण विमातुः प्रीतये उपस्थितमपि बसुधाधिपत्यं सहसा सहर्षं त-णाय मत्वा चतुर्दश व्रषाणि यावदर्ण्ये स्थितो न लेशतोऽपि दुःखं समाश्रयत्, प्रत्युत राजायभोग्यतोऽप्यधिकमेवानन्दं लेभे।

भरतो नाम कैकेयीगर्भजः महोदारतादिगुणगुम्फितहृदयः त्यागशीलनिधिरपि राज्यमनङ्गीकृत्य ज्योष्ठभ्रातरं श्रीमन्तं रामं प्रत्यावर्तयितुं चित्रकूटं प्रतस्थे। तत्रासफलो भरतः रामपादुकामेव गृहीत्वा स्वशिरसि च संवहन् तामेव राजसिंहासने संस्थाप्य स्वयं

नगराद्बहिरेव नन्दग्रामे रामस्य प्रत्यावर्तनं यावत् राम इव कृततापसवेशः समयमतिवाहितवान्।

एवं प्रकाराणि वहूनि आदर्शमयानि उपदेशप्रदानि समाजसमुन्नयनसाधनबूतानि राष्ट्रहितकाराणि उभयलोकसुखसम्पादकानि सद्वृत्तानि समुपलभ्यन्ते पुराणेषु इतिहासे च।

पुराणेतिहासयोरेतादृशानां सद्वृत्तानाम पर्यालोचनात् परिणामे रामादीनां सद्वृत्तधारिणां शुभसम्पादकतादर्शनेन जायते सद्वृत्तावलम्वने भूयसी समासक्तिः।

तत्रैव दुर्वृत्तानि अपि कानिचिदुपलभ्यते। यथाहि क्षपाचरराजो रावणः निखिलदुष्टकर्मानुबन्धी पापस्य सिन्धुरिव विविधदुर्विधानेन व्यस्तं चकार समस्तं जगत्, दुःखितानि च कृतवान् धर्मैकव्रतिनां निःस्पृहाणां यमनियमादिसाधनसमाशक्तमानसानां मुनीनां मनांसि, विध्यस्तवांश्च जगन्मङ्गलसाधनभूतं यज्ञादिकम् विश्वामित्रतपोवने राक्षसी राक्षसांश्चोपस्थाय।

तेन तेन पापसम्पादकेन धर्मविघ्नकर्मणा परिणामे राक्षसकुलविनिपात एव समुपलभ्यते। शुभकर्मानुरक्तानां शुभसम्पाताः, अशुऊकर्मविलम्विनामशुभसम्पाताश्च प्रादुरभवन्।

इतिहासेषु पुराणेषु च एवंविधानां सत्कर्मणां शुभहेतुतादर्शनेन, अशुभकर्मणामशुभहेतुताप्रदर्शनेन च लोकानां शुभेषु रतिमुत्पाद्य, अशुभकर्मणामशुभ-साधनतामावेद्य तत्र तत्र प्रवृत्तिवृत्तिसम्पादनद्वारा परमपुरुषार्थं प्रति अनुकूलता सम्भवति पुराणानाम्।

एवं महाभारते पुण्यचरित्राणां युधिष्ठिरादीनां शुभसाधकतां, पापाचारिणां दुर्योधनादीनां चरित्रवर्णनेन असद्वृत्तस्य परिणामे विनाशमात्रफलकतामुपदर्श्य तत्रैव सम्पादितः कोऽपि सद्वृत्तासद्वृत्तयोर्ग्रहणपरिहारोन्मुखप्रसारो नरसमाजेषु।

सन्ति हि पुराणेषु वबूनि पुण्यप्रक्रषसम्पादकानि वृत्तानि। यथा सुचरितानां चरित्रप्रकर्षवर्णनमुखेन दुष्टचरित्राणां चरित्रापक्रषवर्णनेन च सादारणजनानां व्यवहारविधौ शिक्षाप्रदानं पुराणानामुत्तमं कार्यं दर्शं दर्शं कस्य सहृदयस्य चेतो न चमत्कृतं भवति ?

पुराणेषु चतुर्णां वर्णानाम्, आश्रमाणाम्, पुरुषार्थानाम्, राजनीतेः, समाजरीतेः, लोकव्यवहारस्याचारविचारादीनां यथेष्टं वर्णनं विद्यते। उपासनाया भण्डारः, मुक्तिद्वारं च पुराणमेवास्ति। पञ्चदेवोपासनाया विचारः भगवदवतारादीनां विशेषता पुराणेषउ एव प्रतिपादिताऽस्ति। नवधाभक्तिकथा, भगवच्चरणेषु अनुरागविधिश्च पुराणेष्वेवोपलभ्यते। संसारस्य सर्वविधानां विषयाणामन्वेषणं पुराणद्वारैव भवितुमर्हति। किं बहुना ? लोकद्वयसाधनप्रकारः पुराणेष्वेवावलोक्यते।

एवं पुराणेषु महापुरुषाणां चरित्राणि वर्णितानि सन्ति। मनुष्याः हि पुराणानां कथाः श्रुत्वा चतुर्णामपि धर्मार्थकाममोक्षाणां साधनं कर्तुं शक्नुवन्ति। तस्मात्सिध्यति। निःशंसयं पुराणानां मुक्तिप्रयोजकत्वम्।

## पुराणेषु परस्परं विरोधस्यपरिहारः

यद्यपि तत्तत्पुराणेषु साम्प्रदायिकभावनाया प्रतीतिर्भवति। यथा-शिवपुराणे शिवः, विष्णुब्रह्मणोः स्त्रष्टा,विष्णुपुराणे विष्णुः श्वब्रह्मणोः निर्माता, देवीभागवते भगवती ब्रह्मविष्णुमहेशानां प्रसवित्री, सूर्यपुराणे च सूर्यस्यैव सर्वसवित-त्वं दृश्यते। किञ्च बहुषु

स्थलेषु  कथायामपि परस्परं भेदो दृश्यते, येन अष्टादशानां पुराणानां व्यासकर्तृत्वं न प्रतिभाति तथापि कल्पभेदाद्भेदप्रत्ययव्यवस्थया निर्वाहात् न कापि विप्रतिपत्तिः  सम्भवति। तथा चोक्तमभियुक्तैः-

कचित् कचित्पुराणेषु विरोधो यदि लभ्यते।

कल्पभेदादिभिस्तत्र व्यवस्था सद्भिरिष्यते।।

वस्तुतो नमोऽस्त्वनन्याय सहस्रमूर्तये सहस्राणि सहस्रशो ये रुद्रा अधिभूम्याम् इत्यादिवचनैरेक एव परमात्मा भक्तानां भावनानुसारं अनेकनामरूपभावादिभिर्वर्णितोऽस्ति। अतएव श्वेताश्वेतरोपनिषदि एको देवः सर्वभूतेषु गूढ ऋग्वेदे च-

इन्द्रं मित्रं बरुणाग्निमाहुरयो दिव्यः स सुपर्णो गरुत्मान्।

एकं सद्विप्रा बहुधा वदन्ति अग्नि यमं मातरिश्वानमाहुः।।

इत्यादिना स्पष्टतया एक एवेश्वरोऽनेकरूपैर्वर्णितो वर्तते। अत एव च महिम्नः स्तोत्रे पुष्पदन्ताचार्यः शिवं स्तौति-

रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषाम्,

नृणामेको गम्यस्त्वमसि पयसामर्णव इव।।

केवल  नोपासनाभेदेन एक एवेश्रः ब्रहमविष्णुशिवशक्तिसूर्यादिनाम्ना निरूपितोऽसि, न तेषु वासत्विको भेदोऽस्ति।

ये च तेषु वास्तविकं भेदं मन्यन्ते, न ते विचारवन्तः सन्ति। यथाचोक्तम्

ब्रह्माणं केशवं रूद्रं भेदभावेन मोहिताः।

पश्यन्त्येकं न जानन्ति पाखण्डोपहता जनाः।।

अपि च-

एका मूर्तिस्त्रयोदेवा ब्रह्माविष्णुमहेश्वराः।

अतएव श्रीमद्भगवद्गीतायां भगवान् श्रीकृष्णाः-

यो यो यां यां तनुः भक्तः श्रद्धयाऽर्चितुमिच्छति।

तस्य तस्याचला श्रद्धां तामेव विद्धाम्यहम्।।

तस्मात्-अष्टादशपुराणानां कर्त्ता सात्ववतीसुतः। इति वचनानुसारं अष्टादशपुराणनिर्माता व्यासदेव एवास्ति। तेनैव समन्वयात्मक-ष्ट्या विभिन्नसम्प्रदायोपासकानां भक्तानामिष्टदेवतासु श्रद्धोपदनाय तत्तत्पुराणेषु तत्तद्देवानामुत्कृष्टता प्रदर्शितास्ति। विचारपूर्वकं पुराणानामध्ययनेनेदं प्रतौयते यद् एकस्यैव परमात्मनो ब्रह्माविष्णुशिवशक्तिसूर्यादयः विभिन्नानि सगुणानि रूपाणि सन्ति। यतो हि सृष्टौ एषां कार्यं भिन्नं भिन्नमस्ति। तथा च-उपासकानां विभिन्नत्वात् पुराणानि विभिन्नदेवताभक्तिपोषकाणि सन्ति। यथाह स्कन्दपुराणस्य सृष्टिखण्डे-दशसु पुराणेषु भगवतः शिवस्य गुणानां कृतमस्ति। चतुर्षु पुराणेषु ह्रह्मणो महिमा वर्णितो विद्यते। पुराणायो देव्या उत्कर्षो व्रणितो वर्तते। तथा पुराणद्वये भगवतो विष्णो गौर्वं गीतमस्ति।

अष्टादशपुराणेषु दशभिर्गीयते शिवः।

चतुर्भिर्भगवान् ब्रह्मा द्वाभ्यां देवी तथा हरिः।। २।३०।३८

यो हि मनुष्यो यस्य द्वस्य भक्तो भवति, स तस्य देवस्य महत्त्वप्रकाशकं पुराणं विशेषतः समाद्रियते, श्रद्धाति च तत्र। अष्टादशसु महापुराणेषु भिन्नभिन्नसम्प्रदायसामग्री-

सत्वेऽपि वैष्णवशैव-शाक्त-पुराणेषु, अष्टादशानां पुराणानां पाठश्रवणयोः फलस्य वर्णनं सर्वेषां कृते समानमेवास्ति। तथाचोक्तम्-

अष्टादशपुराणानां नामधेयानि यः पठेत्।
त्रिसन्ध्यं लभते नित्यं सोऽश्वमेधफलं लभेत्।।
ये त्वेतानि समस्तानि पुराणानि च जानते।
भारतं च महावाहो ! ते सर्वज्ञा मता नृणाम्।।

## पुराणेषु विष्णोः शरीरावयवत्वकल्पनम्

पुराणेषु ब्रह्मपुराणं विष्मोर्मस्तकम्, पद्मपुराणं हृदयम्, विष्णुपुराणं दक्षिणो बाहुः, शिवपुराणंवामबाहुः, भागवतं वक्षःस्थलम्, नारदीयपुराणं नाभिः, मार्कण्डेयपुराणं दक्षिणपादः, अग्निपुराणं वामपादः, भविष्यपुराणं दक्ष्णजानु, ब्रह्मवैवर्त वामजानु, लिङ्गपुराणं दक्षिणगुल्फम्, वाराहपुराणं- वामगुल्फम्, स्कन्दपुराणम् रोमाणि, वामनपुराणं त्वक्, कूर्मपुराणं पृष्ठम्, सत्स्यपुराणं मेदः, गरुडपुराणं मज्जा, ब्रह्माण्डपुराणमस्थि चास्ति। एवम्प्रकारेणाष्टादशपुराणेषु एक व भगवान् विराजते। तथा चोक्तम् पद्मपुराणे स्वर्णखण्डे-

वैष्णवं दक्षिणो बाहुः वामो महेशितुः।
उरू भागवतम्प्रोक्तं नाभिः स्यान्नारदीयकम्।।
मार्कण्डेयञ्च दक्षाङ्घ्रिर्वामो ह्याग्नेयमुच्यते।
भविष्यं दक्षिणो जानुर्विष्णोरेव महात्मनः।।
ब्रह्मवैवर्तसञ्ज्ञन्तु वामो जानुरुदाहृतः।

लैङ्गन्तु गुल्फकं दक्षं वराहं वायगुल्फकम्।।

ब्राह्मं मूर्धारहेरेव हृदयं पद्मसंज्ञितम्।

स्कान्दं पुराणं लेमानि त्वगस्य वामनं स्मृतम्।।

कौमं पृष्ठं समाख्यातं मात्स्यं मेदः प्रकीर्त्यते।

मज्जा तु गरुडम्प्रोक्तं ब्रह्माण्डमस्थि गीयते।।

एवमेवाभवद्विष्णुः पुराणावयवो हरिः।। ६२।२-७

### अवतारतत्त्वमीमांसा

अवतारवादो हिन्दुधर्मस्यैकः प्रधानो विषयोऽस्ति। उपासनाप्रणाल्या सहावतारवादस्य महान्घनिष्ठः संवन्धो वर्तते। अवतारस्य व्स्तरेण वर्णनं पुराणेषु विद्यते। श्रीमद्भगवद्गीतायामपि भगवता श्रीकृष्णेनाऽर्जुनं प्रति आत्मनोऽनेकेषामवताकाणां चर्चा कृताऽस्ति। तद्यथा-

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन !

तान्महं वेद सर्वाणि न त्वं वेत्थ परन्तप ! ।।

यद्यपि धर्मान्तरेष्वपि रूपान्तरेणावतारत्वस्य सिद्धान्तः समुपलभ्यते, तथापि हिन्दुधर्मस्येदं वैशिष्ट्यमस्ति यदेतदीयमवतारतत्त्वस्य विज्ञानमेकस्यां सुदृढभित्तौ स्थितं वर्तते वेदपुराणदर्शनशास्त्रानुसारमीश्वरो मणिमालायां सूत्रमिव सर्वत्र व्यापिकोऽस्ति। तस्य चित्कला उद्भिज्जस्वेदजाण्डजजरायुजमानवदेवादिपिण्डेषु व्यापकाऽस्ति। अत एवेश्वरः सर्वान्तर्यामी सर्वव्यापकश्च निगद्यते। स्रवव्यापित्वेऽपीश्वरस्य चित्कलाया विकासे नियमोऽस्ति। अथोद्भिज्जयोनिषु भगवतः एकस्या एव कलाया विकासो विद्यते। स्वेदजैषु

द्वयोः, अण्डजैषु तिसृणाम्, जरायुजेषु च चतसृणां कलानां विकासो वर्तते। मनुष्येषु पञ्च कलातोऽष्टकला पर्यन्तं विकासो भवति। अष्टकलातोऽधिकाकलानां धारणसामर्थ्यं मनुष्येषु न तिष्ठतीति हेतोरितोऽधिककलानां यत्र विकासो भवति, तच्छरीरं दिव्यैरुपादानैरुत्पद्यते, तदेवावतारः कथ्यते। अष्टकलातोऽधिका कला अवतारकेलाः कथ्यन्ते। कलात आरम्य १५ कलापर्यन्तं विकासोंऽशावतारेषु भवति। पूर्णावतारे च षोडशानां कलानां विकासो जायते। अतो भगवतोऽवतारो विभिन्नासु कलासु भवति । तथा शम्भुगीतीयीम्।

ममैवेका कलाशक्तेरुद्भिज्जेषु विकासते।
स्वेदजेषु कलाद्वैतमण्डजेषु कलाद्वयम्।।
चतस्रश्च कला भान्ति जरायुजगणेऽखिले।
पञ्चक्रोशप्रपूर्णत्वान्मर्त्येषु प्रायशोऽमराः।।
आकलापचकादष्टकला नूनं चकासति।
नवारम्य कला यावत् षोडशं मे यथायथम्।।
संविकाश्यावतारेशु नानकेन्द्रोद्भवेषु च।
कुत्रचिन्मे प्रपर्यन्तेऽवतारे पूर्णसंज्ञके।।

अल्पज्ञत्वाज्जीवः सर्वज्ञो भवितुं नार्हति, किन्तचु स्रवव्यापित्वादीश्वरः सर्वज्ञोऽस्ति। सर्वज्ञत्वादेवेश्वरस्यावतारो भवति। एकस्य ब्रह्माण्डस्याधिष्ठानुरीश्वरस्य येऽवतारा भवन्ति, ते भगवदवताराः कथ्यन्ते। ब्रह्माण्डरक्षको भगवान् विष्णुरेवास्ति। अतः प्रायो विष्णोरेवावतारा भवन्ति।

यदा संसारं साधारणशक्तितः कार्यं न प्रचलति, धर्मस्य ह्रासो जायते, अधर्मश्च प्रवर्धते, असुरभावनापन्ना च भावना सज्जानानुद्वेजयति, तदा भगवान् स्वयमाविर्भूयाधर्मं नाशयति, दुर्जनान्निदस्य सज्जनान्पालयति। यथाचोक्तं गीतायामं स्वयमेव भगवता श्रीकृष्णेन-

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत !

अब्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।।

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।

धर्मसंस्थापनार्थाय संभवामि युगे युगे।।

अवतारप्रयोजनं प्रदर्शयता भगवता व्यासेनापि श्रीमद्भागवते स्पष्टमुक्तम्-

सत्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोः।

कुतोऽन्यथा स्याद्रमतः स्व आत्मनः सीताकृतानि व्यसनानीश्वरस्।। ५।१९।५

यथा निराकारा वाय्वग्न्यः सर्वव्यापित्वेऽपि संसारकल्याणाय साकारे काष्ठादिरूपे परिणता सन्तः लोकानुपकुर्वन्ति, तथैव सर्वव्यापको निराकारोऽपीश्वरः स्वमायासंयोगेन भक्तानां प्रार्थनानुसारं धर्मगोद्विजदेवसज्जनानां रक्षायै मानवादिशरीरेषु आविरभाव ! तथाचोक्तम् श्रीमद्भगवद्गीतायाम्-

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्।

प्रकृतिं स्वामधिष्ठाय, सम्भवम्यात्ममायया।।

विष्णुपुराणेऽपि-

गोविप्रद्विजसाधूनां छन्दसामपि चेश्वरः।

रक्षामिच्छन्तनुर्धत्तं धर्मस्यार्थस्य चैव हि।।

सर्वव्यापाकत्वात्परमात्मनः शक्तिरपि स्त्रवव्यापिकाऽस्ति। जडचेतनात्मकदृश्यद्वारैव तस्या विकासो भवति। अतएव विश्वस्मिन् यत्किञ्चिद् दृश्यते, तत्सर्वं तच्छक्तिरेवाऽस्ति। तथाचोक्तम् पञ्चदश्याम्-

स्त्रवशक्तिमयं ब्रह्म नित्यमापूर्णमव्ययम्।

यथोल्लसति शक्त्याऽसौ प्रकासमधिगच्छति।।

भगवतो विष्णोः कियन्तोऽवतारा भवन्तीति जिज्ञासायां चतुर्विंशत्यवतारान्निरूप्य श्रीमद्भागवते प्रथमस्कन्धे तृतीयाध्याये व्यायदेवेन लिखितं, यत्-

अवतारा ह्यसंख्येया हरेः सत्त्वनिधेर्द्विजाः!

यथा बिदासिनःकुल्याः सरसःस्युःसहस्त्रशः।।

ऋषयो मुनयो देवा मनुपुत्राः महौजसः।

कला सर्वे हरेरेव सप्रजापतयः स्मृताः।।

एते चांशकलापुंसः कृष्णस्तु भगवान् स्वयम्।

इन्द्रारिव्याकुलं लोकं मृडयन्ति युग् युग्।।

एतद्रपो भगवतो ह्यरूपस्य चिदात्मनः।

मायागुणैर्विरचितं महदादिभिरात्मनि।।

तत्रापि मुख्या दशावताराः सन्ति। तथाहि-

मत्स्यः कूर्मो वराहश्च नृसिंहो वामनस्तथा।

रामो रामश्च कृष्णश्च बुद्धः कल्किर्दश स्मृताः।।

यावदीश्वरनियमे काऽपि बाधा नोपतिष्ठते, तावन्नावतरति भगवान्। यदा तन्नियमेऽसामञ्जस्यमुपतिष्ठते तदा पञ्चकलात् आरभ्य अष्टकलासु स्वविभूतिद्वारापि कार्यं न प्रचलति, धर्मधारा अव्यवस्थिता बोभवीति तर्हि तां व्यवस्थापयितुं कदाचिद् अंशेन कदाचिच्च सर्वाभिः कलाभिर्वाऽवतरति भगवान्।

शास्त्रेषु पञ्चविधा अवतारा उपलभ्यन्ते (१) पूर्णावतारः (२) अंशावतारः (३) विशेषावतारः (४) अविशेषावतारः (५) नित्यावतारश्च। तत्रा कलाभेदेनावतारो द्विविधो भवति-पूर्णावतारः, अंशावतारश्च। ९ कलातः १५ कलापर्यन्तमवतारः अंशावतारः, कथ्यते। तथआ षोडशाभिः कलाभिरवतारः पूर्णावतारः प्रोच्यते, यथा परशुरामो द्वादशकलावतार आसीत्, किन्तु सीतास्वयंवरानन्तरन्तस्य कला यदा रामे आकृष्टास्तदा स केवलं मुनिमात्रमवशिष्टः। तथाचोक्तं वाल्मीकीये रामायणे अयोध्याकाण्डे-

ततः परशुरामस्य देहान्निर्गत्य वैष्णवम्।
पश्यतां सर्वदेवानां तेजो राममुपागमत्।।

यथा षोडशभिः कलाभिः परिपूर्णश्चन्द्रमा पूर्णः कथ्यते, तथैव यत्र बगवतः षोडशापि कला आविर्भवन्ति स भगवतः पूर्णावतारो निगद्यते। अतएवोक्तम् षोडशकलो वै पुरुषः इति। भगवतो वामनाद्यवतारा अंशावतारा आसन्। भगवान् श्रीकृष्णस्तु पूर्णावतार आसीत्। तथोचोक्तम् श्रीमद्भागवते-

अन्ये चांशकला पुंसः कृष्णस्तु भगवान्स्वयम् इति।

अंशावतारपूर्णवतारयोरिदमेवान्तरमस्ति यत्- अंशावतारस्य कर्म एकदेशस्यैककालस्यैकस्याः परिस्थितेः कदाचिदेकस्यापि कस्यचित्कृते हितकरं भवति,

किन्तु पूर्णावतारस्य कर्म संपूर्णस्य देशस्य सकलसय कालसय सर्वासामेव परिस्थितीनां सर्वेषां जीवानां च हिताय भवति। यथांशावतारस्य परशुरामस्य क्षत्रियसंहारकर्म तदानीमावश्यकमासीत्, किन्तु तत्सर्वदा आवश्यकं नास्ति। बुद्धसमये चेश्वरमुपेक्ष्य यज्ञविरोधं च विधाय अहिंसाप्रचारस्तदानीं परमावश्कः आसीत्, परन्तु यज्ञव्रोधो न सर्वकालोपयोगी विद्यते। किन्तु लीलापुरुषोत्तमस्य भगवतः श्रीकृष्णस्य यर्यादापुरुषोत्तमस्य चादर्शमयः कार्यकलापः सकलस्य देशस्य, कलाया आवस्थायाः, सर्वेषां जनानं च कृते अत्यन्तमुपयोगी अनुकरणीय आश्रयणीयश्चाऽस्ति। एवं निमित्तभेदादपि द्वापरावतारो भवतः, विशेषावतारोऽविश्षावतारश्च, थत्र विशेषावतारः दीक्षासमये शिष्याणामन्तः करणे भवति। अतएव गुरुर्ब्रह्मादिरूपो मन्यते। तथाहि-

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।

गुरुरेव परमब्रह्म तस्मै श्रीगुरवे नमः।।

अविशेषावतारेषु कादचित्को भगवद्भावस्यावेशो भवति। यदा भगवद्भावस्यावेशो भवति, तदा स भगवत्समो भवति, अन्यथा साधारणजन इव प्रतीयते। सनकादिनारदपृथुप्रभृतयो महापुरुषाः अविशेषा अवतारा आसन्। तथाचोक्तम्-

आविष्टोऽभूत् कुमारेषु नारदे च हरिर्विभुः।

अविशेषः पृथर्द्धः संखी चक्री चतुर्भुजः।।

मनुष्याणामन्तः करणेषु नित्यावतारो भवति, यथा सर्वशक्तिमतः तर्वव्यापकस्य ज्ञानमयस्य परमात्मनः सर्वत्र सत्वात्सर्वजीवानां हृदये विराजमानः स पापक्रमतः प्राणिनो

निवारयति, पुण्यक्रमणि च प्रेरयति येन जीवस्य पापकर्मतः सदा संकोचः, धर्मकार्येषु च प्रवृत्तिर्भवति।

सृष्टिकार्योपयोगिनो यस्य यस्यावतारस्य नाम्ना यद्यद् पुराणं निर्मितमस्ति, तत्र तत्र तस्य तस्यावतारस्य विशेषवर्णनं विद्यते. तद्वारा च कस्मैचिदुपदेशोऽवश्यं प्रप्यते। यथा मत्स्यद्वारा मनवे, कूर्मपुराणे कूर्मद्वारा देवताभ्यः, वाराहपुराणे वाराहद्वारा पृथिव्यै, नरसिंहपुराणे नरसिंहद्वार प्रह्लादाय, वामनपुराणे वामनद्वारा वलये उपदेशो दत्तोऽस्ति। सर्वेष्वपि पुराणेषु प्रायोऽवतारस्य चार्चाऽस्ति। तस्यैदमेव मुख्यं कारणमस्ति यन्मनुष्या अवताराणां चरित्रं श्रुत्वा महिमानञ्चावगत्य स्वान्तःकरणेषु भक्तिज्ञानवैराग्यादिद्वारा मानवजीवनस्य लक्ष्यभूतां भगवत्प्राप्तिं कर्तुं समर्था भवेयुः। पुराणेष्वैकमत्या स्वीकृतमस्ति यद् धर्मसंस्थापनद्वारा जगतो रक्षायै समये समये स्वयं सर्वशक्तिमान्परमात्मा पवित्रतमेऽत्र भारतवर्षेऽवतरति।

श्रीमद्भागवते प्रथमस्कन्धे कुन्तीस्तुतौ, दशमस्कन्धे गर्भगीतायां च भगवतोऽवतारविषयेऽनेकानि कारणानि बहवो युक्तयश्च प्रदत्ताः सन्ति जगति नैवविधं किञ्चत्स्थानमस्ति, यत्र सर्वव्यापकस्य निराकारस्य परमात्मनः सत्ता न स्यादतोऽवतारशब्दस्यामयर्थो नास्ति यत्परांत्मा कुतोऽप्यागच्छति, किन्तु अवतारशब्दस्य वास्तविकोऽयमऽर्थोऽस्ति यदव्यक्तरूपेण सर्वत्र विराजमानस्य परमात्मनो व्यक्तीभवनम्। ईशावास्यमिदं सर्वं यत्किचिज्जगत्यां जगत् इति यजुर्वेदानुसारं इदं जगति यत्किञ्चिदस्ति, तत्सर्वपरमात्मनः स्वरूपमेवास्ति। यथाच भगवान् विष्णुर्यदा जगद्रक्षाभिप्रायेण स्वचिन्मय कलायाः स्वशक्तेश्च प्रकाशं कस्यचन जीवस्याश्रयेणेह जगति विशेषतः

प्रकाशयति, तथा सैव लीलाविग्रहरूपा तस्य सर्वप्रत्यक्षावतारशब्दऽभिधेया भवति। अतो व्यक्तत्वेऽपि परमात्माऽव्यक्तोऽस्ति। प्राक्ट्येऽपि गुप्तेऽस्ति। यथा संसारारिणो अज्ञा जीवाः परमात्मनमनवगत्य अत्याचाराचारादिषु प्रवर्तन्ते, तदा जगतो व्यवस्थां कर्तुमेकस्याः शक्तेरेवावश्यकताऽस्ति। अतस्तद्रूपे स्वयं परामात्मैवावतरति।

न केवलं पुराणेष्वेव किन्तु वेदे ब्राह्मणे, आरण्यके, उपनिषदि, रामायणे महाभारते च अवताराणां प्रसङ्ग उपलभ्यते। यथा ऋग्वेदे-इदं विष्णुर्विचक्रमे त्रेधा निद्धे पदम्। (१।२२।१७) शतपथब्राह्मणे च वामनो ह विष्णुरासनम्। १२।५।५ इत्यादिना वामनावतारस्य प्रसंङ्ग उपलभ्यते। अथर्ववेदे-वराहेण पृथ्वी संविदाना (१२।१।४८)। तैत्तीरीयारण्यके च –

उद्धृताऽसि वराहेण कृष्णेन शतबाहुणा

आपो वा इदमग्रे सलिलमासीत् तस्मिन् प्रजापतिर्वायुभीत्वा चरत् सह मामपश्यत्, तं वराहो भूत्वा हरत्, स वराहोरूपं कृत्वाऽअप्सुन्यमज्जत्, स पृथ्वीमध्ये आर्छत्।

इतियादिना त वाराहवतारस्य प्रसङ्ग उपलभ्यते। शतपथब्राह्मणे च-

मानवे ह वै प्रातः मत्स्यः सहापाणी आपदे सहास्मै वाचमुवाच, विभृहि माम् पारिष्यामि त्त्वेति। कस्मान्मां पारयिष्यसीति औध इमा सर्वाः प्रजा निर्वोदा स्ततरुत्वा पारयिताऽस्मि। (१।८।१।१) इत्यादिना मत्स्यावतारस्योपा- ख्यानमुपलभ्यते। तैत्तिरीयारण्यके च कूर्मावतारस्य प्रसङ्ग एवमस्ति-

अन्तरतः कूर्मभूतः तमब्रबीत् मम वै त्वङ्मांसात् समभूत् नेत्यब्रवीत् पूर्वमेवाहमिहासम् इति तत्पुरुषस्य पुरुषत्वम् स सहस्त्रशीर्षा सहस्त्राक्षः सहसपाद् भूत्वोदतिष्ठत्। (१२३।।३) इति।

वज्रनखाय विद्महे तीक्ष्णदंष्ट्राय धीमहि तन्नो नरसिंहः प्रचोदयात् (१।१।३१) इतियादिना तैत्तिरीयाण्यके नरसिंहावतारस्य प्रसङ्ग उपलभ्यते। ऋग्वेदे-विश्वमित्रो यदवहत्सुदासम् (३।३।२२)

सामवेदे च-

शुभ्रकेतैद्युतिमिरग्निर्वितिष्ठिन्नुषद्भिर्वर्णैरभिराममस्थात्। (१५।२।१।३) इत्यादिना रामावतारस्य प्रसङ्ग उपलभ्यते।

ऋग्वेदे-

यद्प्रवीता दधते ह गर्भं सद्राचिज्जगतो भवसीदुदूतः (४।७।७।८)

अथर्ववेदे च-

घृतं पीत्वा मधु चाह गव्यं पीतेव पुत्रानभिरक्षतादिदम् (२।१३।१)

तैत्तिरीयारण्यके च-

नारायणाय विद्महे वासुदेवाय धीमहि तन्नो विष्णुः प्रचोदयात्। (१०।१।६)

छान्दोग्योपनिषदि च-

एतद्धोराङ्गिरस कृष्णाय देवकीपुत्रायोक्त्योवाच। (३।१९।६)

इतियादिना कृष्णावतारस्य च पुष्कलः प्रसङ्गः प्राप्यते।

वैदिकग्रन्थेषु येषामवताराणामाभासो मिलति तेषामेव पुराणेषु रूपान्तरेण विस्तार उपलभ्यते। तस्मात्पुराणप्रतिपादिता अवतारा वेदमूलका एव सन्तीति न कापि विप्रतिपत्तिर्भवितुर्महतीति विदांकुर्वन्तु विद्वांसः। एवं वैदिकवाङ्मयानुशीलनेन एष निष्कर्षोः निःसरति यद् यथा वेदो ज्ञान-कर्म-भक्तीनां मुद्गमस्थलं विद्यते तथाव भगवद्वतारणामपि मूलं स्रोतो वेद् एव।

ऋग्वोदे हि विष्णुसूक्तस्य विभिन्नेषु मन्त्रेषु वामनावतारस्य सङ्केत उपलभ्यते। शतपथब्राह्मणे च ऋग्वेदस्योरगायं त्रिविक्रमं भगवन्तं विष्णुं चैकीकृत्य पुराणेषु वामनावतारस्य पूर्णः प्रसङ्गः पस्तुतोऽस्ति तथान्तरमिदमेवास्ति यद् तत्र शतपथब्राह्मणे असुरेभ्यी भूमेर्हरणमुक्तमस्ति तत्र पुराणेषु वलेर्बलं पृथिव्या हरणं प्रप्रर्शितमस्ति। अपि च शतपथस्य कथानकं यत्र वैसुराणां भूमौ यज्ञस्य विस्तारं विधाय सा आत्मसात् कृता। तत्र पुराणेषु त्रिभिः क्रमैः पृथ्वी-बलिशरीराक्रमणानन्तरं वामनेन सकलां बूमिमसुरेभ्यो गृहीत्वा इन्द्रदेवाय समर्पिता। इत्थं शतपथीयं पौराणिकं चाख्यानं चनं विधते।

### भक्तितत्वविवेचनम्

यत्कीर्तनं यत्स्मरणं यदीक्षणं यद्वन्दनं यच्छ्रवणं यदर्हणम्।

लोकस्य यद्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमो नमः।।

इह खलु संसारे सुखं शाश्वतं भूयात्, दुःखं च कदाचिन्माभूदिति, दुःखं हातुं सुखञ्चोपलब्धुं सततमभिलषि प्राणिमात्रम्। तथाचोक्तं महाभारतस्य शान्ति पर्वणि- दुःखादुद्विजते जन्तुःसर्वस्य सुखमीप्सितम्। नहि कोऽपि विवेकी स्वल्पे सुखमनुभवति, सर्वोऽपि जनोऽधिकादधिकमेव सुखं वाञ्छति।

परन्तु नास्ति सांसारिकस्य सुखस्य काऽपि सीमा। एकस्य सुखदस्य वस्तुनः प्राप्तौ सत्यामन्यस्य कामना उत्तरोत्तरं जागर्त्येव। अत एवोक्तवान् राजा बर्तृहरिः वैराग्यशतके-

निस्वो वष्टि शतं शती दशशतं लक्षी सहस्राधियो

लक्षेशः क्षितिपालता क्षितिपतिश्चक्रेशतां वाञ्छति।

चक्रेशः पुनरिन्द्रतां सुरपतिर्ब्राह्मं पदं यजते

ब्रह्मा विष्णुपदं हरिः शिवपदं तृष्णार्धिं को गतः।।

गरुडपुराणेऽपि भगवान् व्यासः-

इच्छति शती सहस्रं सहस्री लक्षमीहते।

लक्षार्धिपस्तथा राज्यं राजा च स्वर्गमीहते।।

एवं च सुखान्वैषणे शती सहस्री भवितुमिच्छति, सहस्री लक्षी, लक्षी च राजा बुभूषति, राजा चक्रवर्ती, चक्रवर्ती चैन्द्रं पदमाकाङ्क्षति। जीवो यावदनन्तं सुखं न लभते, तावत् प्रयतमान एव तिष्ठति। तथआ चाह भगवती छान्दोग्यश्रुतिः-नाल्पे सुखमस्ति भूमैव सुखम्।

अवञ्च भगवत्साक्षात्कारस्वरूपमेवात्यन्तिकमनन्तं सुखमेव जीवस्य वास्तविकं लक्ष्यं चरममुद्देश्यं मानवशरीरलाभस्य फलञ्चास्ति , आत्यन्तिकं निरतिशयं सुखमेव मोक्षः, मुक्तिः, परमपुरुषार्थः, निःश्रेयसञ्चोच्यते। एतल्लब्ध्वा जीवः कृतकृत्यो ऊवति, न तस्य किञ्चित्कर्तव्यमवशिष्यते। एतदेव सुखस्य चरमा सीमा परमा च गतिरस्ति। तथाचोक्तं श्वेतश्वेतरोपनिषदि-म

तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय। ३।८

अपि च छान्दोग्यपनिषदि गार्गीं प्रति मैत्र्यः-आत्मा वा अरे द्रष्टव्यः श्रेतव्यो मन्तव्यो निदिध्यासितव्यश्च। ४।५

अतो निरवधिकस्य सुखराशेः परमात्मनः प्राप्तिरेव चरमं सुखमस्ति। अतः श्रीमद्भगवद्गीतामपि भगवता श्रीकृष्णेन स्पष्टमभिहितम्-

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः।
तस्मिन् स्थितो न दुःखेन विचाल्यते।।

यद्यपि अपाम सोमममृता अबूम् इति श्रुत्या सोमपानादिभिः लभ्यस्य स्वर्गादेरपि सुखसाधनत्वं प्रतीयते, तथापि क्षीणे पुण्ये मर्त्यलोकं विशन्ति इति गीतावाक्ये भोगेन पुण्यानां क्षयात्स्वर्गाच्चुतिदर्शनान्न तदात्यन्तिकं सुखसाधनं मन्यन्ते विद्वांसः।

वेदान्तसिद्धान्तानुसारं ब्रह्मैव पूर्णसुखस्वरूपं निरतिशयानन्दरूपमस्ति। अभेदोपासनया तत्साक्षात्कृत्य जीवः सर्वदुःखविमुक्तो भूत्वा परमानन्दं विन्दते शाश्वतीं शान्तिं लभते।

भेदोपासनया च परमात्मनः साक्षात्कारं सम्पाद्य जन्म-मृत्युबन्धनक्लेशरहितो जीवः सगुणस्य भगवतो नित्यलीलाधाम्नि अप्राकृतशरीरेण निवसन् भगवत्सान्निध्यसुखमनु-भवति। अतः भगवत्साक्षात्कारमन्तरा न किमप्यस्ति वास्तविकं सुखम्। निरतिशयसुखेप्सुभिः भगवत्स्वरूपसाक्षात्काररूपमुक्तयेऽवश्यं प्रयत्नो विधेयः।

श्रीमद्भागवतस्यैकादशे स्कन्धे विंशत्यध्याये-

योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया।
ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित्।।

कर्मभिर्भगवद्भक्तिर्भवतीशकृपा तथा।

ज्ञानं तेन विमुक्तिश्च मोक्षधर्मार्थसंग्रहः।।

इतिवचनानुसारं मुक्तेः प्रधानानि त्रीणि साधनानि सन्ति। न्ष्कामं कर्म, ज्ञानं, भक्तिश्चेति। तेषु ज्ञालस्य कृपाणधारासमानत्वेन सर्वसुलभत्वाभावात्-निष्कामकर्मणश्च कष्टसाध्यत्वाद्भक्तिरेव सर्वसाधारणा सुभगा सुलभा च प्रतीयते।

सत्ययुगादौ ज्ञानवैराग्ययोर्मोक्षसाधकत्वेऽपि कलियुगे भक्तेरेव प्राधान्यमस्ति। तथाचोक्तं पद्मपुराणस्य श्रीमद्भागवतमाहात्म्ये-

सत्यादित्रियुगे बोधवैराग्यो मुक्तिसाधकौ।

कलौ तु केवलं भक्तिर्ब्रह्मसापुज्यकारिणी।। २।४

किञ्च- न तपोभिर्न वेदैश्च न ज्ञानेनापि कर्मणा।

हरिर्हि साध्यसे भक्त्या प्रमाणं तत्र गोपिकाः।। २।१८

तत्र कः भगवान् ? काच तस्य भक्तिः ? इति प्रश्ने संक्षेपादिदमेव वक्तुं शक्यते यत्- यः सर्वशासकः, सर्वशक्तिमान्, सर्वान्तर्यामी, सर्वसाक्षी सर्वज्ञश्चास्ति, यस्य भक्त्या मानवः सकलदुर्गुणदुःखविमुक्तो भूत्वा विशुद्धो भवति। योऽजोऽपि जीवेषु दयां कृत्वा-

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत !

अब्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।।

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।

धर्मसंस्थापनार्थाय संभवामि युगे युगे।।

इति गीतायां स्वकीयप्रतिज्ञानुसारं जीवानां कल्याणाय, धर्मप्रचाराय, दुष्टदलनाय च समये समये स्वलीलया देवमनुष्यपशुपक्ष्यादिषु साकाररूपेण प्रकटीभूय भक्तानाह्लादयति, शास्त्रीयमर्यादां स्थापयति, सुखयति च लोकम्। यश्च सत्ययुगे हरिरूपेण, द्वापरे कृष्णरूपेणाविर्भवति, स एव नित्यः, अविनाशी विज्ञाननन्दघनः सर्वव्यापी परमात्मा भगवान् बोद्धव्यः।

भक्तेः किंस्वरूपम् ? इति जिज्ञासायाम् प्राह महर्षिः शाण्डिल्यः-

सा परानुरक्तिरीश्वरे

देवर्षिर्नारदः- सा त्वस्मिन्परप्रेमरूपा, अमृतस्वरूपा च

अङ्गिरसाश्च-सानुरागरूपा

नारदपञ्चरात्रे तु-

सर्वोपाधिबिनिर्मुकतं तत्परत्वेन निर्मलम्।

हृषाकेण हृषीकेशसेवनं भक्तिरुच्यते।। इत्युकत्म्।

भिरिदं ज्ञायते यत् भगवति अनन्यं प्रेमैव भक्तिरस्ति।

भजसेवायामितिधातोः क्तिन्प्रत्ययेन निष्पन्नो भक्तिशब्दार्थः सेवाऽस्ति। यथा वृक्षस्य पूर्णता फलेनास्ति, तथा भक्तेः पूर्णता भगवत्यनन्यप्रेम्णैवास्ति।

यद्यपि भगवद्भक्तौ जीवमात्रस्यास्त्यधिकारो न्याययुक्तः हनुमज्जाम्ववद्गरुडगजेन्द्रकाकभुसुण्डिजटायुः प्रभृतीनां पशुपक्षिप्लवङ्गमादीनां साधनयोरभावादीश्वरर्भक्ति कर्तुमसमर्थतया शासात्रकार ईश्वरभक्तौ प्रधानतया मनुष्याणामेवाधिकारं वदन्ति। तथा च बादरायणसूत्रम्-

शास्त्राधिकारत्वान्मनुष्यस्य

भगवद्भक्तौ रूपस्यायुषश्च न मूलमस्ति, न च विद्याया, धनस्य जातेश्चोक्तर्षोंऽप्यपेक्ष्यते। न वा सदाचारस्य सद्गुणास्य च प्राधान्यमस्ति, नापि बलं मुख्यं विद्यते, किन्तु प्रमैवानन्यं प्रतीक्षते भगवान्। तथाचोक्तं जीवगोस्वामिना-

व्याधस्याचरणं ध्रुवस्य च वयो विद्या गजेन्द्रस्य का ?

का ज्ञातिर्विदुरस्य यादवपतेरुग्रस्य किं पौरुषम् ?

कुब्जायाः कमनीयरूपमधिकं किं तत्सुदाम्नो धनम् ?

भक्त्या तुष्यति केवलं न च गुणैर्भक्तिप्रियो माधवः।।

भगवतः भक्तेन समः प्रियो न वैकुण्ठवासो नापि विशुद्धं योगिनां हृदयं विद्यते, किन्तु कीर्तनमेवास्ति सर्वप्रियं भगवतः। तथाचोक्तं नारदं प्रति भगवता विष्णुना-

नाहं वसामि वैकुण्ठे योगिनां हृदये न च।

मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद ! ।।

प्रगाढ्या भक्त्या प्रसन्नो भगवान् सर्वमपि कार्यं परित्यज्य एकस्य कृतेऽलौकिकं कर्म निवर्तयति-असम्भवञ्च सम्भावयति। तथाच सर्वशक्तिसम्पन्नः कर्तुमकरत्मन्यथाकर्तुसमर्थोऽपि भगवान् कृष्णः पाण्डवकुलनन्दनस्य धर्मराजस्य भक्तिगुणगरिम्णा प्रसन्नोः भगवान् कौरवकुलं दूरे परित्यज्य पाण्डवकुलस्य संगलचिन्तायां नियतं व्यापृतो बभूव, अर्जुनस्य रथे हीनकर्म सारथ्यमपि स्वीचकार।

भगवान् प्रह्लादस्य भक्त्याकृष्टो यत्र यत्र तस्य विपदमभिलक्षितवान् तत्र तत्र तां वारयितुं प्रववृते। महोन्मत्तस्य करिणः पादतलेन मर्दितः शैलशिखाराद्भूमौ पिरक्षिप्तः

जीवनापहारकं च विषलड्ङुकं मधुरमोदकत्वेन परिणमय्य भगवता परिपालितः प्रह्लादः। हरिनामस्मरणमात्रेन पृष्टः सर्वत्रैव वर्ते मे नारायणः इत्युक्तवान्। पुनः यदि सर्वत्रैव वर्तते ते नारायणस्तदत्र स्तम्भे अपि वर्ततां नाम इत्युक्तवति पितरि बाढमिति यदा प्राह, प्रह्लादः तदैव तेन सवेगमभिहतात् स्तम्भान्नारायण उत्कटे नृसिंहरूपे आविर्भूय भक्तस्य प्रतिकूलाचारिणं हिरण्यकशिपुं नखैर्विदारयन् पञ्चत्वं प्रापयामास, प्रह्लादं च तत्रैव राज्येऽभिषिच्य भक्तस्य भगवच्चिन्तनपरस्य साहाय्यं सम्पादनमास। तथाचाह श्रीमद्भागवते वसदेवः-

सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्मनः।

अदृश्यतात्यद्भुतरूपमुद्वहन् मध्ये सभायां न मृगं न मानुषम्।।

एवं पञ्चवर्षयस्कस्य ध्रुवस्य हिंस्रकपसमाकीर्णेऽरण्ये रक्षां चकार। तस्य परमया भक्त्या सुकृतरां सन्तुष्टो भगवान् स्वकीयवैकुण्ठलोकादप्युपरि कञ्चिन्नूतनं लोकं तदर्थं निर्माय प्रदर्शितवान् भक्तजने किमपि स्नेहातिरेकम्। द्वापरे द्रौपदी यदा दुःशासनेन केशेषु परिगृहीता कौरबसभायां विवस्त्रां करत्मभिलषिता, तदा तस्या एकान्तया भक्त्या तया-

गोविन्द ! द्वारिकावासिन् ! कृष्ण ! गोपीजनप्रियः !

कौरवैः परिभूतां मां कि न जानासि केशव !

कौरवार्णवमग्नां मामुद्धरस्व जनार्दन !

प्रपन्नां पाहि गोविन्द ! कुरुमध्येऽवसीदतीम्।। १।६८।४१-४२

इत्येवमभ्यर्थितो भगवान् तस्या वामनरूपेण परिणतो भूत्वा लज्जां परिरक्ष्य दर्शितवान् भक्तिमर्यादां प्रचारितवांश्च द्रौपद्याः पातिव्रत्यधर्मकर्षम्।

याज्ञसेन्या वचः श्रुत्वा कृष्णपहरितीऽभवत्।

त्यक्त्वा शय्याशनं पद्भ्यां कृपालुः कृपयेऽभ्यगात्।।

कृष्णं च विष्णुं च हरिं नरं च

त्रणाय विक्रोशति याज्ञसेनी।

ततस्तु धर्मोऽन्तरितो महात्मा

समावृणो द्वै विविधैः सुवस्त्रैः।। १।६८।४३

भक्तेः प्रणयस्य हृदयानुरागरूपस्य स्नेहस्य च दृश्यते समुत्कर्षः वृन्दावनलीलायाम्। तत्र हि परमया भक्त्याप्रणयादिना वा समाकृष्टो हरिः सर्वेषामेव काम्यं फलं सम्पादयामास। बालोऽपि कृष्णः शिशुजनैरसाध्यानि कानिचित् कर्माणि सम्पाद्यात्मन ईश्वरतां दर्शितवान्। अम्बरीषपृथुप्रभृतयो राजानः प्रेम्णा भगवन्तमर्चयित्वाऽनायासेन तं प्रापुः। सुदामा केवलैः पृथकतण्डुलकणैः, गजेन्द्रः केवलेन पुष्पेण, सवरीच बदरीफलैरेव भगवन्तं सन्तोष्य स्वीया स्वीयामिभिलाषा पूरितवन्तः, प्राप्तवन्तश्च तत्कृपया परमं पदम्। एतत्सर्वं पर्यालोच्येदं वक्तुं शक्यते यत्सत्यमुक्तं भगवता गीतायाम्-

पत्रं पुष्पं फलं यो मे भक्त्या प्रयच्छति।

तदहं त्त्युपहृतमश्नामि प्रयतात्मनः।।

अनन्यया भक्त्या संतुष्टो भगवान् भक्तस्य सर्वविधां विपदं वारयति मनोरथं च सर्वं पूरयति। तथोचोक्तं श्रामद्भागवते-

समाश्रिता ये पदपल्लवप्लवम्, महत्पदं पुण्ययशो मुरारेः।

भवाम्बुधिर्वत्सपदं परं पदम्, पदं पदं यद्विपदो न तेषाम्।. १०।१४।५८

भगवति समासक्तो मुक्तिं लब्ध्वा न च पुनः जन्ममरणचक्रे चंक्रमितो भवति। तथाचोक्तं श्रामद्भागवते-

श्रृण्वन् गृणन् संस्मरयंश्च चितयन् नामानि रूपाणि च संगलानि ते।

क्रियासु यावच्चरणर्विदयोराविष्टचेता न पुनर्भवाय।। १०।२।३३

## भक्तेर्वर्गीकरणम्

यद्यपि भक्तेः वर्गीकरणविषये विदुषां भिन्नं भिन्नं मतं विलोक्यते, तथापि प्रधानतया निम्नाङ्कितं मतद्वयं सर्वासाधारणं प्रचलति।

(१)भक्तिस्तावद् द्विधा, गौणी पराभेदात्। गौणी पुर्द्विधा-वैधी रागात्मिका च। वैधी अपि पुनर्नवधा विभज्यते। तथाहि श्रीमद्भागवते प्रह्लाद उत्तमाध्ययनमभिलक्ष्य दैत्यबालकानवोचत्-

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।

अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्।७।५।२३

इति पुंसर्पिता विष्णौ भक्तिश्चेन्नवलक्षणा।

क्रियते भगवत्यद्धा तम्मन्येऽधीतमुत्तमम्।। ५।२३,२५

तथाच गुरूपद्शाद्- विधिनिषेधानुकूलं साधनं कुर्वतो भक्तस्य हृदये प्रथमं या भक्तिरुदेतिसा वैधी भक्तिरुच्यते। ततो निरन्तरम् भगवच्चरणारविन्दविषयिणी रागात्मिका भक्तिरुदेति, यया भक्तहृदये आनन्दशान्तिसञ्चारो भवति। तस्य मनोमधुपः

प्रभुपादपद्ममकरन्दपानमत्तः सर्वत्र प्रभुमेव पश्यन्नानन्दनिमग्नस्तिष्ठति। अस्यामवस्थायामेव भगवन्तं श्रीकृष्णमुक्तवत्यो ब्रजवाला रासलीलायाः समये-

चित्तं सुखेन भगवतापहृतं गृहेषु
यन्निर्विशत्युत करावपि गृह्यकृत्ये।
पादौ पदं न चलतस्तवपादमूलात्
यामः कथं व्रजमथो करवाम किम्वा।। १०।२९।३४,३५

रागात्मिकायां भक्त्या भगवत्प्रेमविह्वलो भूत्वा भक्तः उन्मत्तवन्नृत्.ति, रोदिति, गायति, हसति च। तथाचोक्तम्-

वाग् गद्गदा द्रवते यस्य चित्तम्
रुदत्यभीक्ष्णं हसति क्वचिच्च।
निर्लज्ज उद्गायति नृत्यते च
मद्भक्तियुक्तो भुवनं पुनाति।। ११।१४।२४

एवं गुरुशास्त्राज्ञानुसारं वैधीं भक्तिमभ्यस्यतो भक्तस्य हृदये सा रागात्मिका भक्तिरुदेति, यस्यां भक्तहृदयं सांसारिकवुषयेभ्य उपरतं भूत्वा भगवति लीनं भवति। एतत् परिपक्वदशायाः परिणामः परा भक्तिरस्ति। यस्याम् अहङ्कारदेहात्मभावौ नश्यतः, सर्वात्मदृष्टिश्च जायते। तथा चोक्तं श्रीशङ्कराचार्यपादैः-

सम्पूर्णं जगदेव नन्दनवनं सर्वेऽपि कल्पद्रुमाः,
वाचः वारि समस्तवारिनिवहाः पुण्याः समस्ताः क्रियाः।
वाचः प्राकृतसंस्कृताः श्रुतिगिरो वाराणसी मेदिनी

सर्वावस्थितिरस्य वस्तुविषया दृष्टे परे ब्रह्मणि।।

(२) श्रीरूपगोस्वामिना भक्तिरसामृतसिन्धौ तु भक्तेः त्रिधा मेदः कृतोऽस्ति। साधनं, भावः, प्रेमा च। साधनभक्तिः पुनः द्विविधा वैधी रागानुगाभेदात्। तथा चोक्तम्-

सा भक्ति साधनं भावः प्रेमा चेति त्रिधोदिता।

वैधी रागानुगा चेति सा द्विधा साधनामिधा।।

तत्र वैध्याः स्वरूपम्-

यत्र रागानवाप्तत्वावृत्तिरुपजायते।

शासनेनैव शास्त्रस्य सा वधी भक्तिरुच्यते।।

यथा श्रीमद्भागवते-

तस्माद्भारत ! सर्वात्मा भगवान् हरिरीश्वरः।

श्रोतव्यः कीर्तितव्यश्च सर्वश्चेच्छताऽभयम्।। २।१।५

इयं वैधी भक्तिरेकाङ्गाऽनेकाङ्गाभेदेन द्विधा भवति। तदुक्तम्-

सा भक्तिरेवमुख्याङ्गाश्रितानाकाङ्कगका थवा।

स्ववासनानुसारेण निष्ठातः सिद्धिकृद्भवेत्।।

एकाङ्गा यथा-

श्रीविष्णोः श्रवणे परीक्षिदभवद्वैयासकिः कीर्तने

प्रह्लादः स्मरणे तदङ्घ्रिभजने लक्ष्माः पृथुः पूजने।

अक्रुरस्त्वभिवादने कपिपतिर्दास्येऽथ सरव्येऽर्जुनः

सर्वस्वात्मनिवेदने वलिरभूत्कृष्णाप्तिरेषां परम्।।

अनेकाङ्गा यथाराज्ञोऽम्वरीस्य चरित्रे श्रीमद्भागवते-

स वै मनः कृष्णापदरविन्दयोः

वचांसि वैकुण्ठगुणानुवर्णने।

करौ हरेर्मन्दिरमार्जनादिषउ

श्रुतिं चकाराच्युतसत्कथोदये।।

अथ रागानुगा यथा-

विराजन्तीमभिव्यक्तं व्रजवासिजनादिषु।

रागात्मिकामनुसृता या सा रागनुगोच्यते।।

सा च कामद्वेषभयस्नेहादिसम्बन्दादनेकधा भवति।

यथाह श्रीमद्भागवते-

कामाद् द्वेषाद्भयात्स्नेहात्सन्बन्धादीश्वरे मनः।

आवेश्य तदघं हित्वा वहवस्तद्गतिं गताः।।

गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः।

सम्वन्धाद्वृष्णयः स्नेहाद् यूयं भक्त्या वयं विभोः।। ७।१।२९

भावभक्तिश्च यथा-

प्रेम्णस्तु प्रथमावस्था भाव इत्यभिवीय ते।

सात्विकाः स्वल्पमात्राः स्युरत्राश्रुपुलकादयः।।

यथाह पद्मपुराणे –

ध्यायं ध्यायं भगवतः पादाम्बुजयुगं तदा।

ईषद्विम्रियमाणात्मा सार्द्रदृष्टिरभूदसौ।।

प्रेमाभक्तिलक्षणं तु-

सम्यङ्मसृणस्वान्ते ममत्वातिशयाङ्कितः।

भावः स एव सान्द्रात्मा बुधैः प्रेमा निगद्यते।।

यथाह नारदपञ्चरात्रे-

अनन्यममता विष्णौ ममता प्रेमसंगता।

भक्तिरित्युच्यते भीष्मप्रह्लादोद्धवनारदैः।।

तथाच श्रीमद्भागवते-

कचिद्रुन्त्यच्युतचिन्तया क्वचित् हसन्ति नन्दति वदन्त्यलौकिकाः।

नृत्यन्ति गायन्त्यनशीलन्त्यजं भवति तुष्णीं परमेत्य निर्वृताः।।

प्रेमाभक्तेरुदये एवं क्रमो भवति-

आदौ श्रद्ळा ततः साधुसंगोऽथ भजनक्रिया।

तनोऽनर्थनिवृत्तिः स्यात्ततो निष्ठा रुचिस्ततः।।

अथाशक्तिस्ततो भावः ततः प्रेमाभ्युदञ्चति।

साधकानामयं प्रेम्णः प्रादुर्भावे भवेत्क्रमः।।

के भक्तेः गुणाः इति प्रश्ने प्राह रूपगोस्वामी-

क्लेशघ्नी शुभदा मोक्षलघुताकृत् सुदुर्लभा।

सान्द्रानन्दविशेषात्मा श्रीकृष्णाकर्षणी च सा।।

स्कन्दपुराणे च-

अन्तः शुद्धिर्वहिः शुद्धिः तपः शान्त्यादयस्तथा।

अमी गुणाः प्रपद्यन्ते हरिसेवाभिकामिनम्।।

एवञ्चात्मकल्याणकामिभिः पुरुषैर्भगवत्स्वरूपसाक्षात्काररूपसायुज्य सारूप्य-सामीप्य-सालोक्यमुक्तिप्राप्तये तत्साधनत्वेनोपयोगिनी भगवद्भक्तिरवश्यमनुष्ठेया समादरणीया चेत्यलं पल्लवितेन।

## नवधा भक्तिः

आनन्दकन्दसच्चिदानन्दस्य परमकृपालोः परमात्मनः प्राप्तौ नवधाभक्तेः प्राधान्यमभिप्रेत्य तत्प्रदर्श्यते।

(१)तत्र भगवद्गुणगाथायाः श्रवणं नाम श्रवणभक्तिः। सा च सर्व धर्म्मेभ्यः श्रेष्ठा स्वीकृताऽस्ति। यतो हि ऊगवतो गुणानुवादश्रवणेन भगवत्प्राप्तिरवश्यं जायते। तथाचोक्तं श्रीमद्भागवते ६ स्कन्धे ७७ अध्ये-

श्रवणं सर्वधर्मेभ्यो वरम्मन्ते तपोधनाः !।

वैकुण्ठस्थो यतः कृष्णः श्रवणाद् यस्य लभ्यते।।

सप्ताहवणाल्लोके प्रारभ्यते निकटे हरिः।

अतो दोषनिकृत्यर्थमेतदेव हि साधनम्।। श्री. मा. मा. ५।६३

प्रविष्टः कर्मरन्ध्रेण स्वाणां भागसरोरुहम्।

धुनोति शमलं कृष्णः सलिलस्य यथा सरित्।।

तस्मादीशकथां पुण्यां गोविन्दचरिताश्रिताम्।

महत्त्पुण्यप्रदां यस्माच्छ्रृणुष्व नृपसत्तम।।

केवलया श्रवणभक्त्या भगवत्प्राप्तिर्भवतीतिविषये पुराणेषु बहूनि प्रमाणानि उपलभ्यन्ते। यथा महाराजः परीक्षित् केवलेन श्रवणभक्तिप्रभावेणैव परमात्मानं प्राप्तवान्। तद्यथा-

असारे संसारे विषयविषसंगाकुलधियःक्षणार्द्धं क्षेमार्थे पिवत शुकगाथाऽतुलसुचाम्।

किमर्थे व्यर्थे भो ! ब्रजत कुपथे कुत्सितपथे परीक्षित्साक्षां यच्छ्रवणगतमुवत्युक्ति कथने।।

महापापी धन्धुकारी अपि भगवतो गुणानुवादश्रवणप्रभावेणेव संसारसागरादुत्तीर्णः । महादुर्वृत्तोऽजामिलस्तु नारायणशब्दोच्चारणैनैव यमपाशाद्विमुक्तः। तथाचोक्तम्-

अशेषसंक्लेशशुभं विधत्ते गुणानुवादश्रवणं मुरारेः।

कुतः पुनस्तच्चरमारविन्दपरागसेवारतिरात्मलब्धा।।

अतो मनुष्याणां कृते श्रवणादन्यः कोपि नास्ति भगवत्प्राप्तिसाधकः सुगमः पन्थाः। तच्च श्रवणं महापुरुषाणां सङ्गादेव भवति। तथाचोक्तं श्रीमद्भागवते प्रथमस्कन्धे अष्टादशाध्याये-

तुलयामि लवेनापि न स्वर्गं ना पुर्भवम्।

भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिवः।।

सतां प्रसङ्गान्मम वीर्यसंविदो भवन्तिहृत्क्रणरसायनाः कथाः।

तज्जीषण दाश्वपिवर्गवर्त्मनिश्रद्धा रतिर्भक्तिरनु क्रमिष्यति।। ३।२५।२४

अतएव श्रीमद्भगवद्गीतायामपि संसारेत्तरणे श्रवणस्य प्राशस्त्यमुक्तं भगवता श्रीकत्रृष्णेन-

एतन्निर्विद्यमानानामिच्छतामकुतो भयम्।

योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनम्।।

अन्ये त्वेवमजानन्तः श्रुत्वाऽन्येभ्य उपासते।

तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः।।

अतएव च सनकादयो महर्षयो भगवद्गुणानुवाश्रवणे एव स्वसमयं यापयन्ति।

(२)भगवच्चरित्रकीर्तनं कीर्तनभक्तिः कथ्यते। श्रीमद्भागवते यथा-

संकीर्त्यमानो भगवाननन्तः श्रुतानुभावो व्यसनं हि पुंसः।

प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोऽर्कोऽभ्रमिवातिवातः।।

कलेर्दोषनिधे रजनस्ति ह्येषो महान् गुणः।

कीर्तनादेव कृष्णस्य मुक्तसङ्गः परं व्रजेत्-

इत्थं हेरर्भगवतो रुचिरावतार-

वीर्याणि बालचरितानि च शन्तमानि।

अन्यत्र चेह च श्रुतानि गृणन् मनुष्यो

भक्तिं परां परमहंसगतौ लभेत।।

श्रीमद्भगवद्गीतायां कीर्तनासक्तो भक्तः सर्वश्रेष्ठोऽभिहितः-

य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति।

भक्तिमयी परां कृत्वा मामैवेष्यत्यसंशयः।।

नच तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः।

पिता न च मे तस्मादन्यः प्रियतरो भुवि।।

अतएव स्वभक्तिप्रचारकः सर्वप्रियत्वेन स्वयमेव भगवतापि स्वीकृतः श्रीमद्भगवद्गीते, तथाहि-

नाहं तिष्ठामि वैकुण्ठे योगिनां हृदये न च।

मद्भक्ताः यत्र गायन्ति यत्र तिष्ठामि नारद !।.

कलेर्दोषनिधेः राजन्नस्ति ह्येको महान् गुणः।

कीर्तनादेव कृष्णस्य मुक्तसंगः परम्व्रजेत्।।

एतावताल अधनिर्हरणाय पुंसा संकीर्तनं भगवतो गुणकर्मनाम्नाम्।

विक्रुश्य पुत्रमघवान् यदजामिलोपि नारायणेति क्रियमाण इयाय मुक्तिम्।।

जिह्वां लब्धाणि यो विष्णुं कीर्तनीयं न कीर्तयेत्।

लब्ध्वापि मोक्ष निःश्रेणीं स नाराहति दुर्नतिः।।

(३)भगहवक्करणारविन्धादिस्मरणात्मिका स्मरणभक्तिः श्रीमद्भागवते यथा-

अविस्मृतिः कृष्णापादरविन्दयोः

क्षिणोत्यभद्राणिशमं तनोति च।

सत्वस्य शुद्धिं परमात्मभक्तिम्

ज्ञानं च विज्ञानविरागयुक्तम्।।

अवएवात्रामालात्मा परमहंसो महामुनिः भगवान् शुकदेवो रारानं परीक्षितम्प्रति प्रोवोचत्-

श्रृण्वन् गृणन् संस्मरयंश्च चिन्तयन्,

नामानि रूपाणि  च संगलानि ते।

क्रियासु यस्त्वच्चरणारविन्दयो-

राविष्टचेताः न भवाय कल्पते।।

तन्न समादिशोपायं येन ते चरणाब्जयोः।

स्मृतिर्यथान विमेदपि संसतामिह।।

विष्णुसहस्रनामस्तोत्रस्य आदावप्युक्तम्-

यस्य स्मरणमात्रेण जन्मसंसारबन्धनात्।

विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे।।

श्रीमद्भगवद्गीतायां च भगवान् श्रीकृष्णस्स्मरणभक्त्याऽऽत्मनः सुलभत्वं दर्शितवान्-

अनन्यचेतोः सततं यो मां स्मरति नित्यशः।

तस्याऽहं सुलभः पारथ ! नित्ययुक्तस्य योगिनः।।

(४) भगत्पादाब्जसेवनरूपा पादसेवनभक्तिः- श्रीमद्भागवते यथा-

यत्पादसेवाभिरूचिस्तपस्विना-

महेषजन्मोपचितं मलं धियः।

यद्यःश्रिणोत्यन्वहमेधती सती

यथा पदाङ्गष्ठविनिःसृता सरित्।।

भगवते रामस्य च चरणचिह्नरजसाङ्कितां भूमिं पश्यतो भरतस्य तन्मयतां वर्णयन् भगवान् शिवः भगवतीं पार्वतीं प्रति प्राह अध्यात्मरामायमे-

स तत्र वज्राङ्कुशवारिजाञ्चित-

ध्वजादिचिह्नानि पदानि सर्वतः।

ददर्श रामस्य भुवोऽतिमङ्गला-

न्यचेष्टयत्पादरजःसु सानुजः।।

अहो सुधन्योऽहममूनि राम-

पादारविन्दाङ्कित – भूतलानि।

पश्यामि यत्पादरजो विमृग्यं

ब्रह्मादिदेवैः मुनिभिश्च नित्यम्।।

अहल्या भगवतो रामस्य चरणजसा स्पृष्टा सती सचेतना बूत्वा भगवन्तं श्रीरामं स्तौति-

अहो कृतार्थास्मि जगन्निवास ! ते

पादाब्जसंलग्नरजःकरणादहम्।

स्पृशामि यत्पद्मजशङ्करादिभि-

र्विमृग्यते रन्धितमानसैः सदा।।

भगवच्चरणाश्रयाणां भक्तानां सर्वे दोषा दूरीभवन्ति, सर्वाश्चापत्तयो विलीयन्ते। गोपदमिवेमं संसारमुत्तरन्ति भक्ताः। तद्यथा श्रीमद्भागवते-

समाश्रिता ये पदपल्लवप्लवं

महत्पदं पुण्ययशो मुरारेः।

मवाम्बुधिर्वत्सपदं परं पदं

पदं पदं यद्विपदो न तेषाम्।।

त्वय्यम्बुजाक्षाखिलसत्वधाम्मि

समाधिनावेशितचेतसैके।

त्वत्पादपोतेन महत्कृतेन

कुर्वन्ति गोवत्सपदं भवाब्धिम्।।

न नाकपृष्ठं न च सार्वभौमं

न पारमेष्ठ्यं न रसाधिपत्यम्।

न योगसिद्धीरपुनर्भवं वा

वाञ्छन्ति यत्पादरजः प्रपन्नाः।।

ज्ञानवैराग्यमुक्तेन भक्तियोगेन योगिनः।

श्रेमाय पादमूलं ते प्रविशन्त्यकूतो भयम्।।

इत्यच्युङ्घ्रिं भजतोऽनुवृत्या

भक्तिर्विरक्तिर्भगवत्यबोधः।

भवन्ति वै बागवतस्य राजन्!

ततः परां शान्तिमुपैति साक्षात्।।

(५)पाषाणादिनिर्मिताया भगवतो मूर्तेः पूजनम् अर्चभक्तिः अस्ति। सा च भगवतः प्रीतिकारिणी विद्यते। भगवतोऽर्चनेन भक्तानां हृदये प्रसन्नता भवति यया हृदये भगवद्धप्रीतिः शनैः शनैः उदेति। तथा हि श्रीमद्भागवते व्यासदेवः -

श्रीविष्णोरर्चनं ये तु प्रकुर्वन्ति नराः भूवि।

ते यान्ति शाश्वतं विष्णोरानन्दं परमं पदम्।।

अर्चनभक्त्या स्वर्गापवर्गसमस्तसिद्धिलाभोऽप्यनायासेन भवति –

स्वर्गापवर्गयोः पुंसां रसानां भूवि मानसम्।
सर्वासामपि सिद्धीनां मूलं तच्चरणार्चनम्।।

श्रीमद्भागवद्गीतायामपि भगवान् श्रीकृष्णः –

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः।।

एवं क्रिया भोगपथैः पुमान् वैदिकतान्त्रिकैः।
अर्चयन्तु भवतः सिद्धिं प्राप्तो विनृत्यभीक्ष्णम्।।

(३) वन्दनभक्तिः – भगवच्चरणारविन्दयोर्वन्दनं वन्दनभक्तिरुच्यं यथा भक्तेषु अहंकारस्यापनयद्वारा भगवद्भावस्योदयो भवति।

तथाचोक्तं श्रीमद्भागवते –

ध्येयं सदा परिभवघ्नमभीष्टदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम्।
भृत्यार्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष ! ते चरणारविन्दम्।।

खं वायुमग्निं सलिलं महीं च ज्योतिषिसत्त्वानि दिशोद्रुमादीन्।
सरित्समुद्रांश्च हरेः शरीरं यत् किञ्च भूतं प्रणमेदनन्यः।।

यन्नामश्रुतिमालेण पुनान् भवति निर्मलः।
तस्य तीर्थपदः किंवा दासानामवशिष्यते।।

भगवत्प्रेमविह्वलस्याक्रूरस्य दशा वर्णयति भगवान् व्यासः –

रथात्तूर्णमवप्लुत्य सोऽक्रूरः स्नेहविह्वलः।

पपात चरणोपान्ते दण्डवद्रामकृष्णयोः।।

(श्रीमद्भागवते १० स्कन्धे ३८ अध्यायः)

भीष्मस्तवराजे च –

एतावदुक्त्वा वचनं भीष्मस्तद्गतमानसः।

नम इत्येव कृष्णाय प्रणाममकरोत्तदा।।

(७) दास्यभक्तिः – अत्र भगवतो दासो भूत्वा तत्सेवाभ्यासद्वाराभिमानापनयनं भक्तेरुदयश्च भवति। तथाचोक्तं श्रीमद्भागवते –

न वासुदेवात्परमस्ति मङ्गलं

न वासुदेवात्परमस्ति पवनम्।

न वासुदेवात्परमस्ति दैवतं

तं वासुदेवं प्रणमन्नसीदति।।

(८) सख्यभक्तिः – अत्र भगवत्सखिरूपेण एकप्राणतायैः हार्दिकयत्नैः भक्तहृदये भगवति मधुरमयस्य प्रेम्णो विकासो जायते। तथाहि श्रीमद्भागवते –

पतितः स्खलितश्चार्तः क्षुत्वा वा विवशो ब्रुवन्!

हरये नमः इत्युच्चैर्मुच्यते सर्वपातकात्।।

सख्यभक्तिप्राप्त्यै भगवत्प्रेमिभिः सखिभिः सह संगः तेषां चरित्रस्याध्ययनमत्यावश्यकमस्ति। तथाहि श्रीमद्भागवते –

अहो भाग्यमहो भाग्यं नन्दगोपाब्रजौकसाम्।

यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम्।

सख्युः प्रियस्य प्रियस्य विप्रर्षेरङ्गसङ्गातिनिर्वृतः।

प्रीतो व्यमुञ्चदथिबन्दून् नेत्राभ्यां पुष्करेक्षणः।।

किं चित्रमच्युत ! तवैतदेशेष बन्धोद सेष्वनन्य शरणेषु यदान्म सत्वम्।

यो रोचयेत् सह मृगैः स्वयमीश्वराणां श्रीमत्कीरीटतटपीडितपादपीठः।।

अथपवेश्य पर्यङ्के स्वयं सख्युः समर्हणम्।

उपहृत्यावनिज्यास्य पादौ पादावनेजनीः।।

अग्रहीच्छिरसा राजन् भगवाँल्लोकपावनः।

व्यलिम्पद् दिव्यगन्धेन चन्दनागुरुकुङ्कुमैः।।

(९) आत्मनिवेदनभक्तिः – आत्मनिवेदनद्वारा भक्तानां शारीरिकी वाचनिकी मानसिकी च सकला चेष्टा भगवद्भवमयी भवति, तदा भक्तानां हृदये भगवद्विषयेऽपूर्वदिव्यरागस्य विकास उदेति। तथाहि श्रीमद्भागवते –

मर्त्यो यदा त्यक्तसमस्तकर्मा निवेदतात्मविधि कीर्तितो मे।

तदामृतत्वं प्रतिपद्यमानो मयात्मभूताय च कल्पते वे।।

स वै मनः कृष्णपदारविन्दयोर्वचांसि वैकुण्ठगुणानुवर्णने।

करौ हरे मन्दिरमार्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये।।

मुकुन्द लिङ्गालयदर्शने दृशौ तद्भृत्यगात्रस्पर्शेऽङ्गसङ्गमम्।

घ्राणञ्च तत्पादसरोजसौरभे श्रीमत्तुलस्यां रसना तदर्पित्ते।

पादौ हरेः क्षेत्रपदानुसर्पणे शिरो हृषीकेशपदाभिवन्दने।

कामं च दास्ये नतु कायकाम्यया यथत्तमश्लोकजनाश्रया रतिः।।

भगवतः प्राप्तये कर्मयोगज्ञानादीनि सर्वाणि साधनानि श्रेष्ठानि सन्ति, तत्तु भक्तिस्तु सर्वोत्तमा गीतास्ति। नवविधासु आसु भक्तिषु एकविधया मे भक्त्या भक्तः संसारसागरादुत्तर्तुं शक्नोति, किं पुनः यत्र प्रह्लाद नवधाभक्तिर्भवेत्। अतः परमात्मनो भक्तिर्विधेया। ययान्तेऽवश्यं प्रयाणं भवेत्। एतएवोक्तं श्रीमद्भागवतमाहात्म्ये –

निखिलभूवनमध्ये निर्धनास्तेऽपि धन्याः निवसति हृदि येषां श्रीहरेर्भक्तिरेका।

हरिरपि निजलोकं सर्वथातो विहाय प्रविशति हृदि तेषां सूत्रोपनद्धः।।4.76

कायेन वाचा मनसापि पातकं नित्यं प्रकुर्वन्ति शठा हठेन ये।

परस्वपुष्टा मलिना दुराशाया सप्ताहयज्ञेन कलौ पुनन्ति ते।।

र्मार्थ कामइति योऽधिभहितस्त्रिवर्ग ईक्षात्रयी न यदसौ विविधा च वार्ता।

मन्ये तदेदखिलं निगमस्य सत्यं स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः।।

## पौराणिकानां कर्तव्यम्

यथा चार्वाकैः बौद्धैः जैनैश्च हिन्दुधर्मस्य समूलमुन्मूलनं कर्तुं वेदानां निन्दा समारव्धाऽऽसीत्, तथैव कतिचिद् आधुनिका भारतीया अपि पुराणानि पापकथाः, उपेक्षणीयानि च इति वदन्ति।

यद्यपि पाश्चात्यसमालोचकेषु प्रसिद्धाः समालोचकाः मिस्टर पार्जिटर मिस्टरवेसेन्टल्मिथप्रभ्तयो विद्वांसः पुराणानामनुपमं महत्वं मन्यन्ते। तथापि मिस मेयो लिखितस्य मदरइण्डिया पुस्तकस्य प्रभावेण पाश्चात्ये जगति बहवो जनाः वेदान् पुराणानि

चापक्षन्ते। स्वामिनो दयानन्दस्य सत्यार्थप्रकाशेन तु नवशिक्षिताः भारतीया अपि पुराणानि सर्वथा उतेक्षन्ते, येन सनातनस्य हिन्दुधर्मस्य, सर्वकल्याणकारिण्या हिन्दुसंस्कृतेः, अतिप्राचीनाया हिन्दुजातेश्चास्तित्वमापद्ग्रस्तमिव विलोक्यते।

अतो यथा भगवत्पुज्यपादैः श्रीस्वामिशंकराचार्यमहोदयैः कुमारिलभट्ट-शवरस्वामिप्रभृतिभिश्च बहुनि ग्रन्थरत्नानि लिखिता चार्वाकबौद्धजैनानां पाखण्डमयं प्रलापं खण्डयित्वा वेदस्य वैजयन्ती समस्ते देशे प्रासार्यत, यैरद्यत्वेऽपि हिन्दुधर्मस्य संस्कारः अस्मां धमनीषु सञ्चरति, तथैव वास्तविकशास्त्ररहस्यमर्मज्ञै विद्वादिभ्यः पुराणनिन्दकानामनर्गलैः प्रलापैर्दुष्यमाणां भारतीयसंस्कृतिम्, वैदिकधर्मम्, हिन्दुजातिं च संरक्षितुं पुराणानिहितानि सर्वेषां हितकारीणि सर्वोपयोगीरि वैज्ञानिकतत्वानि सर्वेषां समक्षे उपस्थापनीयानि, येन वास्तविकस्थितिमवगत्य जनाः सन्मार्गे प्रवर्तेरन् विरमेयुश्चासन्मार्गात्, प्रसरेच्च संस्कृतसेवकानां महदौदार्यम्। समस्ते जगति सम्यक् शान्तिरञ्चारद्वारा शाश्वतं सुखं सर्वेषां समक्षे समुपतिष्ठेत।

स्वस्ति प्रजायः परिपालयन्तां न्यायेन मार्गेण महीं महीशाः।

गोब्राह्मणेभ्यः शुभमस्तु नित्यं लोकाः समस्थाः सुखिनो भवन्तु।

शान्तिः ! शान्तिः !! शान्तिः !!!

## भुवनकोषविवरणम्

प्रत्ययेकब्रह्माण्डे चतुर्दश भुवनानि भवन्ति। तेषु भूः भूवः, स्वः, महः, जनः, तपः सत्यश्चेति सप्त लोका उपरि विद्यन्ते। अधस्ताच्च अतल-वितल-सुतल-तलातल-रसातल-

महातल-पातालख्याः सप्त लोकाः सन्ति। उर्ध्वलोकेषु देवानां अधस्ताच्च असुराणां निवासो वर्तते। देवराजस्य इन्द्रस्य राजधानी स्वर्गलोके असुरलाजस्य च राजधानी पाताललोके विद्यते। एषां चतुर्दशानां लोकानामनेके अन्तर्विभागा अपि वर्तन्ते। यथा किल भुवनर्लोकस्य अन्तर्विभागा गन्धर्वलोकादयः सन्ति तथैव भूलोकस्यापि मृत्यु-पितृ-प्रेत-नरकानामकाश्चत्वारो लोका अन्तर्विभागरूपेण वर्तन्ते। मृत्युलोकोऽयं चतुर्दशानां भुवानानां केन्द्ररूपोऽस्ति। अत्रैव जीवा मातृगर्भाज् जन्म लभ्यन्ते। मृत्युलोके एव समुत्पद्य सर्वैः जीवैः स्वस्वशुभाशुभकर्मभोगानन्तरं नूतनानि कर्माणि संगृह्यन्ते। यतो हि मृत्युलोकोऽयं कर्मभूमिः, अत्रैव स्वातन्त्र्येण विविधानि शुभाशुभकर्माणि विधातुं सौकर्यं विद्यते। देवाः असुराश्च स्वस्वलोकेभ्यः अग्रे गन्तुं न प्रभवन्ति, किन्तु अत्रैव मृत्युलोके जन्म आसाद्य भूयः सत्कर्मानुष्ठाननानुसारमुपरि लोकेषु गच्छन्ति। अस्मादेव कारणादत्र ब्रह्माण्डे मृत्युलोकस्य प्राधान्यमस्ति।

**भारतवर्षवैशिष्ट्यम्**

भारतवर्ष हि मृत्युलोकस्य उत्तममङ्गमस्ति। उत्तमाङ्गत्वादेवात्र भारतवर्षे भाषा-शरीर-सौन्द्रयादीनां प्रकृतेश्चैतादृशी पूर्णता परिदृश्यते। अत्रानसूया सीता-सावित्री-दमयन्तीप्रभृतयः पातिब्रत्यधर्मपरायणाः स्त्रियः, ध्रुवप्रह्लादाद्याः वालकाः, हरिश्चन्द्रयुधिष्ठिरादयो राजानः, शिवि-दधीचि-वलि कर्णप्रभृतयो दातारः, वशिष्ठ-विश्वामित्रादयस्तपस्विनःष रामकृष्णादयोऽवताराः, याज्ञवल्क्यपतञ्जलिप्रभृतयो योगिनः, मार्कण्डेय-कपिलादयो मुनयः, अत्रिभरद्वाजवामदैवादयः ऋषयः, व्यास-वाल्मीकिप्रभृतयः ग्रन्थप्रणेतारः, गौतम-कणादयो दार्शनिकाः, अनुसूया-लोपामुद्रा-नर्मदादयस्तपस्विन्यः,

मदालसा-सुकन्या-समाना गृहिण्यश्च प्रादुर्भूयास्य भारतवर्षस्य महिमानं समवर्धयन्। हिमालयतः कन्याकुमारीपर्यन्तम्, कच्छतः कटकपर्यन्तं सर्वेषां हृदि एकैव भारतीया संस्कृतिः विकासते। आचारभाषादीनांभेदेऽपि सर्वे रामकृष्णादिकं मन्यन्ते, जन्मान्तरं स्वीकुर्वन्ति, गोरक्षां च कर्तुं चेष्टन्त एव।

आधुनिकाः पदार्थविद्वेदिनः, वैज्ञानिकाः अपि भारतस्य प्राकृतिकीं पूर्णतां स्वीकुर्वन्ति, मन्यन्ते च यत् भारतवर्षसदृशः पूर्णप्रकृतियुक्तः प्रदेशोनास्मिन्भूमण्डले कश्चिदस्ति। सर्वोन्नतः सर्वोन्नतः सर्वसमृद्धिशाली विशालो नगाधिराजो हिमालयो भारतवर्षमेवालङ्करोति। सर्वतोधिकपुण्यशालिनी त्रिलोकपाविनी भव्या भगवती भागीरथी भारतवर्षे एव निभाल्यते, यस्या महिमानं देशीया विदेशीयाश्च विद्वाँसो मन्यन्ते। ब्राह्मण क्षत्रिय-वैश्य-शूद्राश्चत्वारो वर्णा अत्रैव वर्तन्ते। षण्णां ऋतुनां यथाक्रममत्रैव प्रादुर्भावो भवति। श्वेत-कृष्ण-गौराङ्गाः मानवाश्चात्र भारतवर्षे एव दृश्यन्ते। सर्वेषु देशेषु लब्धजन्मानो जीवाः भारते एव प्राणान् धारयितुं शक्नुवन्तीति भारतस्य प्रकृतिपूर्णता सुतरां सिध्यति। भारतीयं धर्मविज्ञानम्, तत्वज्ञानम्, वेदाः, पुराणानि, धर्मशास्त्राणि, दर्शनानि च अस्य सूक्ष्मप्रकृतिपूर्णताया वैज्ञानिकगम्भीरगवेषणायाश्च प्रत्यक्षप्रमाणभूतानि सन्ति। अतो हि भारतवर्षमिदं स्वभावतः मृत्युलोकस्योत्तमाङ्गभूतमित्यत्र नास्ति कश्चित् संदेहः। यथा किल मस्तकं ज्ञानेन्द्रियाणां केन्द्रस्थानं तथैव मृत्युलोकः सर्वेषां लोकानां श्रेष्ठतरं केन्द्रं विद्यते। तत्रापि अस्माकं भारतवर्षम्, यत्र जन्म लब्धुं देवा अपि वाञ्छति। तथाहि श्री विष्णुपुराणे –

गान्ति देवाः किल गीतकानि धन्यास्तु ये भारतभूमिभागे।
स्वर्गापवर्गास्पहेतुभूति भवन्ति भूयः पुरुषाः सुरत्वात्।।

किञ्च पुण्याधिक्यादेव भारते जन्म लभते जीव इति तत्रैव स्पष्टमुद्घोषितम्। तथाहि –

अत्र जन्म सहस्राणां सहस्रैरपि सत्तम् !

कदाचिल्लभते जन्तुः मानुष्यं पुण्यसंचयात्।।

अत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने !

यतो हि कर्मभूरेषा ततोऽन्या भोगभूमयः।।

यद्यपि पुराणेषु भुवनकोशवर्णने भारतादन्यदेशानामपि वर्णनं विद्यते, तथापि भगवतो लीलास्थलं पुण्यतमा भारतभूमिरेवास्ति। अत्रैव समये समये प्राकृतमानव इवावतरति भगवान्, रक्षति वर्णाश्रमव्यवस्थां पालयति च धर्मपथाध्वनीनान्। पवित्रतमेऽत्र भारत एव वद्रिकाश्रमतो रामेश्वरपर्यन्तं द्वारिकातः कामाक्षापर्यन्तं पवित्राणि तीर्थानि पूज्यानि च सन्ति, यत्रत्याः स्थावरजङ्गमा अपि पुण्यभाजः पूततमा धन्यतमाश्च मन्यन्ते। अतएव भारतीया भारतभूमिमिमां स्नेहमयीं मातरमिव सनतं समाद्रियन्ते, पूजयन्ति स्तुवन्ति प्रत्यहं प्रातरुत्थाय। पूर्वं प्रार्थयन्ते च –

समुद्रवसने देवि ! पर्वतस्तनमण्डले !

विष्णुपत्नि ! नमस्तुभ्यं पादस्पर्शं क्षमस्य मे ।।

अपि च श्रीमद्भागवते भारतवर्षे जन्मगृहीत्वा भगवत्सेवास्पृहा महतः पुण्यस्य फलं मन्यन्ते देवाः -

अहो अमीषां किमकारिशोभनं प्रसन्न एषां स्विदुतस्वयं हरिः।

यैर्जन्मलब्धं नृषु भारताजिरे मुकुन्दसेवोपयिकं स्पृहा हि नः।। ५/१९/२१

पुरानेषु अन्तर्विभाजनविमर्शः

पुरामानामन्तर्विभाजनं भाग – खण्ड – अंश – स्कन्द – पाद – पर्व – संहिता – अध्यायेषु जातमस्ति। तथा भागांशखण्डेष्वपि अनेके अध्यायाः सन्ति। .... सर्वेषु पुराणेषु अध्यायास्तु सन्त्येव, किन्तु क्वचन भाग-खण्ड-अंशा - ....न्तरे वर्तन्ते क्वचिच्च स्वतन्त्राः एव सन्ति।

१. ब्रह्मपुराणं द्वयोर्भागयो विभक्तमस्ति – पूर्वभागः, अत्तरभागश्च। उभयत्र २४५ अध्यायाः, नारदीयपुराणमतेन १०००० मत्स्यपुराणमतेन च १३००० श्लोकाश्च सन्ति।

२. पद्मपुराणस्य विभाजनं पञ्चसु खण्डेषु जातमस्ति १. सृष्टिखण्डम्, २. भूमिखण्डम्, ३. स्वर्गखण्डम्, ४. पातालखण्डम्, ५. उत्तरखण्डं च। तत्र क्रमशः ८२, १२५, ३९, ११३, २८२ सङ्कलनया ६४१ अध्यायाः ५५००० श्लोकाश्च विद्यन्ते।

३. विष्णुपुराणं भागद्वये विभक्तमति पूर्वभागः उत्तरभागश्च, किन्त्विदानीमेतस्य केवलः पूर्वभागः एवोपलम्ते, यः षट्सु अंशेषु विभक्तोऽस्ति। तत्र प्रथमेऽशे २२द्वितीये १६ तृतीये १८ चतुर्थे २४ पञ्चमे ३८ षष्ठेऽशे च ८ संकलनया १२६ अध्यायाः सन्ति। इदं पुराणं २३००० संख्याकं भवितुमर्हति, किन्तु सांप्रतं सर्वं नोपलभ्यते अस्योत्तरभागो विष्णुधर्मोत्तरं कथ्यते, तेन संख्या पूर्तिः सम्भवति।

४. क – शिवपुराणस्य विभाजनं सप्तसु संहितासु जातमस्ति १. विद्येश्वरसंहिता, २. रुद्रसंहिता,३. शतद्रुसंहिता, ४. कोटिरुद्रसंहिता, ५. उमासंहिता, ६. कैलाशसंहिता, ७. वायवीयसंहिता च। तत्रापि द्वितीयायां रुद्रसंहितायां पञ्च खण्डाः – सृष्टिखण्डः, सतीखण्डः, पार्वतीखण्डः, कुमारोखण्डो युद्धखण्डश्च सन्ति, तथा सप्तम्यां वायवीयसंहितायां द्वै भागौ स्तः पूर्वार्द्धमुत्तरादर्द्धञ्च। तत्र सप्तसु संहितासु क्रमशः १५, १९७, (२०*४३*५५*२०*५९ = १९७) ४२, ४३, ५७, २३, ७६, (३५*४१ = ७६)गणनाया४६४ अध्यायाः २४००० श्लोकाश्च सन्ति।

ख – वायुपुराणं चतुर्षु पादेषु विभक्तमस्ति, १. प्रक्रियापादः, २. उपोद्घातपादः, ३. अनुषङ्गपादः, ४. उपसंहारपादश्च। तेषु प्रथमे १-६, द्वितीये ७-६४, तृतीये ६५-९९, चतुर्थे च १००-११२ अध्यायाः सन्ति।

५. क – श्रीमद्भागवतम् १२ स्कन्देषु विभक्तमस्ति। तत्र क्रमशः १९,१०,३३, ३१, २६, १९, १५, २४, ९०, ३१, १३, गणनया ३३५ अध्यायः १८००० श्लोकाश्च सन्ति।

ख – देवीभागवतम् १२ स्कन्देषु विभक्तमस्ति। तत्रापि क्रमशः २०, १२, ३०, २५, ३५, ३१, ४०, २४, ५०, १३, २४, १४ गणनया ३३२ अध्यायाः १८००० श्लोकाश्च सन्ति।

६. नारदीयपुराणस्य विभाजनं भागद्वये जातमस्ति- पूर्वभागः, उत्तरभागश्च। तत्र पूर्वभागे चत्वारः पादा १२५ अध्यायाः, उत्तरभागे च ८२ संकलनया २०७ अध्यायाः २५००० श्लोकाश्च सन्ति।

७. मार्कण्डेयपुरानं १३६ अध्यायेषु विभक्तमस्ति। एतस्य श्लोकसंख्या ९००० अस्ति, परमिदानीं ६९०० श्लोका एव उपलभ्यते.

८. अग्निपुराणस्य विभाजनं ३८३ अध्यायेषु जातमस्ति। तत्र नारदीयानुसारं १५००० मत्स्यानुसारं च १३००० श्लोका भवितुमर्हन्ति।

९. भविष्यपुराणं पञ्चसु पर्वसु विभक्तं विद्यते। १. ब्रह्मपर्व, २. वैष्णवपर्व, ३. शैवपर्व, ४. सौरपर्व, ५. प्रतिसर्ग पर्व च। अत्र ६०५ अध्यायाः नारदीयानुसारं १४००० मत्स्यानुसारञ्च १४५०० श्लोका भवितुमर्हन्ति।

१०. ब्रह्मवैवर्तपुराणं चतुर्षु खण्डेषु विभक्तमस्ति १. ब्रह्मखण्डः, २. प्रकृतिखण्डः, ३. गणेशखण्डः, ४. श्रीकृष्णजन्मखण्डश्च। तत्रान्तिमे भागद्वयं विद्यते – पूर्वभागः, उत्तरभागश्च। अत्र क्रमशः ३०, ५७, ४६, १३३ सङ्कलनया २६६ अध्यायः १८००० श्लोकाश्च वर्तन्ते।

११. लिङ्गपुराणं द्वयोर्भागयो विभक्तमस्ति पूर्वभागः उत्तरभागश्च। तत्र क्रमशः १०८, ५५ गणनया १६३ अध्यायाः ११००० श्लोकाश्च सन्ति।

१२. वाराहपुराणस्यापि विभाजनं भागद्वये जातमस्ति पूर्वभागः त्तरभागश्च। अत्र २१८ अध्यायाः २४००० श्लोकाश्च सन्ति।

१३. स्कन्दपुराणं सप्तसु खण्डेषु विभक्तमस्ति १. माहेश्वरखण्डः, २. वैष्णवखण्डः, ३. ब्रह्मखण्डः, ४. काशीखण्डः, ५. अवन्तीखण्डः, ६. नागरखण्डः, ७. प्रभासखण्डश्च। तत्राप्यनेकेऽवान्तरखण्डाः सन्ति। अत्र क्रमशः१७४, १५६, ८७, १००, ३८७, २७९, ४२१ सङ्कलनया १६७१ अध्यायाः नारदीयमतेन ८१००० श्लोकाश्च सन्ति, किन्तु मत्स्यपुराणानुसारं ८११०२श्लोका भवितुमर्हन्ति।

१४. वामनपुराणे द्व भागौ स्तः पूर्वभागः, उत्तरभागश्च। तत्रादौ चतस्त्रः संहिता सन्ति –१. माहेश्वरीसंहिता, २. भागवतीसंहिता, ३. सौरीसंहिता, ४. गाणेश्वरी संहिता च। अत्र ९५ अध्यायाः १०००० श्लोकाश्च विद्यन्ते। अस्योत्तरभागो नेदानीमुपलभ्यते।

१५. कूर्मपुराणे चतस्त्रः संहिता सन्ति –१. ब्राह्मीसंहिता, २. भागवतीसंहिता, ३. सौरासंहिता, ४. वैष्णवी संहिता च। तत्र साम्प्रतं केवलं ब्राह्मी संहितामात्रमेवोपलभ्यते। यत्र भागद्वयं वर्तते १. पूर्वार्द्धम्, २. उत्तरार्द्धञ्च। अत्र पूर्वार्द्धे ५३ उत्तरार्द्धे च४६ गणनया ९९ अध्यायाः ६००० श्लोकाश्च सन्ति। अत्र नारदीयपुराणानुसारं १७००० मत्स्यपुराणनुसारं च १८००० श्लोका भवितुमर्हन्ति।

१६. मत्सपुराणं २९० अध्यायेषु विभक्तमस्ति। तत्र १४००० श्लोकाः सन्ति, किन्तु नारदीयपुराणानुसारं १५००० श्लोका भवितुमर्हन्ति।

१७. गरुडपुराणस्य विभाजनं खण्डद्वये जातमस्ति, पूर्वखण्डः, उत्तरखण्डश्च। तत्रोत्तरखण्डस्य प्रेतकल्प इत्यपि नामान्तरमस्ति, यत्र शरीरत्यागानन्तरं

परलोकगतानां जीवानां प्रेतक्रियाया विवरणं सविस्तरं प्रतिपादितमस्ति। अत्र भागद्वये क्रमशः २४०, ७८ सङ्कलनया २३८ अध्यायाः सन्ति। अस्मिन् नारदीयपुराणानुसारं १९००० मत्स्यपुराणानुसारं च १८००० श्लोका भवितुमर्हति।

१८. ब्रह्माण्डपुराणस्य वायुपुराणवत् चतुर् पादेषु विबाजनं जातमस्ति १. प्रक्रियापादः, २. अनुषङ्गपादः, ३. उपोद्धातपादः, ४. उपसंहारपादश्च। तत्र प्रथमं पादद्वयं पूर्वभाग उच्यते, तृतीयपादो मध्यभागः कथ्यते, चतुर्थपादस्छोत्तरभागो निगद्यते। ऐषु १६१ अध्यायाः सन्ति। एतत् पुराणं नारदीयानुसारं १२००० मत्स्यपुराणानुसारं च १२२०० श्लोकसंख्याकं भवितुमर्हति।

----------------------

## पौराणिकशब्दविमर्शः

पुराणेषु वैदिकलौकिकोभयविधानां शब्दानां मिश्रणं वर्तते। अथापि अधिकांशाः शब्दा लौकिकव्याकरणनियमानुसारं प्रयुक्ताः सन्ति। कियन्तः शब्दा लौकिकव्करणनियमविरुद्धा अपि स्वतन्त्राः प्रयुक्ता सन्ति, ये आर्षा इति कथयित्वा समाधीते पौराणिकैः।

### पुराणेषु आपाणिनीयप्रयोगदर्शनम्

| | | |
|---|---|---|
| १. सत्यं परं धीमहि | श्रीमद्भागवते – | १।१।१ |
| २. पुत्रैतितन्मयतया तरवोऽभिनेदुः | ..... | ..... |
| ३. गावो ह्वहुगुमा दुदुः | ...... | ३।६।२५ |

| | | | |
|---|---|---|---|
| ४. | यथा दारे प्रजावती | ....... | ३।४।३८ |
| ५. | न याचतोऽदात् समयेन दायम् | ...... | ३।१।८ |
| ६. | तयोः निपतमानयोः | ...... | ३।१६।३४ |
| ७. | कुतोऽन्यथा स्याद्रमतः स्व आत्मनः | ..... | ५।९।५ |
| ८. | निवेशयित्वा निजराज्य ईश्वरः | ..... | १।१०।२ |
| ९. | स्वराज्ये संस्थाप्य धर्मजम् | ..... | ३।३।७६ |
| १०. | भस्सन् हुतं कुहकराद्धम् | ...... | १।१५।२१ |
| ११. | सत्राजितः स्वतनयाम् | ........ | १०।५६।१ |
| १२. | नन्दालये सवलया वजती विरेजुः | ........ | १०।५।११ |
| १३. | निशमय तदुत्पत्तिम् | मार्कण्डेयपुराणम् | ८१।१ |
| १४. | विशान्त्यो मद्विभूतयः | ........ | ९०।३ |
| १५. | आयान्तं चण्डिका दृष्ट्वा | ........ | ८८।३ |
| १६. | आत्मनो वेदविद्या च ईश्वरेण | स्कन्दपुराणे रे. ख. | १।१७ |
| १७. | सर्वानन्तफलाः प्रीक्ताः | मत्स्यपुराणे | ६४।४ |
| १८. | मूर्खागमेन रहितानि | ........ | १५८।७९ |
| १९. | औँ कारमयं गृह्य | ........ | १३८।६८ |
| २०. | पूर्ववद् गुरु ऋत्विग्भ्यः | ........ | ९०।३ |
| २१. | देवानां मातरो दृष्ट्वा | ........ | ९४।७ |
| २२. | विशेषान् शूद्राज्ञस्तु | ........ | ४७।२।४६ |

| | | | |
|---|---|---|---|
| २३. | तस्याग्रतो नृपः स्नायात् | अग्निपुराणे | १८५।१३ |
| २४. | पूज्य देवं चतुर्मुखम् | वामनपुराणे | ४९।३७ |
| २५. | महन्ति पापन्यपि नारदाशु | ....... | ६९।११ |
| २६. | कुण्डिनं न प्रवेक्ष्यामि अहत्वा | ब्रह्मपुराणे | १९९।९ |
| २७. | आगता पतिना विना | शिवपुराणे रु. सं. | २४।४९ |
| २८. | भारतेषु स्त्रियः पुंसः | कुर्मपुराणे | ४३।२१ |
| २९. | लोकान् प्रकल्पयित्वा तु | वायुपुराणे | ६।३४ |
| ३०. | सद्भाव एषो भवते मयोक्तः | विष्णुपुराणे | २।१३।४४ |

एवं पुराणेषु कुत्रापि छन्दोभङ्गभिया सन्धिः, कुत्र च सन्ध्यभावः कुत्रचिद् विभक्तिपरिवर्तनं लिङ्गव्यत्ययः, आत्मनेपदस्थाने परस्मैपदप्रयोगः, परस्मैपदस्थाने चात्मनेपदप्रयोगः। परस्मैपदिभ्यो धातुभ्यः शानच्प्रत्ययः आत्मनेपदिभ्यः धातुभ्यः शतृप्रत्ययः। क्वचनस्वरादिभ्यः धातुभ्यो भूतकाले अडागमाभावः क्वचन ब्यञ्जनादिभ्यो धातुभ्योऽडागमः, निरुपसर्गकधातुभ्यो ल्यप्प्रत्ययः। कुत्रचित् सोपमर्जकधातुभ्यो ल्यवभावः। एवं बहवोऽपाणिनीयाः प्रयोगा दृष्टिगोचरी भवन्ति। यान् कियन्तो लिपिकाराः च. तु. हि – आदिपदानि प्रयुज्य शुद्धं कर्तुं प्रयतन्ते, किन्तु नेदमुचितं प्रतिभाति, यतो हि व्यावहारिकसंस्कृतशब्दानां प्रयोगकर्तृणां पुराणानां कृते एते आपाणिनीया प्रयोगः भूषणमेवास्ति न दूषणम्। तथाहि –

ब्यावहारिकशब्दौघान् पुराणानि प्रयुञ्जते।

अपाणिनीयप्रयोगस्तु भूषणं न तु दूषणम्।।

**पुराणेषु पारिभाषिकशब्दप्रयोगः**

सर्वेषु शास्त्रेषु पारिभाषिकशब्दानां सन्निवेशो विद्यते, यो हि तस्य शास्त्रस्य नैजी विशेषता। एतदनुसारमेव पुराणेष्वपि पारिभाषिकशब्दानां प्रचुरमात्रायां प्रयोगऽस्ति। यथा – सर्ग-प्रलय-मन्वन्तर-युग-कल्प-पर-परार्द्ध-सन्धि-सन्ध्यंशादयः शब्दाः। व्याकरणनियमव्युत्पत्यनुसारं लोकव्यवहारे सामान्यरूपेण योऽपि अर्थः सम्भवेत्, परन्तु पुराणेषु प्रयुक्तानामेषां शब्दानां स एवार्थोऽभिमतो भविष्यति, यो हि व्यासपरिभाषया निश्चितो भवेत्। अतः पुराणानामनुशीलनसमये तेषां यथार्थेष्वर्थेषु अवश्यं ध्यानं प्रदेयमन्यथा वैपरीत्यभ्रमोऽनिवार्यतया सम्भवेत्।

**पुराणशब्दस्य व्युत्पत्तिस्तदर्थनिरूपणं च**

(१) पुरति अग्रेगच्छतीति पुरा पुर अग्रगमने इति धातो औपदिक का प्रत्यते पुरा शब्दो निष्पद्यते। मेदिनीकोश वलेन स त्रिषु अर्थेषु प्रयुज्यते। अतीतकाले प्रबन्धे सङ्कटे च। तथाहि - स्यात् प्रबन्धे पुरातीते सङ्कटागमिके तथा। पुरापूर्वकादण् प्राणने इति धातोः पचाद्यचि कृते पुराणशब्दो निष्पद्यते।

(२) पुराभवमिति विग्रहे सायं चिरेति ट्यु प्रत्यये युवो रनाकौरिति सूत्रेण योरनादेशे अङ्कुण्वाङीति सूत्रेण णत्वे कृते पुराण प्रोक्तेषु इति सूत्र निर्देशात् तुटोऽभावे पुराणशब्दः सिध्यति।

(३) यद्वां पुरा = पुरातनम् अनीति = जी वयति-बोंधयतीति पुराणं ग्रन्थविवेषः। पुरापूर्वकात् अण् प्राणने इति धातोरचि णत्वे च कृते पुरणशब्दः सिध्यति।

(४) पुरापूर्वकणीञ् प्रापणे इति धातोः औणादिके डप्रत्यते टिलोपे णत्वे च कृते पुराणशब्दो निष्पद्यते। अर्थात् पुरा + नी + ड इमे त्रयोऽवयवा मिलित्वा पुराणशब्दरूपेण परिणता भवन्ति।

(५) महर्षिणा यास्काचार्येण स्वकीये निरुक्तग्रन्थे पुराणशब्दस्य निर्वचनं कुर्वता प्रोक्तमस्ति यत् पुराणं कस्मात् ? पु रा नवं भवति (निरुक्ते ३।९।२४)

अर्थात् पुराणं कस्मादुच्यते ? अतो यत् कदापि पूर्वं नवं स्यात् निरुक्ते यास्काचार्यस्यैव प्रकारेण निर्वचनेन पुराणे नवीनताया भावो नास्ति, किन्तु पुराणशब्दस्यार्थः प्राचीनोऽस्ति।

यद्यपि पुराणशब्दस्य पर्यायवाचिनः प्रत्न-प्रतन-पुरातन-चिरंतनादयः शब्दाः सति तथापि अत्र पुराशब्देन प्राचीनाख्यारिकादियुक्ता महर्षिव्यासद्वारा निर्मिता अष्टादश ग्रन्थविशेषा एव ज्ञायन्ते। यदि पुराणं कश्चिद् नवीनं कथयति तर्हि स एव कथयितुमुद्यतो भविष्यति, यस्य पूर्वोक्तानां व्यूत्पत्तीनां ज्ञानं नास्ति। विचारशीलास्तु व्युत्पत्ति मात्रत एव पुराणं प्राचीनतमं ग्रन्थविशेषं मन्यन्ते। संस्कृतसाहित्यस्य सर्वे ग्रन्थकारा इममेवार्थं स्वीकुर्वन्ति तथा स्वयं पुराणान्यपि अस्यैवार्थस्य मान्यतां प्रददाति। तथाहि मत्स्यपुराणम्–

पुरातनस्य कल्पस्य पुराणानि विदुर्बुधाः।। ५३।७२

वायुपाराणमपि प्राचीनकालतोऽद्यावधि जीवितं साहित्यमेव पुराणं मनुते –

यस्मत् पुरा ह्यनतीदं पुराणं तेन कथ्यते।

निरुक्तिमस्य यो वेद सर्ववापैः प्रमुच्यते।।१।२०३

पद्मपुराणानुसारं प्राचीनां परम्परां व्यक्तीकर्तुं समर्थं शास्त्रमेव पुराममुच्यते –

पुरा परम्परां व्यक्ति पुराणं तेन वै स्मृतम्।। १।१।७३

एवं विभिन्नेषु पुराणेषु कृतायां व्युत्पत्तौ ध्यानप्रदानेन प्रतीयते, यत् पुराणस्य वर्ण्यविषयाः प्राचीनकालतः सम्बद्धाः सन्ति। अपि च पुराणशब्दश्रवणमात्रेणैव व्यासकृतानामष्टादशानां पुराणग्रन्थानां सहसा स्मरणं जायते। प्राचीनानि सन्त्यपि पुराणानि रचनावैचित्र्य-वस्तु-वैचित्र्याभ्यां सदा अभिनवानि प्रतीयन्ते। एवं सृष्टि-प्रलय-प्रसिद्धराजर्षि-वंशपरम्परा-मनुवर्णन-विशिष्टमानवानां पावनचरित्राणां च वर्णनं यस्मिन् ग्रन्थे विद्यते तत् पुराणमुच्यते।

समीक्षाचक्रवर्तिनो म. म. पं. मधुसूनौझामहोदयेनात्मनः पुराणोत्पत्तिप्रसङ्गे विश्वसाहित्यस्येतिहासं पुराणं प्रोच्यते।

द्विविधाधारापर्यालोचनम्

पुराणानां पर्यालोचनया प्रतीयते यत् प्राचीनकाले लोककल्यानार्थं शास्त्रसम्बन्धिन्यौ द्वे धारे प्रचलिते आस्ताम् – एका ऋषिधारा, द्वितीया च मुनिधारा। ऋषिभिः वेदं गृहीत्वा तस्य सुरक्षाया भारो गृहीतः, तथा मुनिभिः पुराणां स्वीकृत्य तस्य प्रवचनस्य प्रचारस्य प्रसारस्य च कार्यं कृतम्, यस्य सङ्केतोऽस्माभिः मार्कण्डेयपुराणेऽवाप्यते। तदनुसारं सर्गाहौ अव्यक्तजन्मनो ब्रह्माणो मुखेभ्यो वेदस्य पुराणस्य चाविर्भावो जातः। तेषु ब्रह्मणो मानसपुत्राः सप्तर्षयस्तस्माद्वेदं गृहीतवन्तः, तथा मानसा मुनयः पुराणं प्रचारं स्वीकृतवन्तः–

उत्पन्नामात्रस्य पुरा ब्रह्मणऽव्यक्तजन्मनः। पुराणमेतद् वेदाश्च मुखेभ्योऽनुविनिः सृताः।।

वेदान् सप्तर्षयस्तस्माज्जगृहुस्तस्य मानसाः। पुराणं जगृहुश्चाद्या मनुयस्तस्य मानसाः।।

(मार्कण्डेयपुराणे ४५।२०, २३)

एवमृषिद्वारा गृहीता वेदधारा प्रारम्भतो यज्ञेषु तत्तद्देवान् निर्दिश्य हविषस्त्यागस्य महत्त्वं प्रददाति। तथा पुराणधारायाः प्रमुखं लक्ष्यं लोकवृत्तस्यानुशीलनपूर्वकं भक्तिद्वारा भगवत्प्राप्तेः समुपदेशदानमस्ति।

**ऋषिमुनिशब्दयोः पार्थक्यविवेचनम्**

ऋषिशब्दस्य व्युत्पत्तिर्भवति ऋषति = प्राप्नोति सर्वान् मन्त्रार्थान् ऋषति ज्ञानेन संसारपारं पश्यतीति वा ऋषिः। तौदादिकाद् ऋषिः गतौ धातोरौणादिकेन किप्रत्ययेन ऋषिशब्दो निष्पद्यते, यस्य सङ्कलितार्थो भवति विशिष्टज्ञानसम्पन्ना, संसारपारगनशीला वा व्यक्तिः। एवम्प्रकारकस्यार्थस्य सङ्कतो विभिन्नेषु पुराणेषु प्राप्यते।

तथा वायुपुराणे ऋषिशब्दस्य चत्वारोऽर्था निर्दिष्टाः सन्ति – गति (ज्ञान) श्रवण-सत्य-तपस्याः ब्रह्मद्वारा यस्यां व्यक्तौ इमे चत्वारोऽर्था नियता कृताः स्युः, सैव व्यक्तिः भवति ऋषिः। मत्स्यपुराणेऽपि।

निरुक्तस्य व्याख्याकर्तुर्यास्काचार्यस्य मतानुसारं ऋषिशब्दस्य व्युत्पत्तिः लभ्योऽर्थो भवति तत्त्वसाक्षात्कारकर्ता व्यक्तिविशेषः – ऋषि – दर्शनात् (२।११)। तैत्तिरीयारण्यके ऋषिशब्दस्य व्याख्या कृतास्ति – दर्शनात् ह वै पृश्नीस्तप्यमान ब्रह्म स्वयंभ्यानार्षात् ऋषयोऽभवन्, तद् ऋषीणासृषित्वम् (२।९) अर्थात् सृष्टाधारम् तपस्यतां ब्रह्मणो मानसपुत्राणां समीपे वेदः स्वयं प्रादुर्भूतः। वेदस्यास्य प्रादुर्भावकारणादृषीणामृषित्वमस्ति। तपः

पूतोऽन्तर्ज्योतिःसम्पन्नो मन्त्रद्वारा तत्त्वदर्शी ऋषिरुच्यते, यस्य संकेतं वायुपुराणमपि करोति।

ऋषधातुः गतिर्हिंसयोरर्थयोः प्रयुज्यते। अतः ब्रह्मज्ञानसम्पन्नो विद्यासत्य तपः परिपूतो वा ब्राह्मण ऋषिरुच्यते, स एव यदा निवृत्तिसमये बलेन बुद्ध्या वा परमेऽव्यक्ते प्रविशति तदा परमर्षिः प्रोच्यते। एवं गत्या प्रयुक्ताद् ऋषधातोः निष्पन्नश्च ऋषिः सर्वजीवनिवृत्तिकारणं भवति। अतः एवास्य ऋषिता मन्यते। ब्रह्मणो मानसाः परमैश्वर्यशालिनः ऋषयः स्वयमुत्पन्नाः स्वनिवृत्तिवुद्धिद्वारा ते तस्मिन् परमे महति आश्रित भवन्ति। अतस्ते परमतत्त्वज्ञानिन महर्षय उच्यन्ते। तेषां परमैश्वर्यशालिनः मानसा औरसा वा पुत्रा परमत्वाश्रयात् परर्षयः प्रोच्यन्ते। तैरुत्पन्ना ऋषयः निगद्न्ते। तत्पुत्राश्च ऋषीकाः प्रोक्ताः, यो स्त्रीपुरुषसंयोगजन्या जाताः परत्वकारणात् महत्त्वाश्रयाच्च एते ऋषीकाः कथ्यन्ते। एषामृषिपुत्रका ज्ञेया यतस्ते महत्त्वं श्रुत्वा परिवर्तिनो जाताः, अतस्ते श्रुतर्षयः कथ्यन्ते। एतत् कोशेऽपि ऋषीणां सप्त भेदा अभिमता सन्ति –

१. ब्रह्मर्षिः,
२. देवर्षिः,
३. महर्षिः,
४. परमर्षिः,
५. काण्डर्षिः,
६. श्रुतर्षिः,
७. राजर्षिश्च।

अर्थात् राजर्षेः श्रुतर्षिः श्रेयान्, ततः काण्डर्षिः ततः परमर्षिः, ततो महर्षिस्ततो देवर्षिः, ततश्च ब्रह्मर्षिः सर्वश्रेष्ठोऽधिक मतोऽस्ति।

ब्रह्मर्षेः स्थानं देवर्षि-राजर्ष्यपेक्षयोच्चतरमस्ति, यतोऽस्य चरमं लक्ष्यं ब्रह्मलोके विद्यते। देवर्षेः स्थानं ब्रह्मर्षेर्निम्नतरं राजर्षेश्चोच्चतरमस्ति। यतो देवर्षेश्चरमं लक्ष्यं देवलोको भवति।

मत्स्यपुराणे पञ्चानामृषिजातीनामुल्लेखो विद्यते। तदनुसारं –

१. अव्यक्तात्मा, ३. अहङ्कारात्मा ५. इन्द्रियात्मा

२. महात्मा, ४. भूतात्मा

चेति पञ्चप्रकारा ऋषयो भवन्ति। तेषु भृगुर्मरीचिरत्रिरङ्गिराः पुलस्त्यः पुलहः क्रतुः मनुर्दक्षः वशिष्ठश्चेत्येमे दश ब्रह्मणो मानसपुत्राः ऋषित्वमहत्त्वाभ्यां द्वाभ्यां धर्माभ्यां युक्ताः सन्ति। अतः इमे महर्षयः कथ्यन्ते वायुपुराणे ब्रह्मणो मानसपुत्रा एव महर्षय उच्यन्ते भृग्वादयो यथा सप्त कल्पे ह्यस्मिन् महर्षयः (७।७०) गीतायां भगवान् श्रीकृष्णश्चात्मानं महर्षिषु भृगुं निर्दिशन् महर्षिणां विश्लेषणं कृतवान् – महर्षीणां भृगुरहम्। (१०।२५) एषामैश्वर्यशालिनां महर्षीणां पुत्रा ऋषयः शुक्र-वृहस्पति-कश्यप-च्यवन-उतथ्य – वामदेवागस्त्य – कौशिक-कर्दम-घालखिल्यः-विश्वश्रवः-शक्तिवर्द्धनाश्च ऋषयः प्रोच्यन्ते, ये आत्मतपोबलेन ऋषित्वं प्राप्तवन्तः। एषामौरसाः पुत्रा ऋषीका भरद्वाज-दीर्घतमः – शरद्वत् – पराशर-श्रृङ्गी-शङ्खनाद्-वैश्रवणादयः ऋषिपुत्राः सन्ति। एते सत्यबलेन ऋषित्वमलमन्त। एवंप्रकारा अन्येऽपि ऋषयो वायुपुराणस्य ५९ अध्याये विवेचिता ज्ञेयाः।

एवंविधानामृषीणां माध्यमेनैवापौरुषेयाणां वेदानां विश्वस्मिन् आविर्भावो जातः। सर्वप्रथम् ऋषिभिः वर्णमयो विग्रहवान् वेदः आत्मनः दिव्यैः श्रोत्रैः श्रुतः। अतो वै वेदा

श्रुतयोऽपि प्रोच्यन्ते। तदनन्तरं तेषामृषीणां शिष्यैः प्रशिष्यैः तच्छिष्यैश्चाविच्छिन्नपरम्परयाऽद्यत्वेऽपि वेदानां प्रचारः प्रसारश्च निरन्तरं बोभूयते।

पुराणेषु ऋषीणां विधेयकर्मसम्बन्धे विशिष्टरूपेण किञ्चिन्न प्रतिपादितमस्ति, प्रतीयते यत् प्रजापतेर्ब्रह्मणो मानसपुत्रा महर्षय एव ब्रह्मर्षयः प्रोच्यन्ते। पुराणेषु ब्रह्मणो मानसपुत्रातिरिक्तानां कियतां ब्रह्मर्षीणां चरित्रस्य प्रासङ्गिक उल्लेखो विद्यते। तेनेदं ज्ञायते यद् ब्रह्मर्षयो वेदज्ञातारो ब्रह्मज्ञानिनस्तपोमूर्तयोऽलौकिकशक्तिसम्पन्नाश्च भवन्तिस्म ये स्वतपोबलेनासम्भवमपि कार्यं कदाचित् सम्भावयन्तिस्म।

के के देवर्षयः सन्तीतिविषये विशिष्टरूपेणोल्लेखस्तु नास्ति, किन्तु वायुपुराणे धर्मपुत्र नर-नारायणौ, क्रतुपुत्रा बालखिल्याः, पुलहपुत्रः, कर्दमः, पर्वतः, नारदः, कश्यपपुत्रौ ब्रह्मवादिनौ असितदेवलौ च देवर्षयः प्रोक्ताः सन्ति।

ब्रह्मर्षि-देवर्षिभ्यो राजर्षेः स्थानं निम्नतरस्य स्तरस्य विद्यते। राजर्षिनाम्नाऽभिधानस्य कारणं प्रतीयते, यद् ये राजानः प्रजावर्गरञ्जयन्तः सर्वथा सत्यवादिनो धर्मात्मानः परमार्थचितका भवन्तिस्म, त एव राजर्षयः प्रोच्यन्तेस्म। पुरामानुसारं जनक-ययाति-शान्तनु-मान्धातृ-सगरप्रभृतयो राजानः स्वधर्माचरणद्वारा राजर्षयः कथ्यन्तेस्म।

ब्रह्मणो दशसु मानसपुत्रेषु मरीचि-अङ्गिरोऽत्रि-पुलस्त्य-पुलह-क्रतु-वसिष्ठा एते सप्तर्षिरूपेणावतीर्णा आसन्। महाभारतेऽपि एत एव मानसाः सप्तर्षयः प्रोक्ता सन्ति।

एते लेदज्ञातारः प्रवृत्तिमार्गसञ्चालकाः प्रजापतिपदे प्रतिष्ठिताः सन्ति। पुराणानुसारं प्रतिमन्वन्तरं भिन्ना भिन्नाः सप्तर्षयो भवन्ति। वर्तमाने मन्वन्तरे वसिष्ठ-कश्यप-अत्रि-

जमदग्नि-गौतम-विश्वामित्र-भगद्वाजाः सन्ति सप्तर्षयः। वैदिकसाहित्ये सप्तर्षिशब्दः सप्तर्षितारकपुञ्जस्य द्यौतकरूपेणापि दृष्यिगोचरीभवति।

**मुनिशब्दार्थः**

मनु अवबोधने धातोः नेरुच्च (४।१२२) इत्यौणादिकसूत्रद्वारा इ.. प्रत्यये मकारोत्तरवर्तिनोऽकारस्य चोकारे कृते मुनिशब्दो निष्पद्यते। मनुते, जानाति यः स मुनिः, मन्ता वेदशास्त्रतत्त्वावगन्तृत्वम्। शङ्खस्मृतौ मुनिशब्दस्य स्वरूपमुक्तमस्ति, यद् य एकान्ते निवसति, मार्गे वा गच्छतो यस्य यत्र सन्ध्या जायते तत्रैव य स्तिष्ठति स मुनिरुच्यते।

महाभारते लिखितमस्ति यद्वचने निवसतौ यस्य ग्रामः पश्चाद्भवति ग्रामे वा वसतो यस्य वनं पश्चाद्भवति स मुनिर्ज्ञेयः। अर्थात् पृष्ठस्य वस्तुन उपयोगमकुर्वाँ यतिः मुनि निर्गद्यते। वनपर्वणि मुनेः स्वरुपस्य सम्यग्विवेचनं विद्यते। तत्र मुनौ तीव्रतपस्या तथा क्षमाशीलता अत्यावश्यकौ गुणौ प्रोक्तौ स्तः।

पुराणेषु अनेकत्र मुनि-महामुनिशब्दयोः प्रयोग उपलभ्यते। अमरसिंहेन मुनेः पर्यायो वाचंयमः प्रोक्तोऽस्ति, यस्य शब्दार्थो मितभाषी भवति, किन्तु पुराणेषु ऋषि-मुन्येर्लक्षणे किमपि विशिष्टमन्तरं महि प्रदर्शितमस्ति। भृगु-भव-मरीचि-अङ्गिरः-पुलस्त्य-पुलह-क्रतु-अत्रि-वसिष्ठा एते नव महात्मान ऋषि-मुनिशब्दाभ्यां विशेषिताः सन्ति। (वि. पु. –१।७।२६-२७) एवं विश्वामित्र-कण्व-नारदा अपि महरिषिमहामुनिभ्यां द्वाभ्यां शब्दाभ्यां विशेषिताः सन्ति।

ऋग्वेदे मुनीनां शक्तेराचरणस्य च यद् वर्णनमुपलभ्यते तदनुसारं मुनयः परिव्राजका योगिनो वा वक्तुं शक्यन्ते। एकत्र वेदे इन्द्रो मानीनां मित्रं प्रोक्तोऽस्ति। जौन-

बौद्धवाङ्मयेऽपि मुनीनां चरित्रच्छित्रणं प्राप्यते, तत्र तेषामादर्शमयश्रेष्ठपुरूषरूपेण दर्शनं जायते। जातकसाहित्येन गृहविहीनौ यतिमनी श्रमणनाम्ना अभिहीतौ स्तः। बुद्धोऽपि मुनिरभिमतो विद्यते, यतस्तस्याष्टदशसु नामसु एको मुनिशब्दोऽपि वर्तते।

गीतायां दुःखेषूपस्थितेषु अनुद्विग्नमनाः सुखेषु प्राप्तेषु विगताभिलाषो रागद्वेषभयक्रोधादिरहितश्च मुनिः स्थिरबुद्धिः प्रोक्तोऽस्ति।

भारद्वाजसंहितायान्तु मन्त्रद्रष्टृत्वं संलिनमानसत्वं च ऋषि-मन्योर्वैशिष्ट्यं व्यक्तीकृतमास्ते। एवमृषिषु मुनिषु च विभिन्ना विशेषता विद्यते। अतः ऋषिभिः वेदपरम्पराया मुनिभिश्च पुराणपरम्परायाः प्रचालने न कापि भवितुमर्हति विप्रतिपत्तिः।

**पुराणानां स्रोतांसि**

पुराणानां कानि सन्ति स्रोतांसि येषामाधारेण भगवता व्यासदेवेन तेषां प्रणयनं कृतमिति जिज्ञासायामिदमुच्यते यत् पुराणतत्त्ववेत्ता महर्षिर्व्यासश्चतुर्णामाख्यानोपाख्यान-गाथाकल्पसुद्धीनामकरणानामाशयमादायाष्टादश महापुराणानि विरचयाञ्चकार।

आख्यानोख्याने – तत्र स्वयं दृष्टार्थकथानकमाख्यानमुच्यते, परम्परया श्रुतं कथानकमुपाख्यानमाख्यायते।

अर्थात् – यस्यार्थस्य साक्षात्कारः स्वयं वक्त्रा कृतोऽस्ति दाख्यानं निगद्यते, यस्य चार्थस्य कथनं वक्त्रा अन्यव्यक्तिद्वारा श्रुतंविद्य ते तदुपाख्यानं कथ्यते। एतदनुसारं मर्यादापुरुषोत्तमस्य श्रीरामचन्द्रस्य, सत्यव्रतस्य राज्ञो हरिशश्चन्द्रस्य, धर्मिष्ठस्य राज्ञो ययातेधर्मराजयुधिष्ठिरस्य च कथानकस्य केवलं परम्परा श्रुताऽस्ति तद् रामोपाख्यानं हरिश्चन्द्रोपाख्यानं ययात्युपाख्यानं युधिष्ठिरोपाख्यान मुच्यते।

केषाञ्चिद् विदुषां मते भेदोऽयं न दृष्टश्रुतकारणको विद्यते, अपितु महदल्पाकारको वर्तते। आकारे यत् कथानकं महदस्ति तदाख्यानं निगद्यते, अपेक्षाकृतं स्वल्पाकारकं कथानकमुपाख्याननाम्ना प्रसिद्धमस्ति। यथा रामायणे रामस्य कथानकं व्यापित्वादारख्यानमुच्यते। तदेशदेशवर्तित्वात् सुग्रीवस्य कथानकमुपाख्यानं कथ्यते। रामोपाख्यानं सुग्रीवोपाख्यानञ्च।

**गाथा –**

अज्ञातकर्तृकाणां लोकप्रख्यातानां केषाञ्चिन्महापुरुषाणां वैशिष्ट्यबोधकानां श्लोकानां संज्ञा गाथाऽस्ति। प्राचीनसाहित्येषु अनेकानि एवंविधानि प्राचीनानि पद्यानि समुपलभ्यन्ते येषां कर्तृणां नामानि नोपलभ्यन्ते, यानि केषाञ्चिन्मान्यमहीपतीनां प्रशंसायामसामान्ये शौर्ये दाने महिम्नि च प्रतिपादितानि सन्ति। ईदृशा अज्ञातकर्तृकाः परम्परया प्रचलिता लोकप्रख्याताः श्लोका गाथापदेनोच्यन्ते। पुराणगाथासु केषाञ्चिन्महापुरुषामां सार्वभौमं जीवनदर्शनं संक्षेपतः एकस्मिन् द्वयोर्वा श्लोकयोरभिव्यक्तीकृतमस्ति। अधिकांशतः इमा गाथा भारतीयसाहित्येऽतीतकालतः सम्बद्धा सन्ति, तथैतिहासिकव्यक्तीनां दानमहत्त्वाभिषेकादीनां वर्णनं कुर्वन्ति। यथा महाभारते ययातिगाता –

न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते।।
यत् पृथीव्यां ब्रीहिजवं हिरण्यं पशवः स्त्रियः।
एकस्यापि न पर्याप्तं तस्मात्तृष्णां परित्यजेत्।।

वायुपुराणे पितृगाथा यथा –

एष्टव्या बहवः पुत्रा यद्येकोऽपि गयाँ ब्रजेत्।

यजेत् वाश्वमेधेन मृतो वा वृषमुत्सृजेत्।।

गयां यास्यति यः पुत्रः स नस्त्राता भविष्यति।

गयाप्राप्तं सुतं दृष्ट्वा पितृणामुत्सवो भवेत्।।

मत्स्यपुराणे मनुमत्स्यसंवादप्रसङ्गे पितृगाथायामुक्तमस्ति, यथा पितृणां निरन्तरमियमिच्छा जायते यदस्माकं कुले एवं सत्पात्रवंशजो भवेद् योऽस्मभ्यं जलपरिपूर्णासु नदीषु जलाञ्जलीर्दद्यान् नित्यं श्राद्धं वा कुर्यात् –

विष्णुपुराणे सप्तर्षिगाथा –

तत्रापि श्रुयते श्लोके गीतः सप्तर्षिभिः पुरा।

खट्वाङ्गेन समो नान्यः कश्चिदुर्व्यां भविष्यति।।

येन स्वर्गादिहागत् मुहुर्तं प्राप्य जीवितम्।।

त्रोऽभिसंहिता लोका बुद्ध्या दानेन चैव हि।।

कार्तवीर्यगाथा च –

नूनं न कार्तवीर्यस्य गति यास्यन्ति पार्थिवाः।

यज्ञैर्दानैस्तपोभिर्वा प्रश्रयेण दमेन च।।

कार्तवीर्यार्जुनो राजा यशस्वी बलवान् भुवि।

यस्य स्मरम भवेण गतं नष्टं च लभ्यते।।

**कल्पशुद्धिः –**

कल्पशुद्धिशब्दस्य तात्पर्यनिर्णये विदुषामस्ति परस्परं मतभेदः। केचन कल्पशुद्धिशब्दास्थाने कल्पजोक्तिरिति पाठं मत्वा विभिन्नेषु कल्पेषुत्पद्यमानानां पदार्थानां विवरणमित्यर्थं कुर्वन्ति। श्रीधरस्वामिना तु कल्पशुद्धिरिन्यस्यार्थः श्राद्धकल्प इति कृतोऽस्ति। समीक्षाचक्रवर्तिनः पं. मधुसुदननौझा महोदयस्य तथा म. स. पं. गिरिधरचतुर्वेदस्य च मते कल्पशुद्धिशब्देन धर्मशास्त्रस्य सर्वे विषया अभीष्टाः सन्ति। कल्पस्य तात्पर्यं तौ वेदाङ्ग मन्येते, यत्र श्रौत गृह्य-धर्मसूत्र-सदाचार-संस्कारा अन्तर्भवन्ति। शुद्धिपदेन तौ षड्विधां शुद्धिः मन्येते, आत्मशुद्धिः तथा मनः शुद्धिः। मलशुद्धिः, स्पर्शशुद्धि, अद्यशपद्धिः, एनः शुद्धिः।

तथा च भगवताव्यासेवेदेन पुराणनिर्माणावसरप्रतिसङ्गे एषां चतुर्णामाख्यानोपाख्यानगाथाकल्पशुद्धीनां मन्यते तथा सम्यगुपयोः कृतोऽस्ति। अत इमानि सन्ति पुराणानां स्त्रोतांसि उपकरणानि उपादानानि वेत्यत्र नास्तिकाचति संशीतिः।

स्कन्दपुराणानुसारं पुराणेषु पञ्चलक्षणातिरिक्तो यावान् विवेच्यो विषयो विद्यते तावान् आख्यानपदेन प्रसिद्धोऽस्ति।

पञ्चाङ्गानि पुराणस्य चाख्यानमितरं स्मृतम्।

किन्तु मत्स्यपुराणानुसारं पञ्चलक्षणणमेवाख्यानकमुच्यते –

पञ्चाङ्गानि पुराणेषु आख्यानकमिति स्मृतम्।।

**पुराणेतिहाससाहित्यम्**

पुराणसाहित्यस्योतिहासेन सहास्ति घनिष्ठः सम्बन्धः। प्राचीनग्रन्थेषु द्वयोर्नाम सम्मिलितरूपेणोपलभ्यते। छान्दोग्योपनिषदि इयं कथाऽस्ति यत् – एकदा देवर्षिर्नारदो ब्रह्मविद्यामध्येतुं सनत्कुमारपार्श्वे उपस्थितस्तदा तेन पृष्टो यद् भवता इतः पूर्वं किं किमधीतमस्ति ? तदुत्तरे स स्वाधीतविद्यामु इतिहासपुराणयोर्नाम गृहीत्वा तत् पञ्चमं वेदं प्रावोचत् – ऋग्वेदं, भगवोऽध्येमियजुर्वेदं सामवेदमप्यथर्वाणमितिहासपुराणं पञ्चमं वेदानां वेदम्।

न्यायभाष्ये वात्स्यायनेनापि विषयभेदात् साहित्यस्य त्रयो भेदाः स्वीकृताः सन्ति। १. यज्ञः, २. लोकचरितम्, ३. व्यवहारव्यवस्थापनं च। एषु यज्ञो मन्त्रब्राह्मणात्मकस्य वेदस्य विषयः। लोकचरितमितिहासपुराणस्य विषयः। तथा व्यवहारव्यवस्थापनम्, मानवानां पुण्य-पापदीनां निर्धारणञ्च धर्मशास्त्रस्यास्ति विषयः।

वस्तुतो द्रष्टुः प्रवक्तुश्च दृष्ट्या एषु भेदो नास्ति, यतो हि ये ऋषयो मन्त्राणां द्रष्टारः सन्ति, त एव इतिहासपुराणस्य धर्मशास्त्रस्य द्रष्टारो वक्तारश्च सन्ति। किन्तु एषु विषयविवेचनदृष्ट्या पार्थक्यं स्वीकृयते।

यास्काचार्येण स्वनिरुक्ते पुराणेतिहासयोर्निरुक्तिः कृताऽस्ति यत् पुरानवं भवति पुराणम् तथा इतिहासस्य व्युत्पत्तिः इति + ह + आस = इतिहासः (इति = एवं प्रकारमं, ह= निश्चयेरूपेण आस = वर्तमानमासीत्) एवं पुराण शब्दस्यार्थो भवति यत् प्राचीनं सदपि नवीनं स्यात् तत् पुराणम् तथा इतिहासस्यार्थो भवति यः प्राचीने काले वास्तविकरूपेण घटितघटनायाः सङ्केतं करोति स भवतीतिहासः। दुर्गाचार्योऽपि निरुक्तवृतौ निदानमुतः इति ह एवमासीत् इति उच्यते स इतिहासः (२।३।१)

स्वामिशङ्कराचार्येण स्वकीये छान्दोग्योपनिषद्भाष्ये – उर्वशी हाप्सराः पुरुरवसं चकमे (११।५।१।१)। इति शतपथब्राह्मणाधारेण उर्वशीपुरुरवसोः संवादसूचकोऽश इतिहासो मन्यते – असद्वा इदमग्र आसीत्, इत्यनुसारं सृष्टिप्रक्रियाघटितविवरणं पुराणं प्रोच्यते। इतिहासः ईत्युर्वशीपुरुरवसोः संवादादिः, उर्वशी हाप्सरा इत्यादि ब्रह्मणमेंव। पुराणम् असद्वा इदमग्र आसीत्, इत्यादि। (छा. उ. शां. भा. ७।१) एवं शङ्कराचार्यमते प्राचीना उपलभ्यते। अस्यैव क्रमस्यानुकरणं कुरुतः लिङ्गपुराणं मार्कण्डेय पुराणञ्च। एषु जीवात्म-परमात्मनो व्यवहारिकभेदस्वीकारपूर्वकं ब्रह्मणो ब्रह्माण्डपर्यन्तं विवर्तस्यान्ते तत्रैव लयस्य च क्रमो विस्तरेण वर्णितोऽस्ति। द्वितीयोऽवशिष्ठक्रमो – मुख्यतया नारदीय-ब्रह्मवैवर्त-अग्नि-विष्णु-मत्स्य शिव-कुर्म-पद्मपुराणेषु अङ्कितोऽस्ति। अस्मिन् क्रमे जीवात्म-परमात्ममोः वास्तविकीमेकतामभिलक्ष्य परमात्मनो र्नामरूपोपाधिद्वारा संसारे प्रतिभासमानस्यान्तेविद्यानिवृत्तिपूर्वकं पुनः परमात्मनेव लयस्य क्रमो दर्शितो विद्यते।

तृतीयो वर्णसाम्यक्रमः केवलं देवीभागवते। तत्र वास्तविकं पौर्वापर्यं परित्यज्य केवलं तुल्यवर्णसाम्यतया मद्वयं मद्वयञ्चैव वैवेत्यादिना पुराणानां १८ नामानि गणितानि सन्ति। विशेषतो द्रष्टव्यं श्रीमाधवाचार्यस्य पुराणदिग्दर्शनम्, धर्मविज्ञानं वा स्वामिनो ज्ञानानन्दस्य।

**पुराणानां क्रमविमर्शः**

पुराणानां गणनाप्रसङ्गे देवीभागवतं विहाय सर्वेषु प्रथमं पुराणे ब्रह्मपुराणं विद्यते, अन्तिमं पुराणं च ब्रह्माण्डपुराणमस्ति। अस्येदं तात्पर्यमस्ति यत् सृष्ट्यादौ ब्रह्मैव ब्रह्माण्डरूपेण परिणमते। इदं दृश्यमानं नामरूपात्मकं जगद् ब्रह्मातिरिक्तं नास्ति।

एतदनुसारं भगवतो नारायणस्य नाभिकमलादाविर्भूते पद्मे आसीनो ब्रह्मदेनो जगन्निर्मिमीते। यदि पुराणानां सृष्टिक्रमविकासो वैज्ञानिकदृष्ट्या द्रष्टव्योऽस्ति तर्हि क्षीरसमुद्रे शेषशायिनो भगवतो विष्णोः ध्यानं विधेयम्। क्षीरसागरे शेषशय्यायां शयानस्य भगवतो विष्णोः जगज्जननी लक्ष्मीः पादौ संवाहयति तथा देवर्षिर्नारदः समीपे स्थितः वीणां वादयन् तं स्तौति। प्रलयकालसमाप्त्यनन्तरं कल्पादौ यदा भगवति विष्णौ संसारस्य सिसृक्षा जायते तदा तन्नाभिकमलादेकं कमलं निःसरति। ततो ब्रह्मा प्रादुर्भवति। तत्र कमले उपविष्टश्चतुर्मुखो ब्रह्मा तपःपुर्वकं संसारस्य सृष्टिं कर्तुमारभते। चित्रमिदं ध्यात्वा पुराणानां क्रमे ध्यानं प्रदेयम्। सम्प्रदायविदां पुराणामर्मज्ञानां विपश्चितां मतेन पुरामानां क्रमः साभिप्रायो विद्यतेष नाकस्मिकोऽस्ति, प्रधानविषयदृष्ट्या क्रमनिर्देशस्यौचित्यं सुसङ्गतं च वर्तते। तथाहि –

(१) सर्वप्रथममियं जिज्ञासा जागर्ति यदस्य दृश्यमानस्य ब्रह्माण्डस्य रचयिता कोऽस्ति ? अस्योत्तरं दातुं प्रथमं ब्रह्मपुराणमुपतिष्ठते, तेनेदं सूच्यते यद् ब्रह्म ब्रह्माऽभवत्स्वयम्इति तैत्तिरीयश्रुत्यनुसारं ब्रह्मैव विधातृरूपेण सृष्टिरचयिताऽस्ति। अर्थात् स्थावर-जङ्गमात्मकस्य दृश्यमानस्य जगतो निर्मातुः ब्रह्मणः स्वरूपं प्रथमं ब्रह्मपुराणं वोधयितुं प्रवृत्तम्।

(२) ततो द्वितीयः प्रश्नः समुदेति यद् ब्रह्मा कुत उत्पन्नः अस्योत्तरं पद्मपुराणं प्रदातुमुपतिष्ठते यद् ब्रह्मा नारायणस्य नाभिकलादुत्पन्नः।

(३) ततः तृतीया शङ्का समुदेति यत् तत् पद्मं कुत उत्पन्नम् ? एतत्समाधानायोपनिष्ठते तृतीयं विष्णुपुराणम्। अत्र विष्णोः नाभिकमलात्। पद्ममुत्पन्नं ततो ब्रह्मा प्रादुर्भतः। एतद् विलोमक्रमन्निर्दिष्टमोस्ति।

(४) एतदनन्तरं जिज्ञासा जायते यद् ब्रह्मणो मूलसृष्टेर्ज्ञानं कथं जातम् ? तदुत्तरं, शिवपुरामं प्रददाति यत् शिवात् (वेदात्)। प्रस्तुतः धाता यथापूर्वमकल्पयत् इति ऋग्वेदमन्त्रानुसारं वेदादेव सर्वविधा सृष्टिः संजाता। अतएव भगवता मनुनाऽपि उल्लिखितमस्ति – वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे (म. स्मृ. १।२१) ततः

(५) लीनार्थगमकं चिह्नं लिङ्गमित्यमिधीयते। महाप्रलयदशायां विलीनपदार्थानां कारणात्मकतत्त्वानां पुनः संधीकरणं सर्गोऽस्ति। एतद्रहस्यं पञ्चमं लिङ्गपुराणं वोधयाति।

(६) मानवसृष्टौ जीवनामनेकविधविषमता एवं जन्ममरणविधाकाऽस्तीतीदं रहस्य वोधयितुमौर्ध्वदैहिकक्रियाया विवेचकं षष्ठं गरुडपुराणमुपतिष्ठते।

(७) अप एव ससर्जादौ, आपो नारा इति प्रोक्ताः, इत्याद्याधारेण नारं जलं ज्ञानं वा ददातीति नारद इतिव्युत्पयनुसारं नारदाता नारद उच्यते। इदं तत्त्वं वोधयितुं सप्तमं नारदीयं पुराणमुपति।

(८) ऐश्वर्यषड्गुणसम्पन्नो दक्षिणांशो भगवान् वामांशश्च भगवती अस्ति। इति रहस्यं वोधयितुमष्टमं भागवतपुराणमुपतिष्ठे। यद् भगवतो भगवत्या वा इदं

भागवतमितिव्युत्पत्याधारेण पुरुषप्राध्यान्यत् श्रीमद्भागवतं तथा प्रकृतिप्राधान्याद् देवीभागवतनाम्ना प्रसिद्धमस्ति।

(९) जन्ममरणछक्रे वद्धस्य जीवस्य कल्याणं कथंकारं सम्भवति-इत्यस्योत्तरमग्निपुराणं ददाति। यज्ञादिभिः सकामकर्मभिः जीवस्यात्मकल्याणं कर्तुमवसरो ददाति। यज्ञादिभिः सकामकर्मभिः जीवस्यात्मकल्याणं कर्तुमवसरो मिलति। अग्निरूपेण क्रियाशिलं वस्तु एवं मूलं प्रेरणं प्रददातीति मतमपदेष्टुमष्टमस्याग्निपुराणस्य आवश्यकताऽस्ति।

(१०) दशमं स्कन्दपुराणं भगवतः शिवस्यावतारान् चरित्रं च वर्णयत् – विद्याकामस्तु गिरीशमित्यनुसारं ब्रह्मविद्याप्राप्तये तदुपासनाया आदेशं ददाति।

(११) धर्मार्थकाममोक्षाणां चतुर्विधानां पुरुषार्थानां प्रधानं साधनमारोग्यतैवास्ते तत्प्राप्तये आरोग्यं भास्करदिच्छेत् इत्यनुसारं भगवतो भास्करस्योपासनां वोधयितुमेकादशं भविष्यपुराणमुपतिष्ठते।

(१२) मनुष्याणां सर्वविधविघ्नशमनार्थं गणेशादिदेवानामाराधनावोधनाय द्वादशं ब्रह्मवैवर्त पुराणमस्ति।

(१३) सप्तमं मार्कण्डेयपुराणं भगवत्या आद्याशक्तेः महिम्नः प्रकाशकमस्ति। इमे द्वेपुराणे वहुविधबाधाव्याप्तानां साधनाशक्तिशून्यानां च कलिजीवानां – कलौ चण्डीविनायकौ इत्यनुसारं दुर्गा-गणेशयोरुपासनाया उपदेशं दत्तः(१४-१७)। चत्वारि वामन-वाराह-मत्स्य-कुर्मपुराणानि प्रधानतया भगवतोऽवतारस्य निरूपणं कुर्वन्ति तथा मुमुक्षुभ्यः पुरुषेभ्यः भगवतो

विष्णोः शरणागतेरूपदेशं ददाति। एवमेषु प्राणिनां कल्याणाय शिव-सूर्य-गणेश-दुर्गा-विष्णूनामेषां पञ्चानां देवानामुपासना निर्दिष्टाऽस्ति।

(१८)अन्तेऽष्टादशं ब्रह्माण्डपुराणं समस्तां सृष्टिप्रक्रियामुपसंहरत् स्वमूलतत्त्वे ब्रह्मणि संकेतयति यद् आकाशात् पतितं तोयं यथा गच्छति सागरम् त्यनुसारमियं नानाविधोपासना ब्रह्मोपासनायामेव परिणता भवति। इदमेव १८ पुराणानां विसिष्टक्रमस्य वैज्ञानिकं रहस्यमस्ति, यस्योल्लेखः श्रीमद्भागवते महापुराणे –

ब्राह्मं पाद्मं वैष्णवं च शैवं लिङ्गं सगारुडं।
नारदीयं भागवतं माग्नेयं स्कान्द संज्ञितम्।।
भविष्यं ब्रह्मवैवर्तं मार्कण्डेय सवामनम।
वारहं मात्स्यं कौर्मं च ब्रह्माण्डाख्यमिति त्रिषट्।।(१२।७।२३।२४)

पुराणानां द्वितीयोऽवशिष्टोक्रमो नारदीयादिपुराणेषूपलभ्यते। अस्मिन् क्रमे शिवपुराणस्य स्थाने वायुपुराणस्योल्लेखोऽस्ति। अत्र क्रमे ब्रह्म पद्मविष्णुपुराणानां गणनाक्रमः पूर्ववदेवास्ति। अत एषां शंका-समाधानमपि तथैवास्ते। तदनन्तरं शङ्का समुदेति यद् विष्णुः कस्मिन्नाधारे स्थितः ? अस्य समाधानाय चतुर्थं वायुपुराणमुपतिष्ठते, यतो भगवान् विष्णुः शेषशय्यायां स्थितोऽतो विष्णोः शयनस्थानस्य शेषस्य निरूपणं वायुपुराणे विशेषतः कृतमस्ति। शेषस्याधारः सरस्वान् क्षीरसागरोऽस्तीति बोधयितुं पञ्चमं सार्सवतकल्पीयं श्रीमद्भागवतपुराणनुपतिष्ठते। क्षीरसमुद्रे शेषशय्यायाः समीपे वीणापाणिः देवर्षि नारदो विराजते, रहस्यमिदं बोधयुतुं षष्ठं नारदीयपुराणमायाति। इमानि षट् पुराणानि स्थूलतत्त्वात् सूक्ष्मतत्त्वे संकेतयन्ति। एषां मूलं तत्त्वं किमस्तीति जिज्ञासा-

शान्तये सप्तमं मार्कण्डें पुराणमुपतिष्ठते। अस्य सिद्धान्तोऽस्ति यत् प्रकृतिदेवी एव सर्वेषां मूलं तत्त्वमस्ति। अष्टमेऽग्निपुराणेऽग्निदेवः सर्वाधारः प्रोक्तः। अग्नेरुत्पादकः सूर्योऽस्ति, स्थावरजङ्गमात्मकस्य जगतः उत्पादने भगवतः सूर्यस्य महत्ता सर्वातिशायिनी विद्यते। इदमेव बोधयितुं नवमं भविष्यपुराणमायाति। भविष्यपुराणे सूर्य एव प्रधानं तत्त्वं स्वीकृतोऽस्ति। अवमनेका विप्रतिपत्तीः कथयित्वा मध्ये ब्रह्मवैवर्तं ब्रह्मैव सूक्ष्मतत्त्वं-वोधयति, यतो हि अनेनैव जगतः सृष्टिर्भवति। अर्थात् सर्वं जगत् ब्रह्मण एवास्ति विवर्तम्। एषु पुराणेषु क्रमशः सृष्टेः पूर्णविकासनिरूपणानन्तरमियं जिज्ञासा समुदेति यत् तत् मूलं तत्त्वं ब्रह्म कथं ज्ञायेत ? तत्तु निर्गुणमस्ति सगुणरूपेण तस्य ज्ञानं कथं जायेत ? तत्कथंकारं सृष्टेः निर्वाहं करोति ? आत्मकल्याणार्थिभिः कीदृशी उपासना विधेया ? अस्योत्तरमेकादशं लिङ्गपुराणं त्रयोदशं च स्कन्दपुराणं भगवन्तमाशुतोषं शङ्करं निर्दिशतः। द्वादशं वाराहपुराणं चतुर्दशं वामनपुराणं पञ्चदशं कूर्मपुराणं षोडशं मत्स्यपुराणञ्च भगवतो विष्णोरवताराणां विवरणं ददाति। सृष्टिप्रक्रियायां येषामवताराणामुपयोगोऽस्ति तेषामेव नाम्ना तेषां पुराणानां नामानि निर्दिष्टानि। येन क्रमेण एषामवताराणां सृष्टिप्रक्रियायामुपयोगोऽस्ति, स एव क्रम एषां पुराणानामभिमतोऽस्ति। यद्यपि विष्णोरन्येऽवतारा अपि परमाराध्याः सन्ति तथापि सृष्टिप्रक्रियायामेषां चतुर्णां प्रधानता विशेषरूपेण दत्ताऽस्ति। अन्तिमयोर्द्वयोः पुराणयोः सम्बन्धो जीवजन्तूनां गतिविधिभ्यामेवास्ति। सृष्टिचक्रे बम्ब्रभ्यमाणानां जीवानां केन केन कर्मणा का का गतिर्भवति ? उपासनार्थं जीवानां विविधगति बोधयितुं सप्तदशं गरुडपुराणमस्ति, यद् मरणोत्तरस्थितेः विशेषरूपेण विवरणं एवं क्रमवद्धस्य जीवस्यौर्द्धदैहिक प्रक्रियाप्रतिपादकं

सप्तदशं गरुडपुराणम्। रसनायासमस्तोय ब्रह्मण्मेव पर्यवसानात् ददाति। सृज्यमानस्य जगतः सीमानिरूपणाय सर्वासां गतीनामाधारं बोधयितुमन्तेऽष्टादशं ब्रह्माण्डपुराणमुपतिष्ठते, यतो हि पुरुषान्न परं किञ्चित् सा काष्ठा सा परागतिः इत्यनुसारं ब्रह्मणोऽग्रे किञ्चित् ज्ञातव्यं वस्तु नावशिष्यते। इदमेवास्यावशिष्टक्रमस्यास्ति रहस्यम्।

तथाहि नारदपुराणक्रमः –

ब्राह्मं पाद्मं वैष्णवं च वायवीयं तथैव च।
भागवतं नारदीयं मार्कण्डेयं च कीर्तितम्।।
आग्नेयं च भविष्यं ब्रह्मवैवर्तं लिङ्गके।
वाराहं च तथा स्कान्दं वामनं कूर्मसंज्ञकम्।।
मात्स्यं च गारुडं तद्वन् ब्रह्माण्डाख्यमिति त्रिषट्।। ९०।१-३

यद्यपि प्रतिपुराणं विभिन्ना विषया वर्णिताः सन्ति तथापि प्राधान्येन व्ययदेशा भवन्ति इति न्यायाधारेण कस्यचिदेकस्य विषयस्य प्राधान्यात् पुराणानां प्रतिपाद्यविषयाणां निरूपणं क्रमेणानेन कृतमस्ति। एषु क्रमेषु यस्य पुराणस्य यत् स्थानं नियतमस्ति तत्तस्य पुराणस्य प्रतिपाद्यविषयमुख्यताया आधारेणैव कृमस्ति। प्रसंगवशात्तु प्रतिपुराणमनेकेषां विषयाणां वर्णनं विद्यते।

एवं पुराणवर्णितानि पूर्वजानामाचरमानि यदि कस्मिंश्चिद्देशे अंसगतानि प्रतीरन् तर्हि तथास्थितान्यपि तानि न कांश्चिदपि पथभ्रष्टान् कुर्वन्ति, किन्तु तानि कर्तव्यपथकाठिन्यमवबोध्यास्मान् सुदृढान् कर्तुं शक्नुवन्ति। राज्ञो नलस्य द्युतकारणात् किं किं कष्टं न जातम् – राज्यच्युतिः, पत्नी वियोगः, ऋतुपर्णस्य सारथ्यस्वीकृतिरित्यादीनि

बहुनि कष्टानि जातानि। धर्मराजस्य युधिष्ठिरस्य द्यूतकारणात् सत्या द्रौपद्या केशग्रहणं सभायाय नग्नीकरणं राज्यापहरणादिकं च कष्टजात् जातम्। पाण्डवानां वनवासे बहुनि कष्टानि जातानि। अन्ते सर्वान्तकारि महाभारतसंग्रामपरिणामं पठित्वा पुरामेषु अक्षैर्मादिव्य इत्यादि वेदवचनानां महत्त्वं ज्ञायते। अतः पुराणेषु किञ्चित्प्रक्षेपपाठात् तानि सर्वथा हेयानि न मन्तव्यानि। तत्र सदसद्विवेकबुध्या कार्यं साधनीयम्।

**पुराणरचनाकालनिर्णयः**

पुराणानां निर्माणकालस्य विवेचने मतद्वयमस्ति। एकं भारतीयं मतं द्वितीयं च पाश्चात्यमतम्। पुराणानां निर्णानं कदा जातमितिप्रश्नस्य समाधानं किञ्चिज्जटिलमस्ति, यतो हि पुराणेष्वेषां निर्माणकालस्य क्वचनापीदमित्थंरूपेण कश्चन सङ्केतो नास्ति। पुराणनिर्माणकालनिर्देशात् पूर्वमिदं वक्तुत्यावश्यकमस्ति, यत् पुराणानां मूलरूपं वैदिककालेऽप्यासीत्। ब्रह्मविद्यामध्येतुं सनकादीनां समीपे उपस्थितो देवर्षिस्तैः पृष्ठो यद्भवता इतः पूर्वं किं किमधीतमिति। तदा तेन प्रोक्तम् – ऋग्वेद भगवोऽध्येमि यजुर्वेदं सामवेदमथाथर्वाणमङ्गिरसमितिहासपुरामं पञ्चमं वेदानां वेदम्। (छा. उ. ३।७।१।२)

**भारतीय विदुषां मतम्**

पश्चात् भगवान् व्यासः तस्याख्यानोपख्यानादिभिः विस्तारं विधाय सूतादीनध्याययामास। ततस्तैः प्रवचनद्वारा एषां पुराणानां प्रचारप्रसारौ कृतौ। अतः प्राचीनपरम्पराया भारतीया विद्वांसो मन्यते। यद् द्वापरान्ते पराशरमुनिद्वारा सत्यवत्या गर्भाद् भगवतो विष्णोरंशत उत्पन्नेन महर्षिणा कृष्णद्वैपायनेन व्यासेन कलेः मनुष्यानल्पायुषोऽल्पबुद्धींश्च ज्ञात्वा देवलोके वर्तमानस् शतकोटिप्रविस्तरस्य पुराणस्य

सारं संगृह्य चतुर्लक्षश्लोकैरष्टादशानां पुराणानां प्रणयनं कृतम्। अतोऽष्टादशानां पुरामानां निर्माता स्वयं महर्षि र्व्यास एवास्ति। अत एव पौरामिकानां डिण्डिमघोषोऽति – अष्टादशपुराणानां कर्ता सत्यवतीसूतः।

विष्णुपुराणानुसारं तु महर्षिर्वेदव्यासः प्रथममाख्यनोपाख्यानगाथाकल्पशुद्ध्यादिभिः सहैकस्याः पुराणसंहिताया रचनां कृत्वा तां स्वं शिष्यं लोमहर्षणनामानं सूतमध्यापयामास। तेन च कश्यपवंशीयान् त्रीन् अकृत – व्रण – सावर्णि – शंशपायननामकान् स्वकीयान् सुयोग्यान् शिष्यान् अपाठत्। तदनन्तरं तैस्त्रिभिरपि व्याससङ्कलितमूलसंहिताया आधारेणपरा अपि तिस्रः पुराणसंहिता निर्मिताः। अग्रे ताश्चतस्रः पुराणसंहिता आधारीकृत्य तेषां शिष्य-प्रशिष्य-तच्छिष्यपरम्परयाऽष्टादश महापुराणानि उपपुराणानि च प्रणीतानि। एतेनेदं प्रतीयते यद् भगवान् वेदव्यासः पूर्वं पुराणसंहितां क्रमबद्धां कृतवान्। ततस्तस्य शिष्यादिभिरष्टादशपुराणोपपुराणानां प्रणयनं कृतम्।

वस्तुतो यथा समस्ता वेदमन्त्रा मूलावस्थायामविभक्ता आसन् तथैव पुराणान्यपि संहितारूपेण सम्मिलितान्यासन्। वेदस्य चतुर्धा वर्गीकरणवत् पुराणस्याप्यष्टादशरूपेण वर्गीकरणमजायत। वेदवर्गयिता भगवान् व्यास एव पुराणानामपि विभाजकोऽभवत्।

विभिन्नानां पुराणानां पर्यालोचनया प्रतीयते यत् कल्पान्ते देवलोके प्रतिष्ठितं शतकोटिप्रविस्तरं च पुराणमेकमेवासीद् यद् स्मृत्वा ब्रह्मदेवेन मुनिभ्यस्तदुपदिष्टम्। तदनन्तरं द्वापरे भगवतो विष्णोरंशेन समुत्पन्नेन महर्षिणा भगवता व्यासेन एतावतो विशालसाहित्यस्य ग्रहणमल्पमेधसां मनुष्याणां शक्तेर्वहिर्भूतं मत्वा लोककल्याणाय

तद्विपुलकायं पुराणसाहित्यं चतुर्लक्षैः श्लोकैरष्टादशसु भागेषु विभक्तम्। एवं प्रचलितानां पुराणानां विभाजनं सत्यवतीनन्दनेन भगवता व्यासेनैव कृतम्। इत्थमेकमूलपुराणसंहितातोऽष्टादशपुराणानां विभाजनस्य प्रवचनस्य च सङ्केतोदेवीभागवतमाहात्म्यादावप्युपलभ्यते। तथाहि मुनीन् प्रति सूतः।

एवं प्राचीनपरम्परापोषका विद्वांसः पुराणानां निर्माणकालं कलिद्वापरयोः सन्धिकालं मन्यन्ते। तेषां मान्यतानुसारं महर्षिर्व्यासो हि सरस्वतीनद्याः तीरस्थे स्वाश्रमे समुपविष्टो ध्याननिमग्नः सन् समग्रं पुराणसाहित्यं प्रणीतवान्, परन्तु ऐतिहासिकपद्धत्या विचारकर्त्तार आधुनिका समालोचका मतमिदं न मन्यते। तेषां मते स्वयं पुराणैरिदमित्थं रूपेणात्मनोनिर्माणविषये न किमपि प्रोक्तमस्ति। अतस्तन्मतेऽवान्तरशताब्दीषु पुराणानां प्रणयनं संस्कारः प्रतिसंस्कारश्च निरन्तरं जाजायते एव। पुराणेषु समये समये यत्र तत्र न केवलं स्फुटश्लोका एव संयोगिताः प्रत्युत कियन्तः अध्याया अपि संयोजिताः सन्ति। एवं पुराणानां मूलरूपस्य समयस्य च निर्धारणं नितान्तमसम्भवंतु नास्ति प्रत्युत दुःसाध्यमवश्यमस्ति।

केवलं तारतम्येन परीक्षाद्वारा एकपुराणापेक्षया द्वितीयं पुराणमर्वाचीनं प्राचीनं वा साधयितुं शक्यते। यथा विष्णुपुराणं श्रीमद्भागवतापेक्षयाति प्राचीनं प्रतीयते, यतस्तत्रानेकेंशः मार्कण्डेय-हरिवंशयोः – समानाः सन्ति तथा प्राकृत-वैकृतप्रलयश्लोका नवमसर्गश्लोका अपि तुल्या एव वर्तन्ते। एतद्विपरीतं श्रीमद्भागवतस्य कोऽप्यंशः कस्मिंश्चिदपि पुराणे आवृतं नास्ति। अतो विष्णुपुराणापेक्षया श्रीमद्भागवतमर्वाचीनं विद्यते विष्णुपुराणञ्च श्रीमद्भागवतात् प्राचीनं सिद्ध्यति।

श्रीमद्भागवतं हि वैष्णवसम्प्रदाये भागवतसम्प्रदायस्य महामान्यो ग्रन्थोऽस्ति, किन्तु विष्णुपुराणं कस्यापि सम्प्रदायस्य ग्रन्थोनास्ति। इदं हि सामान्यतया विष्णुमाहात्म्यप्रतिपादकं महापुराणमस्ति। अतो मध्ययुगीनस्य समस्तस्य वैष्णवसम्प्रदायेन माध्यससम्दायेन वा आत्मनो मतस्य पुष्ट्यर्थमिदं पुराणं मान्यमभिमतं तथैव गौडीयसम्प्रदायस्य वैष्णवैरपि इदमात्मनो दार्शनिकटतत्त्वानामाधारोऽभिमतोऽस्ति। एवं वायुपुराण-ब्रह्मण्डपुराणयोरपि आवृताध्यायानामधिकता वर्तते। अत इमे उभे अपि पुराणे प्राचीने स्वीकृतुं शक्यते।

**पाश्चात्यविपश्चितां मतम्**

पुराणेषु निर्दिष्टचरित्राणां तुलनात्मकेनाध्ययनेनापि तेषां कालनिर्णये पर्याप्तं साहाप्यमवाप्यते। यस्मिन् पुराणे यस्य चरित्रस्य यावदल्पं वर्णनमस्ति तच्चरितं तत्पुराणं तावदेव प्राचीनं साधयति। प्राचीनेषु पुराणेषु भगवत श्रीकृष्णस्य चरित्राणां कियत्य एव घटना उल्लिखिताः सन्ति। किन्तु अर्वाचीनेषु पुराणेषु तच्चरित्रस्य नवा नवा घटना योजयित्वा विस्तारः कृतोऽस्ति। यथा विष्णुपुराणस्य पञ्चमेंऽशे श्रीकृष्णचरित्रं केवलं १-३८ अध्यायेषु अङ्कितमस्ति, परन्तु हरिवंशे नवानां घटनामुल्लेखं विधाय तत्र महती वृद्धिः कृताऽस्ति। श्रीमद्भागवते तु श्रीकृष्णचरित्रस्यापरमपि पल्लवनं जातमस्ति, येन विष्णुपुराणस्य तद्घटनात्मकं स्थलं निरसं श्रीमद्भागवते रसप्रधानं यत् विलक्षणां माधुरीमास्वादयति। अनयोः पुराणयोः सूक्ष्मरूपेण सूचितमपि राधाचरित्रं ब्रह्मवैवर्तपुराणे श्रीकृष्णचरित्रापेक्षयाऽधिकं विस्तृतं महत्त्वपूर्णाञ्च जातमस्ति। एवं श्रीकृष्णचरित्रस्य विकासक्रममालक्ष्य पं. श्रीबलदेवोपाध्यायेन एषां चतुर्णां पुराणानां कालनिर्णय इत्थंकारं

कृतोऽस्ति। सर्वप्राचीनं विष्णुपुराणं ततो हरिवंशः तदनु श्रीमद्भागवतं तदनन्तरं ब्रह्मवैवर्तपुराणं निर्मितमस्ति।

पुराणानामन्तरङ्गीक्षयाऽपि तेषां कालनिर्णये सहयोगोऽवाप्यते। यथाऽग्निपुराणस्य ३३८, ३४६, ३४७ अध्यायेषु काव्यविवेचनं दण्डिनः काव्यादर्शे एव आश्रितत्वादयमंशो विद्वद्भिर्दण्डिन उत्तरकालस्य कृतिः स्वीकृताऽस्ति। गरुडपुराणस्य ९३-१०६ अध्यायेषु यद्धि धर्मशास्त्रीयविषयामां विवरणमुपस्थापितं वर्तते, तद् याज्ञवल्क्यस्मृतेराधारेणाधृतत्वादयं भागो द्वितीय- तृतीय – शताब्योर्याज्ञवल्क्यस्मृतिनिर्माणानन्तरं मिश्रितः प्रतीयते।

पुराणेषु प्रायः पाणिनिव्याकरणनियमानाधिकं पालनं दृश्यते। अतः सिध्यति यदिमानि पाणिनिव्याकरणनिर्माणानन्तरं निर्मितानि सन्ति। महर्षे पाणिनेः समयः चतुर्थी शताब्दी स्वीकृयते। विभिन्नेषु पुराणेषु राजवंशावलीयोऽति स्पष्टं प्रतीयते तद् गुप्तकालपर्यन्तं तेषु आवश्यकतानुसारं किञ्चित् किञ्चित् समावेशो भवन्नासीत्। तत्र नियन्त्रणाभावाद् येन यो विषयोऽभिलषितंस्तेन स विषयः पुराणेषु स्थापितः। श्रीस्वामिशङ्कराचार्य-रामानुजाचार्य-मध्वाचार्य-वल्लभाचार्य-निम्बार्काचार्यप्रभृतीनां सिद्धान्तस्य समावेशस्तु प्रायः पुराणेषु असंशयंनिम्बार्काचार्यप्रभृतीनां सिद्धान्तास्य समावेशस्तु प्रायः पुराणेषु असंशयं जातोऽस्ति। परमनया दृष्टया अग्निपुराण-मत्स्यपुराणादीनि कियन्ति पुराणानि न दूषितानि सन्ति।

बिहरङ्गपरीक्षणस्याधारेणापि पुराणानां कालनिर्णयः कर्तुं शक्यः। महाभारतस्य वनपर्वणि वायुप्रोक्तपुराणस्योल्लेखो विद्यते। तथा तद् आतीतानागतविषयाणां प्रतिपादकं

कथ्यते। वर्तमाने वायुपुराणे अतीतकालस्य घटनाया वर्णनेन सह भविष्यकालीनानां राज्ञामपि वृत्तं वर्णितमस्ति। तथा महाकविना वाणभट्टेन स्वकादम्वर्या पुराणेषु वायुप्रलपितम् इति सङ्केतः कृतोऽस्ति। हर्षचरिते च वायुपुराणस्वरुपस्य तथा प्रचलिततत्प्रवचन-स्योल्लेखोऽस्ति एवं सप्तमशताब्द्यां लिखितहर्षचरिताद् द्वितीयशताब्द्याः रचितमहाभारताच्च पूर्वमेव वायुपुराणस्य समयः द्वितीयशताब्द्याः पूर्वार्द्धमिति न्यायसंगतं प्रतिभाति।

विभिन्नानां विषयाणां पुष्ट्ये धर्मशास्त्रीयनिवन्धेषु प्रमाणरूपेणोद्धृतानां पुराणानां यानि वचनानि उपलभ्यते। तेभ्योऽपि पुराणानां समयनिरूपमं कर्तुं शक्यते। यथा जयचन्दसभापण्डितस्य द्वादशशताब्द्यां वर्तमानस्य विदुषो लक्ष्मीधरभट्टस्य कृत्यकल्पतरुः सर्वप्राचीनो निबन्धग्रन्थो मन्यते। तत्रोद्धृतानां पुराणानां ततः पूर्वकालीनत्वं स्वत एवानुमातुं शक्यम्। वल्लालसेनेन स्वनिन्धे दानसागरे पुराणानां प्रमाणिकी समीक्षा कृताऽस्ति, यया तेषां स्वरूपस्य परिमाणस्य रचनाकालस्य च परिचयः पाठकैः प्राप्तुं शक्यते।

पुराणेषु कलियुगीयानां विभिन्नानां राज्ञां वृत्तवर्णनमपि पुराणानां कालनिर्णये विशेषरूपेण सहायकं भवति। विष्णुपुराणे मौर्यवंशस्य प्रामाणिकं विवरणं प्रदत्तमस्ति, मत्स्यपुराणे आन्ध्रवंशीयानां राज्ञां सत्यमितवृत्तमुल्लिखितमस्ति तथा वायुपुराणे रुप्तवंशीयानां राज्ञां प्रारम्भिकस्य साम्राजस्य वास्तविकमितवृत्तमुपस्थापितं वर्तते। अतः एषां पुराणानां रचनाकालः गुप्तवंशामन्तरं भवितुमर्हति।

प्रसिद्धेन पाश्चात्यसमालोचकेन पार्जिटरमहोदयेन विषयस्यास्य तुलनात्मकमध्ययनं विधाय भविष्यपुराणेऽङ्कितं कलियुगीयनृपतीनां वृत्तं मूलं प्राचीनतमं च स्वीकृमस्ति। अस्यैव विस्तारः मत्स्य-वायु-ब्रह्माण्ड-पुराणानां भविष्यवर्णने जातोऽस्ति। विष्णुपुराणे श्रीमद्भागवते चोपलब्धं संक्षिप्तमिदं विवरणं भविष्यपुराणस्याधारेणैव प्रस्तुतमस्ति। भविष्यपुराणस्य कलियुगीयराज्ञामैतिहासिकस्येतवृत्तस्य सङ्कलनमान्ध्रनरेशयज्ञशीसमये द्वितीयस्याः शताब्द्या अन्ते जातमस्ति। कालान्तरे यदा विवरणमिदमन्येषु पुराणेषु संगृहीतं तदा तत् स्वकालपर्यन्तं समानेषु प्रयासो जातः। यदा यदा भविष्यपुराणीयान्ध्रवंशस्येतवृत्तं मत्स्यपुराणे संगृहीतं तदा आन्ध्रवंशस्यान्ते (२६० ई.) संयोजित। पुनः वायुपुरा-ब्रह्माण्डपुराणयोः ग्रहणावसरे तदेव विवरणं गुप्तसाम्राज्यस्यारम्भिकोदयः (३३५ ई. ) पर्यन्तं समायोजितम्। अग्रेविष्णुपुराणे श्रीमद्भागवते चापि तस्यैव संक्षिप्तं रूपं संगृहीतम्।

इदमितिहासप्रसिद्धमस्ति यद् भारतवर्षे आन्ध्र-शक-यवन-म्लेच्छाभीरादीनां शासनं कुषाणराज्यस्यान्ते द्वितीयशताब्द्यनन्तरमेव जातम्। मत्स्यपुराणे आन्ध्रनरेशानां विश्वसनीयमितवृत्तमुपलभ्यते। आन्ध्रवंशस्य समाप्तिः (२३६ ई.) शताब्द्यां जाता। अतो मत्स्यपुराणस्य समय इतोऽग्रे न गन्तुं शक्नोति। वायु-ब्रह्माण्डपुराणोः विस्तृतरूपेण तथा विष्णु-श्रीमद्भागवतपुराणयोः संक्षिप्तरूपेण च गुप्तनरेशानां चर्चयास्पष्टं प्रतीयते यदिमानि पुराणानि समुद्रगुप्तदिग्विजयात् (३३० ई.) पूर्ववर्तिनां गुप्तनरेशानां संकेतं कुर्वन्ति। यदीमानि पुराणानि समुद्रगुप्तादपि परिचितानि स्युस्यर्हि प्रयाग-साकेत-मगध पर्यन्तमेव गुप्तराज्यस्य सीमानं न बोधयेयुः। एवमितिहासलिदां विश्चितां मतमस्ति यद्

भविष्यपुराणस्य निर्माणकाल द्वितीयशताब्द्या अन्ते मन्तव्यः तथा मत्स्यपुराणस्य रचना तृतीयशताब्द्या आरम्भकाल (२३६ ई.) पर्यन्तं जाताऽस्ति। वायुपुराणं ब्रह्मपुराणं च गुप्तराज्यस्यारम्भे लिखिते स्तः। विष्णुपुराणस्य कलिवृत्तप्रकरणमपि अस्यैव युगस्य कृतिरस्ति। श्रीमद्भागवतं च गुप्तकालीनमस्ति, यत् षष्ठशताब्दीपर्यन्तं पूर्णं जातम्।

एवं फलतो वायुपुराण-ब्रह्माण्डपुराण-मत्स्य-मार्कण्डेयपुराण-विष्णुपुराणानि च १-४०० ईशवीया कृतिरस्ति। श्रीमद्भागवत-कूर्मपुराण-स्कन्दपुराण-पद्मपुराणानां रचनाकालः ५००-९०० ई. प्रर्यन्तमस्ति। तथा ब्रह्मापुराण-ब्रह्मवैवर्तलिङ्गप्रभृतीनां पुराणानां निर्माणकालः ९००-१०० ई. पर्यन्तं मन्तुं शक्यते। एवं पं. बलदेवोपाध्यायेन पुराणानां तिस्रः श्रेण्योऽभिमताः (१) प्राचीनं पुराणम्, (२) मध्यकालीनं पुराणम् तथा (३) अर्वाचीनं पुराणम्। प्राचीनेषु, पुराणेषु ते वायु-ब्रह्माण्ड-मार्कण्डेय-मत्स्य-विष्णुपुराणानि मन्यन्ते। मध्यकालीन पुराणेषु ते श्रीमद्भागवत-कूर्म-स्कन्द-पद्मपुराणानि स्वीकुर्वन्ति। तथा अर्वाचीनेषु पुराणेषु अवशिष्टानि सर्वाणि पुराणानि अङ्गीकुर्वन्ति। एषु सर्वेषु इमे वायुपुराणम्, विष्णुपुराणञ्च सर्वप्राचीने पुराणे मन्यन्ते। एवं ब्रह्मपुराण-वायु-पुराण-मत्स्यपुराण-विष्णुपुराणानां तुलनात्मकाध्ययनाधारेणैतानि चत्वारि पुराणानि महाभारतकालीनानि सन्तीतिस्वीकारे न काप्यस्ति विप्रतिपत्तिः।

यदि तर्कनिकषाया बुद्धिवादस्य च साहाय्येन पुराणानां रचनानुसारं कालनिर्णयाय वयं प्रवर्तामहे तर्हि एतत्स्वीकारायास्माभिर्बाध्यैर्भाव्यं स्यात् यत् ततत्पुराणानां निर्माणं भिन्न-भिन्नसमये तात्कालीनवातावरणछायायामेव जातमस्ति।

आधुनिकाः समालोचका इतिहासकाराश्च पुराणानां रचनासमयः ईशाप्रथमशताब्दीतिस्वीकारेऽपि सङ्कोचं कुर्वन्ति। कियतां पुराणानां तु सर्वथाऽर्वाचीनत्वमङ्गीकुर्वन्ति। निर्णयोऽयं साधारणतया ता घटनाः पठित्वा तैः क्रियते, वैदिककालतो यवनकाल-मराठाकाल-अंग्रेजीराज्यतः सम्बद्धाः सन्ति। तथात्र परस्परं पुराणेषु भिन्न-भिन्नवंशानुक्रमोऽपि सहायको भवति। वस्तुतः पुराणेषु कथानकानां परस्परमसामञ्जस्य वैषम्यस्य च कारणमिदं प्रतीयते यद् महर्षिणा व्यासेन इतस्ततो विकीर्णं कथानकं संगृह्य मूलपुराणसंहितारूपं प्रदाय स्वं शिष्यं रोमहर्षमं सूतमध्यापयामास तथा ततो वैशंपायनादिभिरधीत्य स्वसौविध्यानुसारं विभाजनं कृत्वा तेषां कथानकानां स्वबुध्या प्रचारः प्रसारश्च विहितः। एवं तत्तच्छिष्यपरम्परया पुराणानां कथानकानि अनियन्त्रितानि अमर्यादितानि च जातानि।

आधुनिका आलोचका इदमपि मन्यन्ते यद् द्वितीयशताब्दीतो दशमशताब्दीपर्यन्तं पुराणानां सङ्कलनं सम्बर्द्धनं संशोधनञ्चाजायत। अत एवैषां विषयनिरूपणे उत्तरोत्तरं विकासः परिमार्जनं च जातम्। के. एम्. पणिक्करस्य लेखानुसारं महाभारतं पुराणानि च गुप्तकालस्य सन्ति कृतयः। प्राचीनतमपरम्पराणां प्रचिनिधित्वकाराणि श्रीमद्भागवत-स्कन्द-शिव-मत्स्य-वायु-ब्रह्माण्डानि पुराणानि राष्ट्रियोद्देशपूर्तये गुप्तकाले पुनः लिखितानि। पुराणानां समयो निश्चयपूर्वकं वक्तुं न शक्यः। पुराणेषु कतिपयानि स्थलानि अतिप्राचीनानि सन्ति, कियन्ति चात्यन्तं नवानि विद्यन्ते। पुराणेषु दत्तायां राजवंशावल्यां हर्षवर्द्धनप्रभृतीनां प्रसिद्धानां च राज्ञामुल्लेखो नास्ति। एम. ए. मेहेण्डले महोदयेन लिखितं यत् पुराणानां बीजं वैदिके साहित्येऽन्वेष्टुं शक्यते, परन्तु तेषां वास्तविकी स्थितिः

सूत्रग्रन्थेषूपलम्यते गौतमधर्ममूत्रे स्त्रोतसोरूपेम विधिविधानानं निरूपणं प्राप्यते, किन्तु आपस्तम्बे भविष्यपुराणस्यापि निर्देशोऽस्ति। महाभारते संकलितानां येषां पौराणिकविषयाणां निर्देशः प्राप्यते तेनापि ईशवीयवर्षात् पूर्वं पुराणानां स्थितिः सिध्यति।

इतिहासकाराणां मतेन यदा सामाजिकप्रतिष्ठायै लोकविश्रुतये च जैन-बौद्धधार्मिकाभ्यां ब्राह्मणधर्मस्य विरोधे साहित्यनिर्माणं कर्तुं समारब्धं तदा ब्राह्मणधर्मो विरोधिदर्मप्रतिस्पर्धया तीब्रतरया समालोचनया च सङ्कीर्णतां विहाय समाजस्य सम्मुखे परिष्कृतरूपेणोपस्थाय ६०० –२०० ई. पू. पर्यन्तं ताभ्यां सह निरन्तरं प्रतिद्वन्दिरूपेण संघर्षं कुर्वान् तावात्मसात् कृतवान्। परिणामस्वरूपेण सर्वसुलभस्य भक्तिप्रधानस्य पौराणिकधर्मस्योदयोऽभ्युदयश्चाजायत। अस्मिन्नेव बौद्धिकविकासविचारस्वातन्त्र्ययो-र्महत्त्वपूर्णे युगे जैन-बौद्ध-हिन्दु-दर्शनानां निर्माणं जातम्। जातकावदातगाथानां च प्रणयनमभवत्। अयमेवासीद् रामायण-महाभारतयोरन्तिमसंस्कारस्य युगः। नन्दराजचन्द्रगुप्तमौर्ययोः (३२१-२१६ ई. पू.) कारणेन जैनधर्मस्य महान् विकासो जातस्तथा तत्साहित्यमपि लिखितम्। सम्म्राजोऽशोकस्य (२९२–२३० ई. पू. ) प्रटुरमाश्रयं प्रश्रयं च प्राप्य बौद्धधर्मस्य तथा तत्साहित्यस्य चापूर्वा प्रगतिर्बभूव। अनेकेषां लोकप्रियाणां धर्मग्रन्थानां विचारप्रधानानां दर्शनगर्न्थानां संस्कृतसाहित्यस्य काव्य-नाटक-चम्पूप्रभृतीनां च प्रणयनस्य सूत्रपातोऽप्यस्मिन्नेव युगे जातः।

इशपूर्वं षष्ठशताब्द्यां ब्राह्मणधर्मस्य कर्मकाण्डप्रवृत्तिविरोधे जौनबौद्धाभ्यां पृथक् पृथक् धार्मिकपरम्पराया प्रतिष्टा कृता। परं तन्मूले वैदविरोधपूर्विका नास्तिकताऽऽसीदतस्तयो निराकारणभावना समाजे नाधिकं दिनं स्थिता।

जनसाधारणस्य समाकर्षणाय तयो दुर्रूहा धारणा-ध्यान-समाधि-गृहत्यागोपासना-दुःखवादा लोकप्रिया न सिद्धाः। अतः समाजे ग्राह्मणधर्मस्य सुगमपद्धतौ सहसा परावृत्तः। भागवतधर्मशैवधर्माभ्यां निरीश्वरवादिनो जैना बौद्धाश्च सर्वथा निस्तेजसो विहिताः। दं सर्वं पौराणिकधर्मस्य प्रतिष्ठायाः फलस्वरूपेण जातम्। स्थितिरियं प्रायो द्वितीयशतीं यावदक्षुण्णाऽऽसीत्। एवं ६०० ईशापूर्वतो द्वितीयशताब्दीपर्यन्तं जैन-बौद्धधर्मयो ब्राह्मणधर्मेण सह निरन्तरं संघर्षः प्रचलन्नासीत्, किन्तु ब्राह्मणधर्म एतन्मध्ये आत्मनः परिष्कारं कृत्वैकं नवीनं रूपं धृतवान्, येन तत्समक्षे तत्प्रतिद्वन्दिनौ जैन-बौद्धधर्मयो ब्राह्मणधर्मेण सह निरन्तरं संघर्षः प्रचलन्नासीत्, किन्तु ब्राह्मणधर्म एतन्मध्ये आत्मनः परिष्कारः कृत्वैकं नवीनं रूपं धृतवान्, येन तत्सम्क्षे तत्प्रतिद्वन्दिनौ जैन-वौद्धधर्मौ पराभूतौ अभूताम्। आत्मनः प्रतिद्वन्दिनौ पराभूय ब्राह्मणधर्मो द्वितीयशतीतो निरन्तरमग्रेसरनुत्कर्षं प्राप। अयं तस्योत्कर्षो द्वादशतीपर्यन्तमक्षुम्म आसीत्। एष एवासीत् पुराणानां निर्माणस्यान्तिमसंस्करणस्य च समयः।

भारतीये साहित्ये पौराणिकयुगस्याविर्भाव एकस्या अबिनवाया दिश- सूचको जातः। भारतीयसंस्कृतौ समुपस्थितसामाजिकपरिवर्तनप्रक्रिया न केवलं तत्कालीनस्य सामाजिकस्य धरातलस्य परिवर्तने एव सीमिता, अपि तु आध्यात्मिकसीवनस्य मान्यतास्वपि परिवर्तनमजायत। प्रगतिशीलेनानेन पौराणिकसमाजेन न केवलं वेदोक्ता दैवता स्थापना स्वावश्यकतानुरूपं परिवर्तिता, प्रत्युत आचार-विचार-धर्म-अनुष्ठान-व्रत – पूजोपासनादीनां कर्मक्षेत्रेऽपि अभिनवताया मान्यता प्रदत्ता।

ऐतिहासिकदृष्ट्या पौराणिकयुगे भारतीयेषु संस्कारेषु महत् परिवर्तनं जातम्। पुराणेषु धर्म-कर्म-साधना-रीति-व्यवहारादिदृष्ट्या वेदापेक्षया परिवर्तिताः परिस्थितयो दृष्टिगोचरी बभूवुः।

गुप्तकालीने भारते हिन्दुधर्मः सर्वेषु क्षेत्रेषु समुन्नतावस्थायामासीत्, हिन्दुधर्मप्रतिपादकाः स्मृतिग्रन्था अप्यस्मिन्नेव युगे निर्मितास्तथा भारतीयसंस्कृते विशालवटवृक्षस्वरूपाणि पुराणान्यपि प्रतिसंस्कृतानि। बहुभिः स्मृतिमर्मज्ञैर्धर्माचार्यै-र्महत्त्वपूर्णैः स्मृतिग्रन्थैः सर्वविधसमृद्धस्य गुप्तसाम्राज्यस्य समुज्वलं यशश्चिरस्थायि कृतम्। एवं धार्मिकसाहित्यस्थ निर्माणेऽर्जने वर्द्धने च पुरामानां प्रमुखं स्थानमासीत्।

वस्तुतः पुराणानां रचना नैकस्मिन् समये जाता, न वा तानि कस्या अप्येकस्या व्यक्तेः सन्ति कृतयः। वेदकालतो द्वादशशतीं यावत् सततं तेषां रचना संस्करणं सङ्कलनं सम्पादनञ्चाजायतेति वाचस्पतिगैरोलाप्रभृतीनामस्ति मतम्। राखालदासवनर्जीमहोदयानुसारं गुप्तशासनस्यानुकूलपरिस्थितौ पुराणानां संस्करणं जातम्। पी. के. आचार्यस्य धारणाऽस्ति यत् स्कन्दपुराणस्य नामकरणं गुप्तसम्राजः स्कन्दगुप्तस्य नाम्नाऽजायत। वा. गैरोलामहोदयोऽनुमिमीते यद् वायु-विष्मु-भविष्य-भागवतपुराणेषु गुप्तवंशस्य पर्याप्त उल्लेखो विद्यते। अतः स्पष्टीभवति यदेतेषां चतुर्णां पुराणानां संस्करणं गुप्तयुगे एवाभवत् डा. काशीप्रसाद जायसवालमतेन पुष्यमित्रस्य समयः (४९९ ई. पू.) एव पुराणानां रचनासमाप्तियुग आसीत्। तत्र यत् संशोधनं परिष्करणादिकं जातं पञ्चमशतीतोऽग्रेऽगच्छत्।

लोकमान्यतिलकस्य मतमस्ति यत् पुराणानां समयो द्वितीयशतकानन्तरं कदापि न सम्भवति। पुराणसाहित्यस्य भारतीयपरम्परायाश्च सन्तुलिताध्ययनाधारेण

पर्जिटरमहोदयस्य कथनमस्ति यत् पुराणानि मूलरूपेणेशाप्रथमशतीतोऽनन्तरस्य रचना भवितुमर्हन्ति। पुराणेष्वग्निपुराणं सर्वतः प्राचीनमस्ति अग्निपुराणस्य समयः इतिहासकारैश्चतुर्थशताब्दी ततो वा पूर्वं प्रोक्तोऽस्ति।

अग्निपुराणस्य रचनायाः सम्बन्धे विदुषां मतैक्यं नास्ति। सुशील कुमारदे महोदयमतेनाग्निपुराणस्यालङ्कारप्रकरमं दण्डी-भामहानन्तरमानन्दवर्द्धनाचार्यात् पूर्वमीशानवमशताब्दीसमीपं संगृहीतं प्रतीयते काणेमहोदयेनाग्निपुरामस्य सप्तमशतीकी तथा तत्काव्यविषयकस्यांशस्य नवमशताव्दी रचनाकालः स्वीक्रियते, एनयोरुभयोर्मतं खण्डयता कन्हैयाडालपोद्द। रेणाग्निपुराणस्य काव्यप्रकरणं दण्डी-भामहानन्दवर्द्धनादिभ्य आचार्येभ्यो विलक्षणं विलोक्य काव्यस्य विकासक्रमाधारेण नाट्यशास्त्रानन्तरस्य भामहादिभ्यः पूर्वस्य वा मध्यकालीनं रुपमस्तीति निर्णीतम्।

डा. आर. सी. हाजरामहोदयेन कालक्रमात् प्राचीनमतेषु महापुराणेषु मार्कण्डेय-ब्रह्माण्ड-विष्णु-मत्स्य-भागवत-कूर्मपुराणानां गणना कृताऽस्ति प्रथमं तेन पुरामद्वयस्य रचना विष्णुपुराणतः पूर्वमभिमता। शेषेषु विष्णु (४०० ई.) वायु (५०० ई.) भागवत (६०० ई.) कूर्मपुराणानि (७०० ई. ) शतीषु रचना मन्यते तेन हरिवंशस्य रचनाकालश्चतुर्थशती स्वीकृता तस्य मातानुसारमग्निपुराणस्य रचना यद्यपि ८०० शताब्द्यां जाता, किन्तु तस्य काचित् सामग्री इतः पूर्व काचिच्च पश्चात् संगृहीता। नारदीयपुराणस्य रचना दशमशताब्द्यां सञ्जायत। पश्चात्तस्य कलेवरवृद्धिः प्रक्षेपैर्जाता। एवं ब्रह्मपुराणस्य रचनाऽपि दशमशताब्द्यामबवत् काचित् सामग्री पश्चात् संयुक्ता स्कन्दपुराणस्य काचित् सामग्री अष्टमशताब्द्यामधिकांशाश्च पश्चात् संगृहीताः गरुडपुराणस्य रचना दशमशताब्द्यां जाता।

एवं पद्मपुराणस्य रचना १२००-१५०० मध्ये जाता ब्रह्मवैवर्तस्य रचना यद्यपि सप्तमशताब्द्यां जाताऽस्ति तथापि तस्य वर्तमानं रूपं षोडशशताब्द्या वर्तते।

ब्रह्मवैवर्तपुराणस्य रचनाविषये पत्रपत्रिकास्वपि विवादः प्रचलितः। तत्र केषाञ्चिन्मते–

ब्रह्मवैवर्तं षोडशशताब्द्या रचनाऽस्ति, यतो हि तत्र गीतगोविन्दकारस्य पीयूषवर्षिणो जयदेवस्य प्रभावो लक्ष्यते। एवं षोडशशताब्द्याः सामाजिकारनेस्तथा तात्कालिकदुर्नीतिपराणवातावरणस्य च तत्र मुद्राऽस्ति। तत्कालीनसामाजिकचरित्रहीनताया दिग्दर्शनमपि ब्रह्मवैवर्ते निहितमस्ति। स्मिन्नेव प्रसङ्गे भागवतस्यान्तिमं संस्करणं दशमशताब्द्यामभिमतम्। एतस्य मतस्य विपक्षे वदद्भिर्वहुभि-र्ब्रह्मवैवतस्य रचना कालिदासादपि पूर्वं स्वीकृताऽस्ति।

**पुराणनिर्मामस्य पूर्वोत्तरसोमानौ**

(क) श्रीस्वामिवर्यशङ्कराचार्य-कुमारिलभट्टाभ्यां स्व-स्वग्रन्थेषु पुराणानां प्रचुरा चर्चा कृताऽस्ति। गद्यकाव्यकारेण महाकविना वाणभट्टेन स्वकीये हर्षचरिते स्पष्टीकृतं यत्तेन स्वजन्मस्थाने वायुपुराणस्य पारायणं श्रुतमासीत्। कादम्बर्यामपि तेन वायुपुराणस्योल्लेखः कृतोऽस्ति पुराणेषु वायुप्रलपितमिति।

(ख) विष्णुपुराणे मौर्यसाम्राज्यस्य, मत्स्यपुराणे दाक्षिमात्यानामान्ध्रनृपाणाम्, तथा वायुपुराणे गुप्तवंशस्याविकल उल्लेखोऽवाप्यते, तेन तेषां पुराणानां तत्सामयिकमस्तित्वमनुमीयते।

(ग) महाभारते पुराणानां कतिपयान्युपाख्यानानि यथा तथान्युपलभ्यन्ते। नौमिषारण्ये द्वादशवार्षिके सत्रे शौनकेन मुनिना निजजनकाल्लोमहर्षणात् प्राप्तं पौराणिकं ज्ञानं श्रावयितुं सौतिरुग्रश्रवाः प्रार्थितः। पद्मपुराणीयमृष्यश्रृङ्गस्य वृत्तमपि महाभारते प्राप्यते।

(घ) कौटिल्येनार्थशास्त्रे सुकुमारमतीनां कुमाराणां कृते पुराणज्ञानस्यावश्यकता प्रदर्शिता पुराणविदे राज्याश्रयदानाय च प्रोक्तमस्ति। अर्थशास्त्रस्य चन्द्रगुप्तकालिकत्वात् ततः पूर्वं पुराणानामस्तित्त्वं सिध्यति।

(ङ) सूत्रग्रन्थेषु पुराणानामुद्धरणान्युपलभ्यन्ते। उपनिषत्सु पुराणेतिहासयोरुल्लेखो विद्यते। अथर्ववेदे चतुर्भिर्वेदैः सह पुरामस्योत्पत्तिर्निर्दिष्टाऽस्ति। अतः पुराणानां तत्पूर्ववर्तित्वस्यानुमानं नूनं भवति।

(च)

इत्थं द्वादशशतीतो मौर्यवंश – (२७४-१८५० ई. पू.) आन्ध्रवंश – (२१२–३८ ई. पू.) गुप्तवंश – (२७५ – ५१० ई.) महाभारत – (५०० ई. पू.) अर्थशास्त्र – (३२०० ई. पू.) कल्पसूत्र – (७०० ई. पू.) उपनिषद् (१००० ई. पू.) आरण्यकब्राह्मण-वैदिकसंहिता (२५००) पर्यन्तं पुराणानां प्राचीनार्वाचीनया चर्चया तेषांपूर्वसीमावैदिकयुगः उत्तरसीमा च गुप्तसाम्राज्यपर्यन्तं निर्द्धारयितुं शक्यते।

**पुराणानां भाषा शैली च**

पुराणानां भाषा महती सुबोधा तथा शैली चात्यन्तं हृदयग्राहिणी वर्तते। कश्चिदपि ग्रन्थकारः स्वप्रतिपाद्यस्य विषयस्य यथार्थं निरूपणं कयाचिद् भाषया शैल्या वा करोति, यतो हि लेखकानां वास्तविकभावनाभिव्यक्तिसाधनं भाषा शैली एवास्ति। अतो यो लेखकः यस्या भाषाशैल्याः स्वाभीष्टं विषयं व्यक्तीकरणे समर्थो भवति, स तस्या एव भाषाशैल्या स्वकीये ग्रन्थे अवलम्बनं करोति। अतः एव दर्शनशास्त्रस्य समेषां सूत्र-भाष्य-वार्तिक-व्याख्याकाराणामाचार्याणां दार्शनिक विषयानुकूलैव भाषाशैली भवति। तथा सरसविषयाणां विन्यासार्थं कविभिर्भाषाशैली माधुर्यमण्डितकोमलकान्तदावल्या अनुकूला प्रयुञ्जते।

एवमर्थप्रधानानां पुराणानां भाषाशैल्या एकं विशिष्टं स्थानमस्ति। यथा कश्चित् सुहृत् स्वमित्र-कल्याणकामनया प्रेरितो भूत्वा तं कथोपदेशद्वारा स्वं वक्तव्यं हृदयङ्गमं कारयति तथैव पुराणमपि समस्तानां मानवानां हितभावनया स्वोपदेशप्रदस्य कथानकस्य माध्यमेन स्वं मन्तव्यमर्थं बोधयत्येव।

प्रथमं ब्रह्माण्डमुत्पाद्य परमेश्वरी वेदज्ञानमेव तस्मै उपदिशति। ततो भगवतो वेदज्ञानमुपलभ्य ब्रह्मा यान्यन्यानि शास्त्राणि स्मरति। तत्र सर्वप्रथमं पुराणान्येव स्मरति। तथाचोक्तं मत्स्यपुराणे –

पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम्।
अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः।। ५३।३

अतो वेदवत्पुराणान्यपि नित्यानि सनातनानि अपौरुषेयाणि च सिध्यन्ति। एतएव भगवत्पूज्यपादैः श्रीशङ्कराचार्यमहोदयैः वृहदारण्यकभाष्ये स्पष्टमुक्तम् – निःश्वसितमिव

निःश्वसितं यथा अप्रयत्नेनैव पुरुषनिःश्वासो भवति एवं पुराणम्। महर्षिणा वात्स्यायनेन च स्वकीये न्यायदर्शनभाष्ये – य एव मन्त्रब्राह्मणस्य द्रष्टारः प्रवक्तारश्च ते खल्वितिहासपुराणस्य धर्मशास्त्रस्य चेति विषयव्यवस्थापनाच्च प्रमाणम्। यज्ञो मन्त्रब्राह्मणस्य, लोकवृत्तमितिहासपुराणस्य, लोकव्यवहारव्यवस्थापनं धर्मशास्त्रस्य च विषयः। अलौतितयोगवलेन समस्तं विश्वं हस्तामलकवत्पश्यद्भिः पूज्यापदैः श्रीपतञ्जलिमुनिभिरपि स्वकीये पाणिनीयव्याकरणमहाभाष्ये पशपशाह्निके वाकोवाक्यमितिहासः पुराणम् इति वदद्भिः पुराणानां प्रामाण्यं स्पष्टमेव स्वीकृतमस्ति।

**अत्यावश्यकं पुराणं परिशीलनम्**

वेदेषु येषामाध्यात्मिकाधिदैवविकाधिभौतिकाबौद्धिकव्यावहारिकनैतिकसांस्कृतिक-देवमानुषजडचेतनाक्मकनां विषयाणां सूक्ष्मरूपेण विधानं विद्यते, ब्राह्मणभागे, आरण्यके, स्मृतिग्रन्थेषु च येषां प्रतिपादनमस्ति, तेषां सर्वाप्रकाराणां पुराणेषु आकर्षकबुद्धिगम्यमनोग्राह्योपदेशप्रदकथानकरूपेण वर्णनं कृतमस्ति। पुराणेषु न केवलमाचारव्यवहारादैनिकक्रियामात्रस्योल्लेखोऽस्ति, किन्तु मानवजीवनोपयोगिनीनां विविधानां भावनानां पूर्ण विवेचनं विद्यते। अतः पुराणानामध्ययनेन वेदार्थनिधीनामुपलब्धिर्भवितुमर्हति। पुराणाध्ययनं विना यथार्थज्ञानं मानवीयजिज्ञासायाः पूर्तिश्च न सम्भवति। पुराणेषु मानवोपयोगिनां समस्तज्ञान क्षेत्राणां समावेश उपलभ्यते तदुक्तं स्कन्दपुराणे –

वर्तमाने युगे धर्मरक्षायाः, वर्णाश्रमव्यवस्थाप्रचारस्य, भारतीयायाः संस्कृतेरुद्बोधस्य, भक्तेर्विकासस्य च यद्दर्शनं बोभवीति, तस्य श्रेयः पुराणानामेवास्ति।

पुराणैरेव भारतीयानां ज्ञानगरिम्णः, उत्कर्षस्य च वास्तविकं ज्ञानं भवति। प्राचीनकाले भारतीया आधिभौतिकाधिदैविकाध्यात्मिकीनामुन्नतीनां चरमं सीमानमुपगता आसन्, एतस्य संकेतः पुराणद्वारा एवानुभूयते। अतः एतन्निः संशयं वक्तुं शक्यते यत् पुराणानि बद्धानां मुमुक्षूणां च मनुष्याणां सन्मार्गप्रदर्शकानि गर्न्थरत्नानि सन्ति।

वेदे सूक्ष्मरूपेण यन्निर्दिष्टमस्ति तस्यैव विस्तृता व्याख्या व्यासदेवेन भाष्यरूपेण महाभारते पुराणेषु च कृताऽस्ति । अतः स्वयं तेनैव महाभारते संकेतः कृतोऽस्ति यत्, इतिहासपुराणाणाभ्यां वेदं समुपवृंहयेत्। अद्यत्वे यद्यपि वेदानां सर्वाः शाखा नोपलभ्यन्ते तथापि दिव्यज्ञान-सम्पन्नः त्रिकालदर्शी महर्षिर्वेदव्यासः तासां मूलविषयं पुराणेषु यत्र तत्राङ्कितवानस्तिः, येनाद्यापि बहूनां वेदशाखानामनुलब्धावपि तासां प्रतिपाद्यविषयाणामबगाहनं क्रियते एव। एवं वेद-वेदाङ्ग-दर्शन भूगोल-खगोल-वास्तुविद्या-शिल्पविद्या-रत्नपरीक्षादिविद्यानां विवरणात्मकप्रसङ्गोपस्थाने पुराणानां महन्महत्त्वं गौरवं च विद्यते। वेदे पुराणास्याप्युल्लेखो विद्यते, तथा पुराणं पञ्चमो वेदो मन्यते, यथा – एवं वा ह्यरे अस्य महतो भूतस्य निःश्वसितमृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणां विद्या उपनिषदः (वृ. उ. २।४१०), यथा वा – स होवाच ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमथर्वाणं चतुर्थमितिहाहं पुराणं पञ्चमं वेदानां वेदम् (छ. उ. ७।१।२)। अतः वेदानां प्रामाण्ये पुराणानामपि प्रामाण्यं स्वीकृतमेव भवति। यथा ब्रह्मणः सकाशात् तपसा पवित्रान्तःकरणानां महर्षीणां निर्मले हृदये वेदानामाविर्भावो जातः, तथैव ईश्वरामुग्रहेण तेषामेव महर्षीणां मनःसु पुरामानामपि प्रादुर्भावोऽजायत।

संस्कृतसाहित्ये पुराणानां स्थानं महदुन्नतमस्ति। यतो वेदानन्तरं सर्वमान्यानि सर्वप्राचीनानि च पुराणान्येव सन्ति। सृष्ट्यादौ यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै (श्वे. उ. – ६।१८) इत्यनुसारं अयं सर्वानुभूतो विषयो विद्यते यद् येन यस्य पूर्तिर्भवति तत्रोभयोः समानता सम्भवति। यदि अपूर्णसुवर्णकङ्कणस्य पूर्तिः कर्तुमिष्यते तर्हि सुवर्णद्वारैव पूर्णता सम्बवति, न पित्तलेन सुवर्णस्य पूर्तिर्भवितुमर्हति। यतो हि सुवर्णपित्तलयोरस्ति भिन्नजातीयता। अतो वेदार्थस्योपवृंहणं वेदभिन्नेन वस्तुना नहि भवितुमर्हति, किन्तु वेदसमानधर्मणा पुराणेनैव सम्भवति। अतोऽनया व्युत्पत्तिलभ्ययुक्त्या पुराणानां नूनं वेदता सिध्यति।

स्कन्दपुराणस्य प्रभासखण्डेनापि ब्रह्मणो वक्त्राद्विर्निर्गतं पुराणं वेदसमकक्षं साधयता प्रोक्तं यत् सृष्ट्यादौ घोरं तपस्यतो ब्रह्मणो मुखेभ्यः प्रथममङ्गसहितानां वेदानां प्रादुर्भाव जातः, तदनन्तरमेव सर्वशास्त्रमस्य पुराणस्याविर्भावोऽभवत्, यन्नित्यं शब्दमयं पुण्यप्रदं शतकोटिप्रविस्तरञ्च विद्यते –

यदा तपश्चचारोग्रममराणां पितामहः।
आविर्भूतास्ततो वेदाः सषडङ्गपदक्रमाः।।
ततः पुराणमखिलं सर्वशास्त्रमयं ध्रुवम्।
नित्यं शब्दमयं पुण्यं शतकोटिप्रविस्तरम्।।
निर्गतं ब्रह्मणो वक्त्रात्.......................।

श्रीमद्भागवतेऽपि एतदेव प्रकारान्तरेणोल्लिखितमस्ति, यद् यथा ऋग्यजुः सामार्थवाणो ब्रह्मणश्चतुर्भ्यो मुखेभ्यः क्रमशः समुत्पन्नास्तथैव ब्रह्मणा पञ्चमं वेदस्वरूपमितिहासपुराणमपि स्वमुखेभ्य एवोत्पादितम् –

इतिहासपुराणानि पञ्चमं वेदमीश्वरः।

सर्वेब्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनः।।

न केवलं पुराणैरेव पुराणानां वेदरूपता साधिता, प्रत्युत उपनिषद्भिरपि वेदवत् पुराणेतिहासानामपि ब्रह्मणो निश्वासरूपता प्रोक्तास्ति एवं वा अरे अस्य महतो भूतत्य निःश्वसितमेतद् यद् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इति हासः पुराणं विद्या उपनिषदः। अतो विदुषां दृष्टौ वेदवत् पुराणमपि मान्यं प्रामाणिकं समाजणीयं व्यासरूपधारिणो भगवतो मुखेभ्य आविर्भूतं पुराणसाहित्यं विद्यते।

अशेषशास्त्रनिष्णातैः पूज्यपादैः स्वामिवर्य्यैः श्रीकरपात्रिमहाराजैरपि सुपुष्टैः प्रमामैः तर्कसङ्गतयुक्तिभिश्च वेदवदेव पुराणानां मान्यता संसाधितास्ति साप्ताहिकसिद्धान्तपत्रे।

भारतीयविद्वन्मान्यतानुसारं वेदे यत् सुस्पष्टं नोपलभ्यते तदपि पुराणप्रोक्तवाद् भवति ग्राह्यम्। यथा हि वेदे ग्रहसञ्चार-कालसउद्धितिथिक्षयवृद्धि पर्वग्रहादीनां निर्णयो नास्ति, परं पुराणेष्वेषां निर्मयात् सर्वमान्यता दृश्यते। वेदेषु यत् किमपि नोपलभ्यते तत् स्मृतिषूपलभ्यते। यच्चोभयत्रापि नोपलभ्यते तत् पुराणेषूपलभ्यते। अतः पुराणार्थे वेदार्थादप्यधिको ग्राह्यो भवति, यतो हि पुराणेषु वेदार्थ एव सम्यक् संगृहीतोऽस्ति –

न वेदे ग्रहसञ्चारो न शुद्धिः कालबोधिनी।

तिथिवृद्धिक्षयो वापि न पर्वग्रहनिर्णयः।।

इतिहासपुराणैस्तु कृतोऽयं निर्णयः पुरा।

यन्न दृष्टं हि वेदेषु तत् सर्वं लक्ष्यते स्मृतौ।।

उभयोर्यन्न दृष्टं हि तत् पुराणैः प्रगीयते।

वेदार्थादिधिकं मन्ये पुराणार्थं वरानने।

वेदाः प्रतिष्ठिताः सम्यक् पुराणे नात्र संशयः।।

शास्6षु श्रुतिः स्मृतिश्चेति द्वेनेत्रे प्रोक्ते स्तः तथा पुराणं हृदयं कथितमस्ति। तत्रैकेन चक्षुषा हीनो मनुष्यः काणः कथ्यते, द्वाभ्यां चक्षुर्भ्यां रहितोऽन्धः प्रच्यते, परं पुराणशून्यो जनो हृदयहीनो निगद्यते। हृदयहीनात् मनुष्यात् क्वचित् काणोऽन्धश्च वरौ अभिमतौ स्तः –

श्रुतिस्मृती उभे नेत्रे पुराणं हृदयं स्मृतम्।

एकेन हीनः काणः स्याद् द्वाब्यामन्धः प्रकीर्तितः।।

पुराणहीनात् हृच्छून्यात् काणावन्धौ क्वचिद् वरौ।

वेदस्य प्रधानं कार्यमस्ति यज्ञकर्मसम्पादनं तथा गृहस्थाश्रमिणामाचार-विचार-व्यवहारादीनां 5नस्य प्रकाशकमस्ति स्मृतिशास्6म्। इमे द्वे अपि पुराणेषु केन्द्रिते विद्येते। यथेदमाश्चर्यमयं जगद् भगवतो नारायणात् समुत्पन्नं तथैव समस्तं वाङ्मयं पुराणादेव प्रकाशितमस्ति। अत एव वेदार्थात् पुराणार्थो महानभिमतोऽस्ति। यतोहि वेदोऽपि पुराणसाहाय्येनैवात्मन उपवृंहणमभिवाञ्छति तथाऽल्पज्ञप्रहारान्नित्यं विभेति।

वस्तुतोऽस्माकं सविधे वेदपुराणमेवैकमेतादृशं साधनं वर्तते याभ्यामस्माभिः स्वकीयपूर्वजानामृषीणां महर्षीणां देवतानां च पर्याप्तं ज्ञानं कर्तुं शक्यते। पुराणेषप भारतीयसंस्कृतेर्वास्तविकस्वरूपज्ञानाय पुराणानामनुशीलनं नितान्तमुपकारि वर्तते।

अद्यत्वे पुराणानामैतिहासिकपद्धत्या विश्लेषणस्य प्रथा प्रचलिता विद्यते। अतः श्रद्धातर्कयोः समन्वयपूर्वकं पुराणानामनुशीलनस्यावश्यकता वर्तते। पौराणिकतथ्येषु आपततो यथार्थताया विद्यमानत्वात्तत्र सहानुभूतिपूर्वकमन्तरङ्गतया तदध्ययनमत्यावश्यकं प्रतीयते।

एकदा पुरामानां माहात्म्यवर्णनप्रसङ्गे तत्कथानकसत्यतायां संशयालुना स्वामिना विवेकानन्देन पृष्टः श्रीस्वामी रामकृष्णपरमहंसः प्रोक्तवान् यत् पुरामानां कथानकेषु सत्यताऽवश्यं विद्यते। तेषां वहिरङ्गरूपे ध्यानमदतत्त्वा तत्रान्तरङ्गरूपेण वर्णितानां तथ्यानां वेदानुकूलत्वमङ्गीकृत्य तत्सत्यतायां संशयालुना न भाव्यम्।

**पुराणानां वैशिष्ट्यम्**

भारतीयसाहित्यस्याध्ययनदृष्ट्या पुराणानां महत्त्वमतिप्राचीनकालत एव स्वीकृतमस्ति। यथा वैदिकधर्मस्य स्वरूपं ज्ञातुं वेदस्यास्ति अपेक्षा, तथा धर्मशास्त्रस्यावश्यकता विद्यते तथैव भारतस्यास्यातीतज्ञानाय अत्युपयोगिनां पुरामानामनुशीलनमनिवार्यं वर्तते। पुराणसाहित्यं हि भारतस्यास्ति अमूल्यो निधिः, यस्यानुशीलनं संरक्षणं च कस्यापि सुशोक्षितस्य भारतीयस्य कृतेऽनिवार्यं कार्यमस्ति।

पुराणेषु सहणीयचरितानां राजर्षि-महर्षि देवर्षिणां पवित्रतमस्य जीवनचरितस्य विवरणं विद्यमानमस्ति तथा वेदानां विश्वजनीनविषयाणां विवेचनं कृतं विद्यते। व्यक्तिगतां

सामाजिकीं च जीवनधारामवगन्तुं पुराणसाहित्यमत्यधिकं सहायकमस्ति। हिन्दुसंस्कृतेः रूप-रेखा पुराणेष्वेव सुरक्षिता विद्यते। पौराणिक कथानकानां छायायाम आध्यात्मदर्शन-धर्म-नीति-कला कौशल भूगोल-खगोलादीनां विविध ज्ञानविज्ञानानामद्भुतं रहस्यं प्रच्छन्नं वर्तते। तथा सृष्टि-प्रलय-स्वर्ग-नरक-वर्ण-आश्रम-भक्ति-बन्ध-मोक्ष-आचार-विचार-उपदेश-मन्वन्त-भूवनकोश-लोकसंस्थान-ईश्वरतत्त्व-कलानुसारिजीव वैचित्र्यादयो विषया आलोचिताः सन्ति।

भारतीयपरम्परा दृढताऽस्य तथ्यस्य प्रतिपादनं कुरुते यत् पुराणेषु वैदिकवाङ्मयस्य सर्वसाधारण या सुगम-सरल-सुरुचिपूर्णसद्भाव-सरसशैल्या पल्लवनं जातमस्ति। वेदस्य गभीररहस्यं बोधगम्यप्राञ्जलभाषाया जनहृदयपर्यन्तं समुपस्थापयितुं पुरामानां प्रमुखमुद्देश्यमस्ति। अद्यत्वे भारते यत् किमपि धर्म प्रति अभिरुचिर्दृश्यते तत् पुराणानामेव व्यापकस्य प्रभावस्य परिमामोऽस्ति।

पुराणानां पवित्र प्राङ्गने एकत्र भक्तेर्विविधप्रकारा धारा प्रवहति, तर्हि अन्यत्र विज्ञानस्य स्त्रोतो निःसरति। वेदेषु यस्य सङ्केतमात्रं वर्तते तथा स्मृतिषु यस्य समर्थनमस्ति तस्यैव पुराणेषु आख्यानोपाख्यानकथानकद्वारा विस्तारो विद्यते वेदानुकूलत्वादेव पुराणेषु वर्णितानि तथ्यानि प्रमाणकोटौ मन्यन्ते। त एव पुरामानि वेदवत् प्रामाणिकानि स्वीक्रियन्ते तथा तानि सर्वदा सम्मगदृष्ट्या समाद्रियन्ते। पौराणिकानामाख्यानानां वास्तविकं रहस्यं ज्ञात्वा भारतीयसंस्कृतेः रक्षायां प्रचुरः सहयोगो वा भवितुमर्हति। पुराणानामन्तिमं लक्ष्यं भक्त्या परमेश्वरे विश्वासपुरःसरं निष्कामकर्मणः सम्पादनं विधाय मोक्षप्राप्तिरस्ति। अत्र नास्ति कश्चन सन्देहो यद् भक्त्या सह ज्ञान-कर्मणोः समरसतानं सम्पाद्य मानवजीवनं

सफलीकर्तुं श्रेयः पुराणानामेव। एवं भारतीयसंस्कृतेः सम्वर्द्धने धर्मस्य विकाशे च पुराणानां कार्यं महत् महत्त्वपूर्णं वर्तते।

अतएव स्कन्दपुराणस्य रेवाखण्डे श्रुतिस्मृतिपुराणानि लोचनानि स्वीकृतानि। यः पुमान् एभिः त्रिभिः कार्यकलापं विधत्ते, तदनुसारमाचरति व्यवहरति च स हि भगवतः शिवस्यांशः स्वीक्रियते –

श्रुति-स्मृति-पुरामानि विदुषां लोचनत्रयम्।

यस्त्रिभिर्नयनैः पश्येत् सोंऽशो माहेश्वरो मतः।।

भारतीयार्थिक-धार्मिक-सामाजिक सांस्कृतिक-दार्शनिक-राजनीतिक विषयेषु गभीरज्ञानाय पुराणसाहित्यस्य विश्लेषणं नितान्तमावश्यकम्। समस्ताया वसुधाया उपकरिण्या भारतीयसंस्कृतेः वैज्ञानिकपद्धत्या समीक्षात्मकशोधकार्यार्थं पुराणसाहित्यमतीवोपयोगि साहित्यमास्ते। सर्वतोमुखसमालोचनात्मके शोधकार्ये पुराणसाहित्यात् पर्याप्तं साहाय्यमवाप्तुं शक्यते।

भारतीयप्राचीनवाङ्मये पुराणानामेकं विशिष्टं स्थानमस्ति। यत्र वेदानां पठनं पाठनं श्रवणं च उच्चवर्णव्यक्तीनां कृते सीमितमस्ति, तत्र पुरामानामध्ययनं श्रवणं च निम्नकोटिकानामपि जनानां कृते विहितं विद्यते। अतो लोकशिक्षया माध्यमेन पुरामानामुपयोगिता सर्वप्रसिद्धाऽस्ति। भारतीयजनतासु धार्मिकविधानाय, सामाजिकोपकाराय, आध्यात्मिकज्ञानाय च पुराणेभ्यः पर्याप्ता प्रेरणा प्राप्यते। अतो भारतस्यैतिहासिक-सांस्कृति-सामाजिक-राजनीतिक-परम्परां परिज्ञातुं पुराणसाहित्यं विशिष्टं स्थानं विभर्ति। पुराणवर्णितप्राचीनभारचीयराजवंशानुक्रम-वंशानुचरितसाहाय्येन

प्राचीनभारतीयेतिहासनिर्माणे पुराणानां प्रमुखं स्थानमस्ति। पुराणनिर्दिष्टं भुवनकोशमन्तरा प्राचीनभारतीयभूगोलज्ञानं न सम्भवति। अतो हि पुराणसाहित्यं निर्विवादतया वहुविधानां विद्यानामगाधं स्त्रोत्रोऽस्ति तथा वेदार्थनिधेः सम्यग्ज्ञानाय उत्कृष्टं साधनं विद्यते। पुराणवाङ्मयं स्वरचनाकालत एव धार्मिकीं सामाजिकीं शिक्षां प्रददत् स्वकीयैरुपदेशामृतै-र्जनसमाजमाप्लावयत् महान्तमुपकारं करोति, अकरोत् करिष्यति चेति निश्चयप्रचम्।

तथा च विशाले पुराणसाहित्ये अष्टादश पुरामानां रामायण-महाभारतयोश्च समावेशात् केवलमष्टादशपुराणानां श्लोकसंख्या चतुर्लक्षम्, महाभारतस्य लक्षम्, रामायणस्य च पञ्चविंशतिसहस्त्रम्। एवं सर्वसङ्कलनेन सपादपञ्चलक्षश्लोकसंख्यासङ्ग्रहात्मकं साहित्यं पुराणनाम्नाऽभिधीयते। तदुक्तं मत्स्यपुराणे –

एवं सपादाः पञ्चैते लक्षा मर्त्ये प्रकीर्तिताः।

पुरातनस्य कल्पस्य पुराणानि विदुर्वुधाः।।(५३।७१)

वस्तुतः पुराणानामनुशीलने न तर्कविरहितायाः श्रद्धायाः आवश्यकत्वात्तत्र श्रद्धाविहीनस्य तर्कस्य स्थानं नास्ति। यतो हि श्रद्धामन्तरा पुराणानां परिशीलनं भारतवर्षनिवासिनां धार्मिकप्रवृत्तिविश्वासशालिनां पुंसां नोपयोगि भवितुमर्हति। पुराणनामुपयोगः तदैव पर्याप्तो भवितुमर्हति यदा पुराणानां सहानुभूतिपूर्वकं सविश्वासं श्रद्धया अनुशीलनं भवेत्।

पुराणानि विश्वकल्याणकारिण्या भारतीयसंस्कृतेर्मूवस्त्रोतसां वेदानां भाष्यभूतानि सन्तीति भारतीयसंस्कृतेः परिशीलनार्थं पुराणानां पारायणं परमावश्यकम् विद्यते। पुराणानामतिविपुलकलेवरतया तेषां पारायणं सर्वसुकरं नास्तीति निभाल्य सुहृद्भिः

समुत्साहितेन मया अत्यावश्यकान् कियतः पुराणस्थान् विषयान् अत्यल्पकलेवरेऽस्मिन् ग्रन्थेऽतिसरलया संस्कृतभाषया समुपस्शापयितुं प्रयास विहितः। येनाल्पेनायासेनाल्पीयस्येव समयेऽल्पज्ञानवत्तामपि पुंसां पुराणस्थविषयाणां परिचयः स्यात्, पुराणपीयूषपानप्रसक्तमानसानां मनीषिणां मार्गश्च प्रशस्तो भवेत्। यदि मामकीनेनानेनाब्ध्यप्रयासेन पुराणतत्त्वजिज्ञासूनां विदुषां कियानपि लाभोऽभविष्यत्तदाहमात्मानं धन्यतमममंस्यम्।

येषां दिगन्तविख्यातकीर्तीनां सुकृतिनां कृतिभिरयं ग्रन्थोऽलङ्कृतः, ये चोदारहृदया माननीया महन्तो विद्वांसः समये समये स्वां स्वामनुपमां सम्मतिं प्रदाय ग्रन्थास्यास्य गौरवं सम्बर्ध्य परां प्रतिष्ठां प्रापितवन्त एनं पुराणप्रभापरिलेनामकं ग्रन्थम्। तेभ्यो महानुभावेभ्योऽनेकशो धन्यवादान् वित्तरन्नहं साम्वसदाशिवस्य पादपद्मयोः तेषां दिर्घायुष्ट्वाय निकामं कामये।

प्रतीकवाद रहस्यवादादिभिरनुप्राणितं पुराणसाहित्यं भारतीयसामाजिकजीवनस्यास्ति दर्पणम्। सरल-सुबोध-प्रबुद्धशैलीद्वारा अतिप्राचीनं सदपि पुराणसाहित्यं नित्यनवीनतायाः स्फूर्तेरुत्पादने महदुपकारि साहित्यं विद्यते। स्वकीयैः विशुद्धैः सदुपदेशैः समाजं शुद्धं विधाय सत्यं शिवं सुन्दरमादर्शमुपस्थापयति पुराणसाहित्यमिति निश्चप्रचम्। भारतीयसमाजे श्रुतिस्मृतिवत् पुराणानामप्युपादेयता विद्यते। अत एव वेदानां मर्म विज्ञातुं पुराणानामनुशीलनेऽस्माकं पूर्वजैः महद्बलं प्रदत्तं विद्यते। यावत् पुराणानामध्ययनं न क्रियते तावत् भारतीयमध्ययनं न्यूनतापूर्णमेवावतिष्ठते। स्मृतिशास्त्राणामुद्घोषोऽस्ति यत्

पुराणसाहित्यमादिकालतश्चतुर्दशानां विद्यानां धर्मस्य च प्रधानमुद्गमस्त्रोतोऽस्ति। अतोऽत्र योगिना याज्ञवल्क्येन पुराणशब्दः प्रथममेवोपात्तोऽस्ति।

वस्तुतः पुराणेषु धर्म-दर्शन-भक्ति-कलेतिहास-भूगोल-राजनीति-समाज-व्यवस्थासाहित्यादिविभिन्नविषयिकाः सामग्र्यः सङ्कलिताः सन्ति। येषां विवेचनं भारतीयेतिहासस्य निर्माणेऽत्यन्तमुपादेयमस्ति। स्कन्दपुराणस्य रेवाखण्डे तु वेदविद्या पुराणं धर्मशास्त्रञ्चेति त्रयं सर्वशास्त्रविनिर्णये प्रमुखं स्वीकृतमस्ति पुराणञ्च पञ्चमो वेदः स्वीकृतिऽस्ति। अपि च – एकदा ब्रह्मविद्यामध्येतु स्वसमीपे समुपस्थितं देवर्षिं नारदमुद्दिश्य भगवान्सनत्कुमारः पूर्वाधीतविद्याविषये यदा जिज्ञासितवान् तदा तेन तदुत्तरे स्वाधीतविद्यासु पञ्चमवेदरूपस्य पुराणस्यापि चर्चा कृतान्ति अतः पुराणानि भारतीयजीवनस्याधारं सांस्कृतिकस्येतिहासस्य च श्रृङ्खलां मत्वा तदध्ययनं नितान्तमावश्यकम्।

..............

## पुराणानामपूर्वत्वम्

पुरामावाङ्मयं भारतीयजीवनसाहित्यस्यास्ति अमूल्यं रत्नं तथाऽतीतं वर्तमानेन सह संयोजयितुं स्वर्णमयी श्रृङ्खला। विश्वसाहित्यस्याक्षयभाण्डारेऽष्टादश महापुरामानि अनुपमानि सर्वश्रेष्ठानि च रत्नानि सन्ति। इमानि चास्माकं सामाजिक-सासंस्कृतिक-राजनीतिक-धार्मिक-दार्शनिक-जीवनं स्वच्छदर्पणवत् प्रतिबिम्बितं कुर्वन्ति, सहैव सरलभाषया क्रमबद्धकथानकशैल्या च प्राचीनानि सन्त्यपि नवीनतमां स्फूर्तिं सञ्चारयन्ति।

भारतीयवाङ्मये पुराणसाहित्यस्य कृते एकं विशिष्टं महत्त्वपूर्णाञ्च स्थानं विद्यते। धार्मिकपरम्परायां वेदानन्तरं पुराणानेमव मान्यता वर्तते। पौराणिकज्ञानस्याभावे वैदिकसाहित्यार्थाववोधः सर्वथाऽसम्भवो विद्यते। यथा – इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्, समूढमस्य पांसुरे (ऋग्वेदे –१।५।२२।१७) इत्यस्य मन्त्रस्यार्थो न सायणादिभाष्यैरपि सम्यक् स्पष्टीभवति, यद् विष्णुना कदा कथं केन प्रकारेण वा विश्वमिदं त्रिभिः पदैः मापितम्? किन्तु पुराणेषु यदा वलिवामनकथया मन्त्रार्थस्यास्य विवरणं सम्यगुपलभ्यते तदा सन्देहस्य कश्चनावसरो न तिष्ठति। यथा वा नमो नीलग्रीवाय (यजुर्वेदे १६।२८) इति मन्त्रस्यार्थो महीधरेण स्वभाष्ये कृतोऽस्ति यद् विषभक्षणान्नीलं जातं कण्ठं यस्य तस्मै शिवाय नमः, परन्तु अनेन भाष्यार्थेन न स्पष्टं जायते यच्छङ्करेण कदा कथं केन प्रकारेण विषभक्षणं कृतम्? किन्तु पुराणेषु समुद्रमन्थनप्रसङ्गे अस्य समाधानं संपूर्णरूपेण जायते। अतः पौराणिकसाहाय्यं विना वेदानां गूढार्थस्य समाधानं न सम्भवति। सूत्ररूपस्य वेदस्य भाष्यभूतं पुराणमर्थपरकं भूत्वा तदुपयोगित्वं नितरां वर्द्धयति।

## पुराणानां वैदिकविचारधाराया अनुगामित्वम्

भारतीयसंस्कृतेर्विकासक्रमेऽनादिकालान्निर्बाधगत्या प्रवहन्त्या वैदिकविचारधाराया व्यापकः प्रभावः परिलक्ष्यते। संस्कृतवाङ्मये वेदानां वैबवं बहुभिः प्रकारैर्वर्मितं वर्तते। समेषां प्राणिनां कर्तव्यविषये वेदाः सृष्टेरादिकालत एव मार्गदर्शकाः सन्ति। वेदाः कालत्रयेऽपि आदर्शमयजीवनयापनाय शुभां प्रेरणां प्रददाति। वैज्ञानिकदृष्ट्या

वैदिकविचारधारा हि ऐतिहासिकस्यान्वेषणस्यास्ति विषयः। उत्तरकालीनविभिन्नधाराभिर्भारतीयसंस्कृतेः समये समये महानुपकारो जाजायते। भारतीयसंस्कृतौ वैदिकविचारधाराया भव्यभावना तथा मानवीयजीवनस्य कर्तव्यविषये तद्व्यपकदृष्टिश्चास्ति अनुपमा। मानवीयादर्शजीवननिर्वाहदृष्ट्या लौकिकाभ्युदयसफलतादृष्ट्या च वैदिकविचारधाराया व्यापिका दृष्टिर्न केवलं भारतीयानामेव कृते गौरवस्यास्ति विषयः, प्रत्युत सार्वभौममानवसमाजस्य कृतेऽपि संदेशवाहिका विद्यते। मानवजीवनस्य विभिन्नाभिर्दृष्टिभिर्मार्गप्रदर्शनस्य गौरवं वैदिकविचारधाराया एवास्ति। अतएव विभिन्नप्रतिकूलपरिस्थितावपि सा अक्षुण्णा सती प्रबहन्ती भारतीयसंस्कृतिर्विकासक्रमे नैजं प्रभावमुपस्थापयति। धार्मिकाध्यात्मिकचिन्तनाधारे स्थिताया वैदिकविचारधाराया व्यापिका दृष्टिः विश्वशान्तेर्विश्वबन्धुत्वस्य चोदात्ताभिभावनाभिरोतप्रोताऽस्ति। अतो वैदिकमन्त्रेषु मानवमात्रस्य परस्परं सौहार्दभावनायाः सङ्केतः स्वाभाविक एव विद्यते।

राष्ट्रस्य सर्वविधसमुन्नतये इदमत्यन्तमावश्यकमस्ति यत्तस्य समेषामङ्गानां विकासो भवेत् तथा समस्ताया जनतायाः सुखसमृद्धिभावना जागृता स्यात्। एत एव वेदपुराणयोर्बौद्धिकनैतिकविकासेन सहैव शारीरिकस्वास्थ्याय दीर्घायुष्वाय च पदे पदे प्रार्थनं विद्यते।

एवं वैदिकविचारधारायाः सर्वतो महत्त्वपूर्णा विशेषता तस्या व्यापकदृष्टौ वर्तते। सर्वासु परिस्थितिषु मनुष्यः सफलतापूर्वकं स्वकीयजीवनस्य सर्वाङ्गीणं विकासं कुर्यादित्येवं तस्या वर्तते प्रधानं लक्ष्यम्। एत आस्तिक जगति प्राक् वेदानां तदनन्तरं स्मृतीनां तदनु च पुराणानामनुशीलनमनुभूयते, सर्वेषामेषां सर्वकार्येषु प्रामाण्यं च मन्यते।

अतोवैदिकविचारधारायाः प्रचारः प्रसारश्च पुराणैरनिवार्यतया क्रियते, सर्वैः शास्त्रैरप्यनुगम्यते च।

विश्वसंस्कृतौ वेदानां सर्वप्राचीनतमत्वं विद्वद्भिरास्थीयते। सर्वविद्याऽऽकाराणां तेषां व्याख्यानाय सर्वाणि शास्त्राणि प्रवृत्तानि, ततोऽपि समग्रतो न प्राभवंस्तानि तान् व्याख्यातुम्। समर्थः पदविधिः (२,१,१) इति पाणिनीये सूत्रे महाभाष्यकारो भगवान् पतञ्जलिराह - बहवोऽपि हि शब्दा येषामर्था न विज्ञायन्ते। जर्भरी, तुर्फरी तु इति। बेकनाटादीनां शब्दानां निर्वचनप्रसङ्गे निरुक्तकारो यास्कोऽपि मौनमाकलयामास। इतिहासः, भूगोलम्, ज्योतिषम् (नक्षत्रविद्या,गणितविद्या) पदार्थविद्या, शिल्पशास्त्रम्, आयुर्वेदः, धनुर्वेदः, अर्थशास्त्रम्, व्याकरणम्, छन्दःशास्त्रम्, कल्पः, काव्यम्, तर्कविद्या, सांखयोगदर्शने, पूर्वोत्तरमीमांसे, निरुक्त-इत्यादीनां बहूनां शास्त्राणां ज्ञानमन्तरा वेदज्ञानमसम्भवि। यद्यपि तदर्थमेव षण्णां वेदाङ्गनां दर्शनानां चावतारः समजनि, तथापि तेषां पार्थक्यान्न सर्वेषां व्याख्याभूतानामर्थानामेकत्रोपलम्भः। इमानि खलु वेदव्याख्याने साहाय्यकमर्पयन्ति, न तु साक्षादेव वेदव्याख्यानानि, वेदव्याख्यानविश्लेषकाणि वा।

वेदार्थो विबुधानानामपि दुरूहोभवत्, का कथा खलु तत्र सामान्यजनमानसप्रवेशस्य। तदर्थं पुराणान्येव सर्वेषां शरणम्। अप्रवृत्तानामानुपलब्धानां चापि भूगोल-धनुर्वेद-गन्धर्ववेदादीनां प्रभूतानि तत्त्वानि पुराणेषु संरक्षितानि तिष्ठन्ति। सामान्यजनानामपि ज्ञानं यथा स्यात् तथा शैलीं समाश्रित्य पुराणान्याविर्भावितानि, विस्तारितानि च सर्वजनकल्याणकामनाधिया। इत्थं खलु पुराणानि वेदानां साधीयः प्राचीनव्याख्यारूपाणि सामप्रतमपि समासाद्यन्ते इति सर्वेषां परमं भागधेयम्। इतिहास-

पुराणाभ्यां वेदं समुपबृंहेत्। विभेत्यल्पश्रुताद् वेदो मामयं प्रहरेदिति। इति वचनेन वेदव्याख्यानाय पुराणानामध्ययनमनिवार्यं समाख्यातम्।

येषां शास्त्राणां मूलानि व्याख्यानानि विनष्टानि पूर्णतो वा नोपलब्धानि, तेषां पुनर्घटनार्थमपि पुराणानामध्ययनमनिवार्यं समाम्नायते। पुराणानि खलु भारतीयसंस्कृतेर्विश्वकोषरूपाणि विलसन्ति। सांख्यदर्शनं भारतीयदर्शनेषु प्राचीनतमं दर्शनम्, किन्तु नोपलल्यते तदीयं प्रभूतं वाङ्मयं साम्प्रतम्। सांख्यसूत्रं सांख्यकारिका चेति वाङ्मयं नालं समग्रसांख्यदर्शनपरिशीलनाय। योगदर्शनवाङ्मयेऽपि पातञ्जलयोगसूत्रात् प्राचीनतरं वाङ्मयं नासद्यते। नैतावन्मात्रं वेदेषु वर्णितानां सांख्य योगविधीनां ज्ञानाय पर्याप्तम्। महाभारते पुराणेषु च सांख्ययोगयोः पुष्कलानि तत्त्वानि सन्ति विकीर्णानि। येषामनुशीलनेन सांख्ययोगजिज्ञासूनां महानुपकारः सम्पत्स्यत इति विभाव्य तदनुसन्धानस्य कृते महताऽध्यवसायेन पुराणपारावारावगहनं नितान्तमावश्यकम्।

तनीयांसं पांषुं तव चरणपङ्केरूहभवं
विरञ्चिः संचिन्वन् विरचयति लोकानविकलम्।
वहत्येनं शौरिः कथमपि सहस्रेण शिरसा
हरः संक्षुभ्यौनं भजति भसितोद्धूलनविधिम्।।

अनेन पद्येनेदं व्यज्यते यद् आकाशात्मिकाया अव्यक्तशक्तेः अणुनां वृष्टिरजायत। ततः सृजनात्मकानामणुनां संचयं कृत्वा लोकविधाता ब्रह्मा अखिलं लोकं सृजति। पालनात्मकानणून् संगृह्य लोकपालको भगवान् विष्णुः समस्तं विश्वं पालयति। संहारत्मकैश्च अणुभिः भूतभावनो भगवान् सदाशिवः संहरति सकलं संसारम्।

संस्कृतवाङ्मयप्राणभूतेभ्यः पुराणेभ्यः एव अणुशक्तेः ज्ञानं प्राप्य अलौकिकज्ञानसंपन्नो भगवानक्षपादः कणादो मुनिः स्वकीये वैशेषिकदर्शने चेष्टाहीनानां परमाणूनां परस्परं सम्पर्केण द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायाभावनां सप्तानां पदार्थानामुत्पत्तिसिद्धान्तं स्थिरं कृत्वा लोकोत्तरं चमत्कारं प्रदर्शितवान्। परमाणुलक्षणञ्च –

जालान्तर्गते भानौ सूक्ष्मं यद् दृश्यते रजः।

तस्य षष्ठतमो भागः परमाणिरिहोच्यते।।

दार्शनिकानां नये परमाणवो नित्या अतिसूक्ष्माश्च सन्ति। सूक्ष्मत्वादेव परमाणवो नास्माकं स्थूलदृशां मानवानां-प्रत्यक्षगोचरीभवन्ति, किन्तु सर्वशक्तिमतः अघटितघटनापटीयसः परमेश्वरस्य अलौकिकशक्तिसम्पन्नानां योगिनां च परमाणुनामपि प्रत्यक्षं जायते। प्राणिनामदृष्टवशात् परमाणूनां परस्परं सम्पर्केण तत्तत्कार्यमुत्पद्यते। परमाणवो नित्याः, अनित्याश्च कार्यरूपाश्च। तत्र कारणरूपाः परमाणवो नित्याः, अनित्याश्च कार्यरूपाः। तथाच कारणरूपाणां परमाणूनामप्रत्यक्षत्वेऽपि कार्यरूपेण परिणतानां तेषां तु प्रत्यक्षं भवत्येव।

अत एव परमाण्वस्त्रे उपलभ्यमानाः कार्यरूपाः परमाणवो न पदार्थान्तरं भवितुमर्हन्ति, कारणभूतेषु परमाणुषु एव तेषामन्तर्भावस्वीकारान्न कोऽपि शङ्कापङ्ककङ्कलेशस्यावकाशः सम्भवति।

## पुराणोपयोगिता

अद्यत्वे भारतीयेतिवृत्तार्थं स्वतन्त्ररूपेण पुराणानां मान्ता समारब्धा। ऐतिहासिकसामग्रयन्वेषणार्थं यत्र तत्र पुराणानां विशेषरूपेणालोचनात्मकमध्ययनं प्रचलति। आधुनिका इतिहासकारा डा. विल्सन-रैप्सन-स्मिथ-पर्जिटर-कीथ-मैकडानल-कम्तानस्पीक-किर्फेल-जायसवाल-भण्डारकर-रायचौधुरी-प्रधान-दीक्षितार-आल्तेकर-रंगाचार्य-जयचन्द्र- डा. राजवलीपाण्डेय-डा. काणे- हरप्रसादशास्त्री – डा. आर. सी. हाजरा – डा. पुसालकर – प्रभृतयो विद्वांसः स्वकीयेषु ऐतिहासिकग्रन्थेषु समीक्षासु प्रबन्धेषु लेखेषु च पौराणिकसामग्रीणां प्रचुरमुपयोगं कृतवन्तः कुर्वन्ति च। दीक्षितारेण पुराण-इण्डेक्शनामक एको विशालकायो ग्रन्थः त्रिषु भागेषु लिखितो वर्ते, यः पुराणसम्बन्धिनोऽनेके ग्रन्थाः प्रणीताः सन्ति प्रणीयन्ते च। तल्लिखितं स्टडीज् इन् पुराणिकरेकार्ड्स् आफ् हिन्दु राइटस् एण्ड कस्टम्सनामकं पुस्तकं पौराणिकशोधकार्यायात्यन्तं महत्त्वपूर्णः परमोपयोगि च विद्यते। तस्य विस्तृतभूमिकासहितविष्णुपुराणस्यांग्रेजीसंस्कराणं महदुपादेयं वर्तते। तथा डा. देवेन्द्कुमारराजारामपाटिलद्वारा निबद्धः कल्चरल हिस्ट्री फ्राम दि वायुपुराणनामा ग्रन्थः पौराणिकगवेषणात्मककार्यायातिशयोपयोगी सिद्धिऽस्ति। भारतीयसंस्कृतेः सभ्यतायाश्च व्यापकेतिहासाय पौराणिकसाहित्यस्य महती उपयोगीता वर्तते। यतो हि पौराणिके वाङ्मये भूतत्त्व-भूगोल-खगोल-राजनीति शास्त्रीयविषयाणाञ्च साङ्गोपाङ्गविवरणमुपलभ्यते।

## पुराणानामैतिहासिकं मूल्यम्

पुराणानामैतिहासिकतासम्बम्धे वर्तमानगवेषकाणां धारणा समये समये परिवर्तते एव। डा. पुसालकरस्य मतं विद्यते यद् भारतीयेतिहास-संशोधनस्यारम्भिककाले पुराणानां किमपि ऐतिहासिकं मूल्यं नासीत्। यदा कैप्टेन स्पीकेन कुशद्वीपं(नुवियां) गत्वा नीलनद्या उद्भवमस्थानमन्विष्यं येन पुराणानां वर्णनस्य समर्थनं जातम्। तदा शनैः शनैः पुराणेषु विदुषामास्था दृढा जाता, किन्तु ताम्रपत्रमुद्रादिभिः इतिहासिकतथ्यान्वेषणस्य प्रवृत्या पौराणिकमूल्ये ह्रासो जातः। वौद्धग्रन्थेषु पौराणिकप्रतिपादनानां खण्डनं जातम्। एवं सन्देहवृद्ध्या पुराणेषु अविश्वास उत्पन्नः, किन्तु पाश्चात्यदेशीयेन विदुषा विल्सनेन पुराणानामध्ययनं कृत्वा विष्णुपुराणस्यांग्रेजी-अनुवादः प्रकाशितः, तत्र सारगर्भितां महतीं भूमिकां च लिखित्वा तत्र तुलनात्मिका टिप्पणी प्रदत्ता, येन संस्कृत साहित्यस्य विशालेऽङ्गे विदेशीयानां विदुषामध्ययनमारब्धम्। यतः पुराणानामनुचितोपक्षाया अन्तो जातः, पुराणानि स्वतः प्रमाणयोग्यानि चाभिमतानि। परिणामस्वरूपे शिक्षितसमाजे पौराणिकोपयोगितायाः प्रवृत्तिर्दृष्टिगोचरी जाता। तस्य श्रैयो विल्सनमहोदयस्यैवास्ति। तदनन्तरं पुराणानां विशेषाध्यानस्यारम्भः पार्जिटरेण कृतः। तस्य धैर्याध्यवसाययुक्तस्यानुसन्धानस्येदं फलमजायत यत् पुराणानामैतिहासिकसामग्रीणां पर्यालोचनात्मकं विवरणं विश्वस्य समक्षे समुपस्थितम्। पुराणेषु यदैतिहासिकं विवरणं विद्यते तस्य पक्षोऽनेन पुष्टो जातः। स्मिथेन प्रमाणितं यत् मत्स्यपुराणे आन्ध्राणां वर्णनं प्रायो यथार्थं विद्यते। इतिहासज्ञा अपि विद्वांसोऽद्यत्वे मन्यन्ते यदान्ध्राणां राज्ञां विषये मत्स्यपुराणास्य, मौर्याणां विषये विष्णुपुराणस्य गुप्तानां सम्बन्धे चवुपुराणस्य वर्णनं सर्वथा विश्वसनीयं वर्तते।

वैदिकवाङ्मये समुपलब्धं पुराणम् आधुनिकानि समुपलब्धानि, अष्टादशपुराणान्ययेव सन्ति, आहोस्वित् तदितरदिति संशये कैश्चित् पुराणशब्दस्यैकवचनान्तप्रयोग-दर्शनादनुमीयते यत् प्राचीनकाले साधारणरूपेण पुराणमेकमेवासीत्। पुसालकरेणापि अथर्ववेद पुराणं यजुषा सहेति – एकवचनान्तपुराणशब्दस्य प्रयोगात् पूर्वमेकमेव पुराणमासीदितिमतं सोपष्टम्भमुपस्थापितम्। जैक्सनप्रभृतिभिरपि एतदेव मतं समर्थितम्, किन्तु विवेचका विद्वांसः पुराणशब्दसैकवचनान्तं प्रयोगं जातिपरकं मत्वा तद्बहुत्वबोधकं मन्यन्ते। यथा ब्राह्मणो न हन्तव्य इत्यत्र ब्राह्मणशब्दो जातिवरकत्वात् समस्तानां ब्रह्मणानां ज्ञापकोऽस्ति तथैव पुराणशब्दस्यैकवचनान्तप्रयोगोऽपि अनेकपुराणानां वाचकोऽस्ति।

अत्र तु सन्देहो नास्ति यन्मूलपौराणिकोंऽशोऽतिप्राचीनोऽस्ति, किन्तु अद्यत्वे समुपलब्धानि पुराणानि रचनादृष्ट्या भाषाया आधारेण च तादृशानि प्राचीनानि न सन्ति। विषयदृष्ट्या पुराणानामधिकांशरूपमर्वाचीनमवश्यमस्ति, परन्तु पाश्चात्त्या विपश्चितो यावदर्वाचीनत्वं पुराणानां मन्यन्ते, न तावदाधुनिकानि तानि सन्ति। येन रूपेण वैदिकसाहित्ये पुराणानां चर्चास्ति तेषां समावेश आधुनिकेषु पुराणेषु जातोऽस्ति तथा कालक्रमान् नवोदितशास्त्राण्यपि तद्विशाले कोशागारे समाविष्टानि जातानि। डा. राजबली पाण्डेयस्यास्ति सम्भवना यद् यदा महाभारतकाले वैदिकसंहितासमानं पौराणिकसाहित्यस्य संगठनं प्रारब्धं तदैव वेदव्यासेन पुराणानि रचितानि। पुराणेषु स्वविस्तारस्यानन्ता शक्तिरस्ति। अतः प्रत्येकनवागतयुगेषु तत्राभिनवाः सामग्रथः प्रक्षिप्ताः जाताः। अनेन न केवलं पुराणेषु कथाभागेषु वृद्धिर्जाता, अपितु विषयदृष्ट्यापि तेषु

नूतनविषयाणां समावेशो जातः। देशे यावन्ति ज्ञानस्रोतांसि आसन् तानि समस्तानि यथासम्भवमात्मसात्कृत्वा पुराणैर्विशालं रूपं धृत्वाऽऽत्मनः कलेवरो बर्द्धितः।

कल्पादावीश्वरस्य निःश्वासरूपेणाविर्भूतो नादात्मकः काण्डत्रयो वेदरूपः शब्दराशिरनन्ते व्योममण्डले वीचितरङ्गतया व्याप्त आसीत्। यं केचन कृतधर्माणो महर्षयः साक्षात्कृतवन्तः। एवं येन ऋषिणा यो मन्त्रः साक्षात् कृतः स तस्य मन्त्रस्य द्रष्टा ऋषिः प्रोच्यते। अत एवोक्तं – ऋषयो मन्त्रद्रष्टारः। ततस्ते स्वस्वशिष्यानध्याप्य शाखाप्रशाखाभेदेन वेदं विस्तारयामासुः।

तथा च काण्डत्रयात्मको वेदः पूर्वमेक एवासीत्, यो ब्रह्मण आरभ्य व्यासपर्यन्तं गुरुशिष्टपरम्परया प्रचलित उपदिष्यश्च भवतिस्म। द्वापरान्ते महर्षिणा व्यासेन तस्यैकस्यैव वेदस्य स्तुतिप्रधानात् पद्यात्मकान् मन्त्रान् संगृह्य ऋग्वेदनाम्ना, यजनप्रधानान् गद्यात्मकान् मन्त्रान् संकलय्य यजुर्वेदनाम्ना गीतिप्रधानात् मन्त्रान् एकत्रीकृत्य सामवेदनाम्ना तथा आभिचारिकान् मन्त्रसमूहान् संगृह्य अथर्ववेदनाम्ना च क्रमशः चतुर्णां होतृ-अध्वर्यु-उद्गातृ-ब्रह्मनामकानामृत्विजां यज्ञेषूपयगाय चत्वारो विभागाः कृताः। वेदविभागकरणादेव भगवतः कृष्णद्वैपायनस्य नामान्तरं वेदव्यास इति प्रसिद्धम्।

येषु वेदमन्त्रेषु येषां केषाञ्चिदपि सम्बादरूपेण आख्यानोपाख्यानादिरूपेण च किञ्चिद्रहस्यं व्यक्तीकृतं वर्तते, तमितिहासं प्रचक्षते येषु च मन्त्रेषु सृष्टिप्रक्रियाया निर्देशोऽस्ति तत्पुराणं प्रोच्यते। एवं वेदस्य चतुर्भिर्भेदैः सह इतिहासपुराणोरपि सम्मेलने एकस्यैव वेदस्य पञ्च भेदा अजायन्त। अत एव पुराणं पञ्चमो वेदः कथ्यते – इतिहासपुराणं

पञ्चमं वेदानां वेदम् (छान्दोग्येपुनिषद् ७।२।१) एवं च वेदवर्णिताख्यायिकादियुतं सृष्टिप्रक्रिया प्रतिपादकं गुरुशिष्यपरम्परया प्रचलितं सन्दर्भमितिहासपुराणमुच्यते।

अतो महर्षिव्यासद्वारा सङ्कलितानामष्टादशानां पुराणानामुल्लेखः तत्पूर्ववर्तिषु ग्रन्थेषु कामं न मिलेत्, किन्तु पारिभाषिकपुराणशब्दस्य प्रयोगस्तेषु असङ्गतं नास्ति। एवं वेदविकासे पञ्च क्रमा उपलभ्यन्ते १. औँकारात्मको वेदः, २. गायत्र्यात्मको वेदः, ३. काण्डत्रयात्मको वेदः, ४. चतुर्वेदः, ५. इतिहासपुराणात्मको वा वेदश्च।

प्रधानतया ऋत्विजां सम्बन्धे होता ऋग्वेदी, अध्वर्युः, यजुर्वेदी, उद्गाता च सामवेदी भवेदिति निर्णयानन्तरं ब्रह्मा कस्य वेदस्य ज्ञाता स्यादिति प्रश्ने पूर्वोक्तानां त्रयाणां वेदानां ज्ञानातिरिक्तं ब्रह्मणश्चतुर्थस्याथर्ववेदस्य ज्ञानमत्यावश्यकभूक्तम्। अत एवैतरेयब्राह्मणे ब्रह्मत्वं केन क्रियते इत्यस्योत्तरे त्रय्या विद्यया (५।५।८) इत्युक्तं संगच्छते। अस्येदं तात्पर्यं यत् चतुर्वेदज्ञ एव ब्रह्मपदेऽधिस्थातुं शक्यः यतो हि स समस्तस्य यज्ञस्य नियन्त्रणं करोति। अतस्तस्य सर्ववेदज्ञानृत्वं नितरां सिध्यति। अपि च राक्षसादिकृतविघ्नादिनिवारकस्य ब्रह्मणो विधेयत्वात्तस्याथर्ववेदवैदुष्यमत्यावश्यम्। यज्ञीयकार्यनिर्वाहार्थमेव वेदे संहिताविभाजनं जातम्। एत एव बृहदारण्यके - अरेऽस्य महतो भूतस्य निःश्वसितमेतग् यद्ग्वेदः सामवेदोऽथर्वाङ्गिसः (२।४)।

**पुराणेषु पाठान्तरम्**

यद्यपि प्राचीनेषु ग्रन्थेषु अनेके पाठभेदा उपलभ्यन्ते, परं पुराणेषु सर्वतोऽधिका पाठभेदाः प्राप्यन्ते। एकैकस्य दस्यानेके पाठभेदा दृश्यन्ते। अस्य कारणपर्यवेक्षणेन प्रतीयते यत् पाठानामनेकताया मुख्यं कारणं देशः कालो व्यक्तयश्च भवन्ति। यस्य ग्रन्थस्य

यावान् व्यापकः प्रचारः प्राचीनत्वं च भवति तस्मिन् तावदेवाधिकं पाठान्तरं स्वाभाविकतया जायते। अन्यान्यधार्मिकग्रन्थवत् पुराणानां पाठान्तरे किञ्चिद्बन्धनं नास्ति। स्वरचिह्नोच्चारणकारणादिभिर्वेदेषु पाठान्तरस्य सम्भावना न विद्यते, यतो हि तेषामुच्चारणाय प्रयोगाय च शिक्षा ग्रन्थेषु नियमा निर्दिष्टाः सन्ति। अशुद्धोच्चारणेन घोरप्रत्यवायस्यानर्थकारिणामनिष्टानां सम्भावनाऽपि तत्र तत्र प्रदर्शिताऽस्ति।

स्वरवर्णवैपरीत्योच्चारणेन मन्त्रो न स्वमर्थं साधु व्यनक्ति, तदनुष्ठानेन न किमपि फलं जायते, प्रत्युत तस्य फलं विपरीतमपि जायते। मिथ्याप्रयुक्तो मन्त्रो वज्रो भूत्वा यजमानमेव विनाशयति। इन्द्रवधस्य कृते यजमानस्य वृत्रासुरस्य यज्ञे मन्त्रप्रयोक्तृ-ऋषिद्वारा स्वरस्य वैपरीत्योच्चारणे जाते स्वयमेव वृत्रासुरः पराजितो जात इन्द्रश्च विजयी बभूव।

प्राचीनकालत एव वेदेषु स्वरवर्णोच्चारणं प्रति पद-क्रम-धन-जटा-शिखा-मालादीनामेवभूता व्यवस्था कृताऽस्ति न तथा विश्वस्मिन् केषु धार्मिकेषु ग्रन्थेषु कृताऽस्ति। सुदूरदक्षिमप्रान्तवर्तिनां भट्टानां पूर्ववर्तिनां बङ्गीयभट्टाचार्याणां काश्मीरस्य कवीनां कायाश्च कर्मकाण्डिनां वैदिकमन्त्रोच्चारणे भौगोलिकविषयतायां सत्यामपि अद्भुता समानता उपलभ्यते। एवमन्यान्यधर्मावलम्बिनां ग्रन्थेषु अपि पर्याप्ता सावधानतया दृश्यते। व्याकरण-दर्शनादिष्वपि समये समये जायमानेषि भाष्य-वार्त्तिक-वृत्तिषु परिवर्तनस्य सम्भावाना नास्ति। आचार्यशिष्यप्रशिष्य-परम्परया अनन्तकालतौऽद्यपर्यन्तं तत्कण्ठस्थीकरणस्य प्राचीना पद्धतिर्न परित्यक्ता। तस्या एवास्ति परिणामो यदस्यां विपपीतपरिस्थितावपि प्रतिशास्त्रमेवंविदा अनेके दिग्गजा विद्वांस उपलभ्यन्ते येषां सम्पूर्णा विषया न कण्ठस्थाः, किन्तु स्पष्टा अवश्यं सन्ति। एवं विधायां जागरुकतायां तेषु तेषु

ग्रन्थेषु पाठान्तरस्य कल्पना कथंकारं स्थानं लभेत ? परं पुराणेषु श्रद्धालवोऽपि तत्तच्छास्त्राणां विशिष्टा विद्वांसः प्रायः पुराणेषु उदासीना एव तिष्ठन्ति, न तेषामुपयुक्तं सम्मानं ते कुर्वन्ति। धर्मशास्त्रस्य निबन्धग्रन्थेषु पुराणस्य पर्याप्तः समादरो विहितोऽस्ति, परं तत्रापि ब्राह्मे, पाद्मे, वैष्णवे, लैङ्गे, कैर्मे, मात्स्ये, वाराहे, वामने, गारुडे, ब्रह्माण्डे इत्याद्युक्त्वैव तेषामुद्धरणं दत्तमस्ति। तेषां स्पष्टं विवरणं न प्रदत्तमस्ति, यस्य परिमामोऽयं भवति यत् तत्तत्पुराणेषु तेषां वचनानामुपलब्धिदुर्लभा जाताऽस्ति।

पुराणानामुपदेशाधिकारं निम्नकोटिकेषु विद्वत्सु परित्यज्य उच्चकोटिका विद्वांसः शास्त्रार्थकलायामकृष्टा भूत्वा तत्सज्जीकरणे एव उद्यता जाताः। अग्रे यदा सम्प्रदायवादिन आचार्या जनसम्पर्के आत्मनः सिद्धान्तानुपस्थापयितुमावश्यकतामनुभूतवन्तः तदा तैः स्व-स्वमतपोषकाणां पुरामानां टीकां लिकित्वा लेखयित्वा वा स्वस्वसम्प्रदायपुष्ट्यर्थं तर्क-युक्ति-प्रमाणां प्रयोगः कृतस्तथा तत्तत्पुराणपाठं स्थिरं विधातुं पदकृत्यस्य पद्धतिः स्वीकृता। परिणामस्वरूपे कियन्ति साम्प्रदायिकपुरानाणि तु पाठान्तरैरवश्यं सुरक्षितानि, किन्तु तानि पुराणानि येषु सामान्यतया स्मार्तधर्मणां प्रतिपादनमस्ति तथानेकविधानामुपयोगिनां विषयाणां चर्चाऽस्ति, एवं येभ्यः समाजस्य वास्तविकं कल्याणं सम्भवति तानि पुराणानि न तेषां साम्प्रदायिकाचार्याणां कृपाभाजनानि जातानि। येषु पुराणेषु सहैव समेषां देवानां महिमा गीतोऽस्ति तैश्च कस्याप्येकस्य सम्प्रदायस्य पुष्टिः न सम्भवति। अत एवंभूतेषु पुराणेषु न कैश्चिदपि साम्प्रदायिकैराचार्यैः स्वकीया कृपा कृता, न वा केश्चित् स्मार्तैविद्वद्भिःस्तत्र दृष्टिर्दत्ता। परिणामतः तानि पुराणानि साधारणकथावाचकानां समपत्तयो जानाति। तैर्यथा ईत्सितं तथैव प्रचारः प्रसारश्च

कर्तुमारब्धः। तथा आत्मकल्याणाय जनमनोरञ्जनाय च तैः यादृशं वर्णनमुपयोगि प्रतीतं तेषां तेषु तादृश एव समावेशः कृतः।

अद्य इव प्राचीनकाले मुद्रणस्य सौविध्यं तु आसीदेव नहि। लिपि काराणामीषदसावधानतया पुराणेषु पाठान्तरे नूनं योगदानं जातम्। वर्णानामाकृतिगतसमानतया हस्तलिखितप्रतिपाठकानां लेखकानाश्च स्थाने स्थाने भ्रमो जातः। ते भ्रान्ता लेखकाः पाठकाश्च यदि प्रतिलिपीः करिष्यन्ति तर्हि तदशुद्धभावानुकूला एव प्रतिलिपीः करिष्यन्ति च। एवमशुद्धपाठस्य च परम्परा प्रसूता भविष्यन्ति। एवं विभिन्नप्रादेशिकाः स्वस्वप्रतिलिपिकरणसमये शुद्धमूलपाठाद् दूरं गच्छन्ति। यत्र प्रसंगस्य विषयस्यावसरस्य वा न काऽपि चिन्तैव जायते। वर्ण-पद-वाक्य-श्लोकानां परिवर्तनं कः कथयेत्, बहवो नवीना अध्याया अपि पुराणेषु संयोजिताः। कुत्रचित् कथामध्ये एव नवीनः प्रसंगोऽपि समागतः। एवं प्रक्षेपाणामपि बाहुल्यं जातम्। सामाजिक-परिस्थितिकारणात् पुराणेषु अधिकं परिवर्तनं जातमस्ति। समये समये जयमानाद् धार्मिकान्दोलनात् पुराणेष्वपि पाठान्तरं जातमस्ति। एवं पुराणेषु पाठान्तरस्य परिवर्तनस्य च सत्ता नाश्चर्यकरी घटनाऽस्ति।

यथा सम्प्रति वेदानां बहवोंऽशा लुप्ताः सन्ति तथा पुराणानामपि बहवो भागा लुप्ताः। अतिप्राचीनतमा पाठविषमता न्यूमता अधिकतया पाठभेदादिकं च स्वाभाविकमेवास्ति। बौद्ध-जैन-चार्वाक-यवनकालिकधर्मान्धतया वेद-पुराणादिशास्त्राणां समूलोन्मूलनाय यज्जघन्यं कृत्यं जातं तस्य प्रभावः प्रायः सर्वेषु शास्त्रेषु पतितम्। विधर्मिभिर्वहवोऽशा नाशं नीताः। एवं सत्यपि पुराणानि कथाप्रसंगद्वारा अद्यत्वेऽपि

सार्वजनीनानि सन्ति। कथावाचकानां व्यासानां वेदशास्त्रसंरक्षणतत्पराणां विविधानां विपश्चितां च कृपा उपलब्धेषु पुराणेषु मानवमतिसुलभं परिवर्तनं नाश्चर्यजनकं विद्यते।

अतो न केवलं पुराणानां मर्मज्ञैः विद्वभिरेव अपितु संस्कृतवाङ्मयस्य विपश्चिद्भिरपि अस्यां दिशि ध्यानं प्रदेयम्। पुराणानि न केवलं संस्कृतवाङ्मयस्य प्रतिष्ठाया अङ्गानि सन्ति, अपितु भारतीयसंस्कृत्या सह तेषामधिककालादेव घनिष्ठः सम्बन्धोऽस्ति। अतस्तेषामुद्धारः एकमादर्शमयमावश्यकं सामाजिकं सांस्कृतिकं च कार्यमस्ति।

**पुराणेषु प्रक्षिप्ता पाठः**

पुराणानामैतिहासिकेनाध्ययनेन वैज्ञानिकानुसन्धानेन च स्पष्टं प्रतीयते यद् मध्यकालीनया अनियन्त्रितस्वार्थपूर्णयशोलिपस्या आधुनिक्या उपेक्षाया दुष्परिणामैश्च पुराणानां वास्तविकं स्वरूपं सुरक्षितं नास्ति। मध्ययुगस्य स्वार्थमयसंघर्षात् पुराणानां बहवोऽशा लुप्ता जाताः, येषां पूर्तिः प्रक्षिप्तांशद्वारा जाताः प्रतीयन्ते, येन पुराणानां वास्तविक्याः स्थितेः ज्ञानं कठिनं जातमस्ति। तथा तेषु ननु –नचादीनाँ पर्याप्तोऽवकाशो जातः। अत आलोचकाः प्राक्षेपबाहुल्यात् पुरामानां प्रामाण्यं स्वीकर्तुमन्धविश्वासं मन्यन्ते, तत्र ते न सर्वथा विश्वसन्ति। तेषां मतमस्ति यत्पुराणानि युगविशेषस्य च रचनाः न सन्ति। अपि तु सुदीर्घकालाद् अनेके जना एषां निर्माणे परिवर्द्धने च भागं गृह्णन्तिस्म। व्यासादतिरिक्तैः सूतैरपि एषां निर्माणे सहयोगो दत्तः। पुराणेषूपलभ्यमाना वक्तारः श्रोतारश्च पुराणानां सामग्र्याः परिवर्तनस्योत्तरदायिनः सन्ति। सामाजिक्योऽभिरुचयः प्रवृत्त्यश्च पुराणानां रूपामि परिवर्तन्त्यो दृष्टिगोचरीभवन्ति। हरिवंशस्य हरिवंशपर्वणि सर्वतो न्यूनं तथा भविष्यपर्वणि सर्वाधिकं प्रक्षिप्तं स्थलं दरीदृश्यते। पुराणेषु प्रक्षिप्त-

पाठोऽवश्यमस्ति, किन्तु तन्निष्काशासनस्याधिकारो न कस्याचिदस्ति। कश्चित् प्रक्षिप्तांश एतदर्थं न त्याज्यो भवितुमर्हति यत् स व्येक्त्यन्तरनिर्मितोऽस्ति। न कस्यापि मूलपाठ एतदर्थं ग्राह्यो भवितुमर्हति यत् स ग्रन्थनिर्मातुः कृतिरस्ति। यतो हि कस्यचिदंशस्य त्यागग्रहणयोः हेयता उपादेयता वास्ति प्रधानं कारणम्।

पुराणानामनुशीलनेनानुमीयते यत्तेषां वर्ण्यविषयशैली पाठविधिषु एवंविधमैक्यमस्ति, येन तेषामेकस्मादेव मूलादुद्गमस्वीकारे न कापि विप्रतिपत्तिर्भवितुमर्हति। अद्यत्वे पुराणेषु यद्वैभिन्न्यं विलोक्यते तत्कारणं तेषां प्रवर्तकाः प्रचारका विभिन्नाः सम्प्रदाया एव सन्ति। पुराणानां परिवर्तन-परिवर्द्धनादिहेतवोऽपि सम्प्रदाया एव वर्तन्ते। पुराणपञ्चलक्षणातिरिक्ता अपि बहवः प्रसंगस्तेषु अनन्तपरिस्थिति-सम्प्रदाविद्भिर्विद्वद्भिः व्सानुकूला विषयाः संयोजिताः प्रतिकूलाश्च परिवर्जिताः। एवं भूयो भूयः कथासु परिवर्तणं न्यूनाधिक्यं मतवैभिन्न्यं सम्प्रदायपक्षपातत प्रक्षेपवाहुल्यञ्चाजायत। ब्राह्म-शैव-शाक्त-वैष्णव-भागवतादयः सम्प्रदायाश्च न सन्त्यतिप्राचीनाः, किन्तु ब्रह्मपुराण-विष्णुपुराण-शिवपुराण-कालिकापुराण-देवी-श्रीमद्भागवतादिपुराणानां नामकरणमुक्तसम्प्रदायकारणादेवाजायते-तिप्रतीयते।

पुराणेषु लेखकरुच्यनुसारं स्वस्वसम्प्रदायानां प्रामाणिकतायै प्रकृतविषयाणां पुष्ट्यर्थमेव स्थाने स्थाने प्रक्षेपा जाताः सन्ति। न तैः काऽपि हानिः सम्भवति। यथा केषाञ्चित् सहृदयानां गृहे दूरादागता अतिथयः सम्मानपूर्वकं तिष्ठन्ति तथैव प्रक्षिप्तपाठा अपि तिष्ठन्तु, मूलादपि सुरक्षिताः शिरोधार्याश्च स्युः। तेषां स्थित्या का हानिः, निष्काशनेन च को लाभो भवितुमर्हति ? यथा प्रवीणा रत्नपरीक्षका मिश्रितं रत्नं सम्यक् परीक्ष्य साधु रत्नं

गृह्णन्ति असच्च परित्यजन्ति तथैव पुराणमर्मज्ञाः पौराणिका विद्वांसोऽपि प्रक्षिप्तं पाठं सम्यक् परिचीय परित्यजन्ति मूलपाठं च गृह्णन्ति। विषयपुष्ट्यर्थं प्रक्षेपा अवश्यमादरणीयाः सन्ति।

पुराणेषु एकस्यैव परमात्मन उपासनायै मनुष्याणां विभिन्नप्रकृत्यनुसारं शैव-शाक्त-वैष्मव-सौर-गाणपत्यभेदात् पञ्चानां सम्प्रदायानां वर्णनमुपलभ्यते। आरम्भे प्रत्येकाधिकारिणे कस्यचिदेकस्य रूपस्याश्रयाद् अनन्यताभावस्यावश्यकता निर्दिष्टताऽस्ति। अन्ते इयमेवानन्यता एकमेवाद्वितीयं ब्रह्मेति रूपेण परिणता जायते। अस्या एव वैज्ञानिकपद्धत्या विवेचनं पुराणेष्वपि पर्याप्तरूपेण कृतं विद्यते। तदनुसारं प्रतिपुराणं यथासम्भवं पञ्चानां सम्प्रदायानां वर्णनेन साकं कस्यचिदेकस्य सम्प्रदायस्य कृते विशिष्टं स्थानं प्रदत्तमस्ति। अतः साम्प्रदायिकता नास्ति प्रक्षिप्ताः, परन्तु कस्यचित् पुराणस्य नायकं स्वसम्प्रदायाभ्यन्तरे मत्वा अन्यसम्प्रदायस्याराध्यदेवस्य निन्दाऽस्ति सर्वथा अनुचिता साम्प्रदायिकता च। कियद्भिः कारणैः पुराणेषु प्रक्षिप्ताः पाठाः समागताः सन्ति।

**पुराणेषु त्रिविधं वाक्यम्**

जगतः कारणभूतायाः प्रकृतेः त्रिगुणात्माकत्वात् प्रकृतिजन्यं समस्तं विश्वमपि त्रिगुणात्मकं स्वीकृतमस्ति। एवं त्रिगुणानां व्यापकता वेदेषु देवसम्मतसमस्तशास्त्रेषु च समानरूपेण विद्यमानाऽस्ति। एतएव भगवता श्रीकृष्णेनामपि गीतायां वेदस्य त्रैगुण्यविषयकत्वं स्पष्टमुक्तमस्ति- त्रैगुण्यविषया वेदा नैस्त्रैगुण्यो भवार्जुन। (२।३२)

एतदनुसारमेव वेदशास्त्रमर्मज्ञैः मुनिभिर्वेद पुराणे श्रुतिसम्मतशास्त्रेषु च (क) भयानक, (ख) रोचक, (ग) यथार्थभेदतः त्रिप्रकारकाणि वाक्यानि अथितानि सन्ति।

**(क) भयानकं वाक्यम् –**

तत्त्वदर्शिभिः विद्वद्भिः पापजनकेभ्योऽधर्मकार्येभ्यो निवृर्तये यानि भयप्रदावि वचनानि वेदेषूक्तानि सन्ति तानि भयानकानीत्युच्यन्ते। यथा यजुर्वेदे –

अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते। (४०।९)

अस्मिन्नीशावास्य मन्त्रेऽक्षरार्थमगृहीत्वा तात्पर्यार्थमेव गृह्यते। मायोपासना महापापमस्ति। ततो विवृतये जीवानामन्धकारप्रवेशभयं प्रदर्शितमस्ति। यतो मायानिवृत्तिः जीवानां प्रमुखं लक्ष्यमस्ति। एवं पुराणेष्वपि पापकर्मणो निवृतये भयानकशब्दानामस्ति प्रयोगो यथा –

आमन्त्रित्तस्तु यः श्राद्धं यीषितं सेवते द्विजः।
पितरस्तस्य तं मासं तस्य रेतसि शेरते।। वा. पु. ९८।६०
गत्वा च योषितं श्राद्धे यो भुङ्क्ते यश्च गच्छति।
रतोमूत्रकृताहारास्तं मासं पितरस्तयोः।। ब्र. पु. २१०।१०८

**(क) रोचकं वाक्यम्**

स्त्रीपुरुषयोः धार्मिककृत्येषु प्रवृतये वेदपुराणतन्त्रशास्त्रैषु यत् प्रशंसात्मकं रुचिकरं च वाक्यमुक्तमस्ति तद्वैदिकप्रक्रियानुसारमर्थवाद वाक्यं रोचकं च कथ्यते –

सुकृतेऽध्यात्मलक्ष्ये च रुचिकृद्वचनं सुराः।

रोचकं तद्धि निज्ञेयं श्रुतौ तन्त्रपुराणयोः।। (घ. क. पृ. ५४)

यथा – क. गावां मण्डूका ददत शतानि। (तै. सं.)

ख. सर्पाः सत्रमासत। (शा. दी. जै. सू. शा. भा.)

इत्यनयोर्द्वयोर्वाक्योरेतावदेव तात्पर्यमस्ति यत् क. मण्डूकसदृशाः तुच्छजन्तवोऽपि यदा गोदानं कर्तुं प्रभवन्ति, तर्हि सर्वसाधनसम्पन्नैः सर्वश्रेष्ठैर्मनुष्यैरवश्यं योगदानं कर्तव्यम्। ख. एवं विषधरा सर्पा अपि यज्ञं कर्तुं क्षमन्ते, तर्हि सकलकार्यक्षमैर्मनुष्यैस्तु यज्ञानुष्ठानमवश्यमेव विधेयम्। यदि कश्चित् समालोचकोऽर्थवादे ध्यानमदत्वा कोलव्यवहारे एवं कार्यमसम्भवं मत्वा वेदम्क्षेप्तुमुद्यतो भवेतर्हि तस्य शास्त्रतात्पर्यानभिज्ञतैव स्यात्। (शवरभाष्य तर्क पा. १।१।३५) वेदवत्पुराणेष्वपि विविधशुभकर्मसु सन्मार्गे च रुचि वर्द्धनाय रोचकपद्धतेनुसरणं कृत विद्यते। यथा –

यावते पादं नरो भक्त्या गच्छेद् विष्णुप्रवक्षिणे।

तावत् कल्पसहस्राणि विष्णुना सह मोदते।। (प.पु. ७।११।५२)

प्रतिष्ठया सार्वभौमं सद्मना भूवनत्रयम्।

पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामियात्।। (श्री. भा. ११।५७.५२)

**(ख) यथार्थ वाक्यम्**

अक्षरार्थानुसारि तत्त्वज्ञानोपदेशकं विधिनिषेधात्मकं वाक्यं यथार्थमुच्यते –

यथा ऋग्वेदे – अक्षैर्मादिव्य कृषिमित् कृषष्व (१०।३४।१६) यजुर्वेदे च मागुधाः कस्य स्विद्धनम् (४०।१) अनयोर्वेदवाक्ययोर्द्यूतं न कर्तव्यं, मनसा कृषिः कार्या, कृषिकर्म परमो धर्मोऽस्ति, परधने मनो न नेयम्। इति आदेशा दत्ताः सन्ति। ते वस्तुतः तथैव सन्ति द्यूतव्यसनहीनस्य कृषिकर्तुः परधनाकाङ्क्षिणश्च धनीभवनं यशस्विभवनञ्च प्रत्यक्षसिद्धमस्ति।

अस्या एव पद्धतेः पुराणेष्वपि अनुकरणं कृतमस्ति। यथा तीर्थसेवन प्रसङ्गे पद्मपुराणे–

यस्य हस्तौ च पादौ च मनश्चैव सुसंयतन्।

विद्या तपश्च कीर्तिश्च च तीर्थफलभाग्भवेत्।। (प.प.ल.ख. २३७।३२)

प्रसङ्गेऽस्मिन् संयम-ज्ञान-तपश्चर्यादिभिः तीर्थसेवनफललाभस्य यत् समर्थनं कृतमस्ति, तत् वास्तविकरूपेण तथैवास्ति।

एवं वेदवाक्यवत् पुराणवाक्येष्वपि भयानक-रौचक-यथार्थवादैः संगति कृत्वाऽर्थकरणं श्रेयस्करं बुद्धिमत्ता शास्त्ररहस्यज्ञता तथा शास्त्रप्रियता चास्ति। अत्र विषये विस्ताराय द्रष्टव्यौ धर्मकल्पद्रुमस्य तृतीयो भागः पुराणदिग्दर्शनञ्च।

**वेदपुराणयोरर्थपद्धतिः**

यथा सर्वेषां शास्त्राणां स्वे स्वे विशेषविषया भवन्ति, येषां मुख्यतया प्रतिपादनं तेषु तेषु शास्त्रेषु कृतमस्ति तथैव पुराणानामपि द्वौ विशेषविषयौ स्तः (१) सृष्टिप्रक्रियाया विवेचनम्, (२) आख्यानानां कथनञ्च। यथा पुराणानां सृष्टिविषयकसिद्धान्तज्ञानाय विभिन्नदार्शनिकसिद्धान्तानां ज्ञानमस्ति नितान्तमावश्यकम् तथैव येषां प्रतिपादनं

दर्शनशास्त्रेषु विषेषरूपेण कृतं विद्यते तथैव पौराणिकानामाख्यानानां रहस्यस्य याथार्थज्ञानाय तत्तदाख्यानानां मूल्यस्य वेदवाङ्मयस्य ज्ञानमावश्यकं वर्तते यत्राख्यानानां बीजं निहितमस्ति। अतो वैदिकानामख्यानानामाधारेण पौराणिकाख्यानादीनामर्थकरणं नितान्तमावश्यकमस्ति। द्यत्वे वेदार्थनिर्णये यास्काचार्यप्रणीतस्य निरुक्तस्यैव प्राधान्यं मन्यते, यतो हि वैदिकसाहित्यसागरस्यैकमिदमेव ग्रन्थरत्नमत्याचारिणां यवनसम्राजाममानुषिकैः कृत्यैरग्निसादवशिष्टं वर्तते, यत् पूर्ववत् सुरक्षितं सदस्माकं कृते गुरोः कार्यं करोति।

यथा निरुक्ते एकस्यैव वेदमन्त्रस्याध्यात्मिकाधिदैविकाधिभौतिका अर्थाः क्रियन्ते तथैव पुराणेषु कियत्सु स्थलेष्वपि आध्यात्मिकाऽधिभौतिकाधिदैविकाश्चार्था संघटन्ते। यदि कस्मिंश्चित् पुराणे आध्यात्मिकस्यार्थस्य मुख्यताऽस्ति, तर्गि द्वितीयस्मिन् पुराणे आधिभौतिकस्यार्थस्य प्राधान्यमस्ति तथा तृतीयस्मिन् पुराणे आध्यात्मिकस्यायंस्य मान्यताऽस्ति। यथा ब्रह्मदुहितृविषयककथायाः संकेतः श्रीमद्भागवतेब्रह्मवैवर्तेदेवीभागवते च वर्तते परं त्रिषु पुराणेषु इत्थं कथा भिन्नभिन्नरूपेण कथिताऽस्ति। श्रीमद्भागवतस्य तृतीये स्कन्धे कथेयमाधिभौतिकस्यार्थस्याभिप्रायेणोक्ताऽस्ति। ब्रह्मवैवर्ते आध्यात्मिकस्यार्थस्य निर्देशोऽस्ति। तथा देवीभागवते आधिदैविकस्यार्थस्यास्ति संकेतः। अतोऽधिकारिभेदाद् यथा देवेषु एक एव मंत्रः प्रसंगानुसारमर्थवेदादनेकेषु कार्येषु प्रयुज्यन्ते तथैव पुराणेष्वपि प्रसंगानुसारमधिकारिभेदाद् विभिन्नार्थकरणे न काप्यऽस्ति विप्रतिपत्तिर्नवा किमत्यनुचितम्। पुराणेषु यत्र यत्र वेदविज्ञानं मनोरञ्जनोपाख्याने वक्तुं यत्नः कृतोऽस्ति, तत्र तत्र पुराणानां वर्णनशैली इयती गभीरा रहस्यमयी च जाताऽस्ति, यस्या अनेकेऽर्था

भवन्ति, यो न साधाराणबुद्धिगम्यो भवति। यथेन्द्रवृत्रासुरयोः प्रसिद्धयुद्धकथा। कथेयं श्रीमद्भागवते विष्णुपुराणे च महता विस्तरेण लिखिताऽस्ति। भक्तिमार्गानुसारं वृत्रोभगवदनुगृहीत आसीत्। शापादसुरयोनौ समुत्पन्नः। अत एवेन्द्रेण सह युद्धतोऽस्य महान् उदारतापूर्णो व्यवहारो दृश्यते। इन्द्रस्य हस्ताद् वज्रे निपते तस्मिन् प्रहारकरणं तु दूरमासीत्, किन्तु महत्या उदारतया तमुत्थापयितुं कथयता तेन यस्या नीतेः उपदेशो दत्तस्तच्छ्रुत्वा महेन्द्रो लज्जितो जातः। वृत्रासुरस्योक्तौ भक्तिमार्गस्. तद्रहस्यं निहितमस्ति यच्छ्रुत्वा भक्तहृदयं गद्गदं भवति। अत्रैकत्र भक्तिरसस्य प्रवाहो वहति तर्हि अपरत्र विज्ञाननिर्भरणी निःसरन्ती दृश्यते। वैज्ञानिका इन्द्रवृत्रासुरयुद्धं वर्षाविज्ञानं कथयन्ति, यतो हि ते वृत्रोपाख्याने रूपकेण वर्षा विज्ञानं मन्यन्ते। यास्कमुनिनाऽपि स्वकीये निरुक्ते वृत्रोपाख्यानं वर्षाविज्ञानमभिमतमस्ति – तत्र को वृत्रः ? नेध इति नैरुक्ताः। त्वाष्ट्रोसुर इत्यैतिहासिकाः। अपां च ज्योतिपश्च मिश्रीभाव कर्मणी वर्षकर्म जायते (२।५।२)

अस्य व्याख्यां कुर्वता दुर्गाचार्येण लिखितं यत् – तस्मिन् हते वृत्राख्ये मेघे हते प्रस्पन्दिरे आपः। तदभिमानिनी एषा। एवं ब्रह्मणः स्वपुत्र्याः सरस्वत्याः पश्चात् कामातुरत्वेन गमनमपि अविज्ञानमस्ति। सन्ध्या सूर्यस्याग्रे गच्छति सूर्यात् सन्ध्योत्पत्तिरपि जायते। अतः सन्ध्या सूर्यस्य पुत्री कथ्यये। पुराणमर्मज्ञा विद्वांसो वदन्ति, यत् पुराणानामर्थेषु महत्या सावधानतया सूक्ष्मदृष्ट्या चोहापोहो विधेयः। पुराणेषु कुत्रचिदियान् सूक्ष्मो विषयोऽस्ति, च उपरिदृष्प्या पुराणिकरेकार्ड्स आफ हिन्दू राइटस एण्ड कस्टम्सनामकं पुस्तकं पौराणिकशोधकार्यायात्यन्तं महत्त्वपूर्णं परमोपयानि च विद्यते। तस्य विस्तृतभूमिकाहितविष्णुपुराणस्यांग्रेजीसंस्करणं महदुपादेयं वर्तते। तथा डा.

देवेन्द्रकुमारराजारामपाटिलद्वारा निबद्धः कल्चरल हिस्टरी फ्राम दि वायुपुराणनामा ग्रन्थः पौराणिकगवेषणात्मककार्यायातिशयोपयोगी सिद्धोऽस्ति। भारतीयसंस्कृतेः सभ्यतायाश्च व्यपकेतिहासाय पौराणिकसाहित्यस्य महती उपयोगिता वर्तते। यतो हि पौराणिके वाङ्मये भूतत्त्व भूगोल-खगोल-राजनीति-कला-वि5न-दर्शनतत्त्वज्ञान-सम्बिधान-धर्मार्थादीनां लोकोपयोगिनां शास्त्रीयविषयाणाञ्च साङ्गोपङ्गविवरणमुपलभ्यते।

स्कन्दपुराणास्य प्रभासखण्डेनापि ब्रह्मणो वक्त्रादिर्निर्गतं पुराणं वेदसमकक्षं साधयता प्रोक्तं यत् सृष्ट्यादौ घोरं तपस्यतो ब्रह्मणो मुखेभ्यः प्रथममङ्गसहितानां वेदानां प्रादुर्भावो जातः, तदनन्तरमेव सर्वशास्त्रमयस्य पुराणस्याविर्भावोऽभवत्, यन्नित्यं शब्दमयं पुण्यप्रदं शतकोप्रिविस्तरञ्च विद्यते –

यदा तपश्चचारोग्रममराणां पितामहः।
आविर्भूतास्ततो वेदाः सषडङ्गपदक्रमाः।।
ततः पुराणमखइलं सर्वशास्त्रमयं ध्रुवम्।
नित्यं शब्दमयं पुण्यं शतकोटिप्रविस्तरम्।।
निर्गतं ब्रह्मणो वक्त्रात्..............।

श्रीमद्भागवतेऽपि एतदेव प्रकारान्तरेणोल्लिखितमस्ति, यद् तथा ऋग्यजुःसामर्थवाणो ब्रह्मणश्चतुर्भो मुखेभ्यः क्रमशः समुत्पन्नास्तथैव ब्राह्मणा पञ्चमं वेदस्वरूपमितिहासपुराणमपि स्वमुखेभ्यः एवोत्पादितम् –

इतिहासपुराणानि पञ्चमं वेदमीश्वरः।
सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनः।।

अशेषशास्त्रनिष्णातैः पूज्यपादैः स्वामिवर्य्यैः श्रीकरपात्रिमहाराजेरपि सुपुष्टैः प्रमाणैः तर्कसङ्गतयुक्तिभिश्च चेदवदेव पुराणानां मान्यता साधितास्ति साप्ताहिकसिद्धान्तपत्रे।

भारतीयविद्वन्मान्यतानुसारं वेदे यत् सुस्पष्टं नोसलभ्यते तदपि पुराणप्रोक्तत्वाद् भवति ग्राह्यम्। यथा हि वेदे ग्रहसञ्चार-कलशुद्धितिथिक्षयवृद्धिपर्वग्रहादीनां निर्णयो नास्ति, परं पुराणेष्वेषां निणयात् सर्वमान्यता दृश्यते। वेदेषु यत् किमपि नोपलभ्यते तत् स्मृतिषूपलभ्यते। यच्चोभयत्रापि नोपलभ्यते तत् पुराणेषूपलभ्यते। अतः पुराणार्थो वेदार्थदप्यधिको ग्राह्यो भवति यतो हि पुराणेषु वेदार्थ एव सम्यक् संगृहीतोऽस्ति –

न वेदे ग्रहसञ्चारो न शुद्धिः कालबोधिनी।
तितिवृद्धिक्षयो वापि न पर्वग्रहनिर्णयः।।
इतिहासपुराणस्तु कृतोऽयं निर्णयः पुरा।
यन्न दृष्टं हि वेदेषु तत् सर्वं लक्ष्यते स्मृतौ।।
उभयोर्यन्न दृष्टं हि तत् पुराणः प्रगीयते।
वेदार्थादधिकं मन्ये पुराणार्थं वरानने।
वेदाः प्रतिष्ठिताः सम्यक् पुराण नात्र संशयः।।

शास्त्रेषु श्रुतिः स्मृतिश्चेति द्वे नेत्रे प्रोक्ते स्तः तथा पुराणं हृदयं कथितस्ति। तत्रैकेन चक्षुषा हीनो मनुष्यः काण- कथ्यते, द्वाभ्याम्।

**शब्दजातस्य विमर्शः**

संस्कृतवाङ्मयस्य सर्वे शब्दा भागद्वये विभक्ताः सन्ति। एके वैदिकाः शब्दाः, द्वितीये च लौकिकाः शब्दाः। तत्र वैदिकाः शब्दा लौकिकव्याकरणनियमैराबद्धा न भवन्ति, ते स्वयं निष्पन्नाः शुद्धाश्च मन्यन्ते, तथा तेषां निरुक्तानुसारं विभिन्नप्रकारको व्यत्ययः शिरोधार्यो भवति। अत एव महावैयाकरणेन महर्षिणा पाणिनिना वैदिकप्रक्रियायः। बहुलं छन्दसीत्यादि सूत्राणां निर्माणं कृतम्। लौकिकाः शब्दाश्च लौकिकैर्व्याकरणैर्निष्पद्यन्ते सर्वैर्लोके प्रयुज्यन्ते च।

## पुराणेषु भौतिक-षड्चक्रचिन्तनसमीक्षा

भारतीयसंस्कृतेः प्रतीकानि पुराणानि सन्ति विविधानां विद्यानामागाराणि। तत्र प्रसङ्गतः स्थलविशेषेषु योग-यन्त्र-तन्त्र-मन्त्रादीनामपि विचारचर्चा प्रचुरताया कृताऽस्ति।

योगस्य प्रायः सर्वे विषयाः सन्ति प्रायोगिकाः परमोपयोगिनश्च। अत एवायमास्तिक-मास्तिक-प्राच्य-प्रतीच्यादिभिः सर्वैरेव समानरूपेण समाद्रियते। अवान्तरविषयेषु स्यान्नाम मतवैविध्यम्, योगविषये परन्तु क्रियांशानां प्रयोगे न कस्यापि विद्यते विमतिः।

## अत्यावश्यकं योगसाधनम्

वैज्ञानिका इव योगिनोऽपि समाजस्य उन्नायका भवन्ति। यथा वैज्ञानिकाः स्व-प्रयोग-शालायां तन्मयतापूर्वकं विविध प्रयोग-परीक्षणानन्तरं समाजस्य समक्षे विविधं कल्याण-कारिणम् आविष्कारम् उपस्थापयन्ति तथैव योगिमोऽपि स्व-प्रयोग-शालायां स्वस्थान् दृढान् बलिष्टान् कार्य-कुशलान् सर्वकला प्रवीणान् नागरिकान् निर्माय राष्ट्रस्य

समाजस्य च मान्तम् उपकारं कुर्वन्ति। वैज्ञानिकानां प्रयोगाः कदाचिद् उफला समाजस्य राष्ट्रस्य च हानिकारका अपि भवितुमर्हन्ति, परं योगिनां निर्माणकार्याणि सर्वदा सत्यस्य शिवस्य सुन्दरस्य च प्रतिष्ठापकान्य देव भवन्तीति नाऽत्र सन्देहः।

योनिनां वै5निकानाञ्च चिन्तनप्रवाहमार्गः कामं भिन्नो भवेत्, परं द्वावपि प्रकृतेः तल स्पर्शि विवेचनं विधातुं प्रयतेते। द्वाभ्याम् एव जगतः सूक्ष्माणां स्थितीनां स्पर्श कर्तुं प्रयत्यते। अन्तरं तयोः केवलम् एतावद् एव भवति यद् वैज्ञानिकाः केवलं जगतः स्थूल शक्तिषु स्वाधिकारं कृत्वा सन्तोषम् अनुभवन्ति, किन्तु योगिनो नैतावता तुष्यन्ति, प्रत्युत तेषां योगचित्त धारा इतोप्य अग्रे प्रवहति। योनिनः समाधिस्थाः सन्ता विश्व वारिधौ विकोर्णानि सिद्धिरत्नानि संग्रहीतुं प्रभवन्ति। योगिनाम् अन्तदृष्टिः अत्यन्तसूक्ष्मा भवति। ते स्वयं साधना सम्भावित सिद्धि समृद्धिमर्वेषां समक्षं समुपस्थापयितुं समर्था भवन्ति। अतो योगिनां कार्यं कौशल धन्यं यशस्यं वन्द्यं सर्वथा स्पृहणीयं राष्ट्रनिर्माणोपयोगि विश्वप्रकारि चास्ति।

विशालं वैभवं, विपुला विद्या, सुरम्यं स्थानम् अपरिमितं साधनम्, समृद्धं साहित्यम्, सुन्दरं शरीरं, कुशाग्रा बुद्धिः उर्वरितं मस्तिष्कम्, सूक्ष्मा विवेचनसरणिः, सर्वम् एतत् स्वास्थ्यंविना निष्फलं भवति। अतोऽनायासेन सम्भावितेन योगाऽभ्यासेन शरीरस्य स्वास्थ्य-लाभायावश्यं प्रयत्नो विधेयः। योगाऽभ्यासार्थं न बाह्यस्य साधनऽऽवश्यकता भवति, नापि विशालस्य भवनस्यापेक्षा जायते, न चाधिकस्यैश्वर्यस्याऽऽकाङ्क्षास्ति, किन्तु प्रतिदिनं प्रातः सायं यथासम्भवं स्वभवनेपवित्रे एव वातावरणे स्वल्पः समयोऽपेक्ष्यते। प्रातः

शारीरस्य वौद्धिकस्य च स्वास्थ्यस्य लाभाय शरीरं सुदृढं बलिष्ठम् नीरोगं मनोहरं च विधातुं योगदर्शनस्य साधनम् अवश्यम् अनुष्ठेयम्।

योगः शरीरम् नीरोगं बलिष्ठं च कुरुते, मानसं च निर्मलं पवित्रं सम्पादयति। योगानुसारं प्राकृतिकं जीवनम् एव दैनिकस्य क्रमोऽस्ति। योगिन्द्रो वनेषु, पुष्प-वाटिकासु, लता-कुञ्जेषु, गोमयादिलिप्तेषु पवित्रतमेषु गृहेषु, नदी-कूप-सरसां विशुद्ध जलवायूनां सेवनेन दुग्ध-कन्द-मूल-फलादीनां सदुपयोगेन सन्मार्गानुसरणेन च सूर्य-किरणैर्जीवनतत्त्व-ग्रहणपूर्वकम् अनायासेन मानसिकं नैरुज्यम् उपलभ्य प्राकृतिकं जीवनं यापयन्ति।

शरीरं व्यवहारार्थस्य परमार्थस्य च मुख्यं साधनम् अस्ति। एतद्वारैर्वाभीष्टस्य वस्तुन उपलब्धेः सम्भवोऽस्ति। शुद्धा नाड्यः, विशुद्धं रुधिरम्, बलवान् मज्जा तन्तुः, सशक्तः क्रिया तन्तुः, निर्मूलं ज्ञानम्, विशुद्धं वीर्यं च मानवशरीर स्वास्थ्यलाभे भवन्ति कारणानि। एतदर्थं योगाभ्यासम् अन्तरा नाऽस्ति किञ्चिज् अन्यद् वास्तविकम् आत्यन्तम् उपयोगि च साधनम्। बाह्य सौन्दर्या, पेक्षयाऽऽन्तरिकसौन्दर्यस्य भवति महत्त्वम्। नियमतो योगसाधनेनान्तरिकं सौन्दर्यं वर्द्धते। अतो योगिनो बाह्यसौन्दर्यवर्द्धनापेक्षयाऽऽभ्यन्तरस्य सौन्दर्यस्य परमोपयोगित्वम् अनुभूयानुशीलयन्ति योगाभ्यासम्। यथा भगवतो मूर्तौ मन्दिरं च सौन्दर्क्यं, रम्यत्वं, सुदृढत्वं स्वच्छत्वं चापेक्षितम् अस्ति तथैव शरीरम् अप्यात्म परमात्मनोः मन्दिरं मत्वा तस्य निर्मलता सम्पादनाय प्रयतन्तेऽहर्निशं विवेकिनी योगिनः। अत एवोक्तं पुज्यपाद भगवच्छंकराचार्यैः सदासारस्तोत्रे –

देहो देवालय प्रोक्तो देवी देवो निगञ्जनः।

अर्चितं सर्वभावेन स्वानुभूत्य विराजते।।

यदि समुचितेन रूपेण परमार्थ साधनं क्रियेत तर्ह्य आत्मशरीर एव भगवतो निरञ्जनस्याऽवश्यं संभवेत्। यथा स्वच्छे मलरहिते दर्पणे शरीरं स्पष्टं प्रतिबिम्बितं भवति, तथैव शराराऽऽरोग्येण प्रसन्ने मनसि सर्वाः क्रियाः सफला भवन्ति।

अतएव योगः कर्मसु कौशलम् इति यद् उक्तं भगवता श्रीकृष्णेन तदपि समीचीनं घटते। योगेम कर्म कर्तुं शक्तो भवति मानवः। कर्म च जीवनस्यास्माकं मूलम्। कर्म विना न क्षणम् अपि स्थातुं शक्यते केनापि। यथोक्तम् गीतायाम् –

तर्हि योग एव मोक्षद् इति ज्ञानिनां मतं कथंकारं संगच्छते। तद् उत्तरे एवम् अवादीत् भगवान् शंकरः – यद्यपि ज्ञानेन मोक्षो भवति नान्येव साधने नेति ज्ञानिनां कथनं सत्यम् अस्ति, तथापि खड्गेनैव शत्रुपराजयो भवतीत्य अस्य सत्यत्वेऽपि किं युद्धेन वीर्येण विना शत्रुपराजयः सम्भवति । तथैव योगं बिना केवलेन ज्ञानेन मोक्षप्राप्तिर्न सम्भवति। किञ्च ज्ञाननिष्ठो विरक्तो धर्मज्ञौ जितेन्द्रियोऽपि देवो योगेन विना मोक्षं न लभते –

ज्ञाननिष्ठो विरक्तोऽपि धर्मज्ञोऽपि जितेण्द्रवः।

विना योगेन देवोऽपि न मोक्षं लभते प्रिये।। (योगबीजम् १।२४)

भारतवर्षे पूर्वत एव चिन्तनशीलव्यक्तिभिरात्मदत्त्वस्यानुसन्धानं क्रियते। साधनसम्पन्ना योगिनो यगबलेनान्तःकरणानां बाह्येन्द्रियाणां च समुत्कर्षं संसाध्यात्मतत्त्वं ज्ञातुं प्रभवन्ति। लौकिकप्रत्यक्षद्वारा सत्यस्यात्मतत्त्वस्य संपादनं साक्षात्कारो वा न संभवतीत्य अतः समाधेरभ्यासो विविधसाधनप्रणालीनाम् अनुशीलनं चात्यन्तम् अस्त्य आवश्यकम्। यमनियमाऽऽसनप्राणायामप्रत्याहारधारणाध्यानसमाधिभिरन्तःकरणस्य

शुद्धौ सत्याम् एव चिद्दर्पणे आत्मनो बिम्बः प्रतिफलति। अतो योगसाधनद्वारा अन्तःकरणस्य शुद्धिः परमाऽऽवश्यकीति योगविदां मतम्।

श्रवणमनननिदिध्यासनानि त्रीण्येब साधनानि साधारणतया भारतीयदर्शनेषु आत्मदर्शनस्य कारणानि सन्ति। तथा चोक्तम् –

श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।

मत्वा च सततं ध्येय एते दर्शनहेतवः।।

न्यायकुसुमाञ्जलौ उदयनाचार्येणाऽपि श्रवणानन्तरम् एव दार्शनिकालोचनायाः स्थानं स्थिरीकृतम् अस्ति –

पदचर्चैयमीशस्य मननव्यपदेशभाक्।

उपासनैव क्रियते श्रवणलन्तरागता।।

योगिभिर्योगबलेन मनः स्थिरीकृत्य देहाभ्यन्तरे कुत्र किम् अस्तीति सम्यग् ज्ञात्वा मानसिकीनाम अवस्थानां विचार आरभ्यते। लौकिकैः जनैशच योगसाधनद्वारा शरीरं स्वस्थं विधाय स्वकर्तव्यं कर्म सम्पादयद्भिर्देशस्य राष्ट्रस्य च रक्षोचितसमाजस्य निर्माणं, सत्साहित्यस्य च सर्जनं विधेयमित्यु उभयथैव योगस्योपयोगिता। सम्प्रति तु व्यवहारदृष्ट्याऽतीवाऽतीवावाऽवश्यकताऽस्ति तस्य करालेऽस्मिन् राष्ट्रसंकटकाले। तेन स्वकीयं शरीरम् इन्द्रियाणि मनोर्बुद्धि वा संशोष्य वयं शत्रुभिः प्रदत्तं संकटम् अपाकार्तुं समार्थाः भवेम इति।

योगभूमिमारोढुमष्टौ सोपानानि सन्ति। येषां वर्णनं परमकारुणिकेन महर्षिणा पतञ्जलिना स्वकीये योगसूत्रे विहितं विद्यते। तत्र वहिरिन्द्रियनिग्रहात्मको यमः प्रथमः,

अन्तरिन्द्रियनिग्रहरूपो नियमो द्वितीयः, स्थूलशरीराधिपत्यस्थापननासनं तृतीयम्, प्राणक्रियाधिपत्यप्रवर्तकश्चतुर्थः प्राणायामः, वहिस्तोऽन्तः प्रवेशात्मिका हि क्रिया पञ्चमी प्रत्याहारशब्देनोच्यते, अन्तः स्थैर्याविधायिका क्रिया षष्ठी धारणा निगद्यते, आत्मानुसन्धानपरा क्रिया सप्तमं ध्यानमुच्यते, जीवात्मपरमात्मनोरैक्यकरणष्टमं समाधिशब्दवाच्यं भवति। अयमेवाष्टमसोपानात्मकः समाधिः राजयोगस्य साध्यो विषयः। आचारवान् योगो क्रमशः कस्मिन्नपि, एकस्मिन् योगमार्गे संसर्पन्नस्मिन्नेवाभ्यर्हितेऽष्टमे समाधिरूपे सोपाने समागत्य विश्राम्यति।

इमानि अष्टौ सोपानानि योगस्याष्टौ अङ्गान्युच्यन्ते। एषां योगाङ्गानामनुष्टानात् शरीस्थायाः अशुद्धेः क्षयानन्तरं विवेकख्यातिपर्यन्तं ज्ञानस्य प्रकाशो जायते। तथाचोक्तं योगसूत्रस्य द्वितीये साधनपादे –

योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः।(२।२८)

योगाङ्गानि च योगसूत्रे भगवान् पतञ्जलिराह –

यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्ठावङ्गानि।(२।२९)

एषु अन्तिमाः त्रयः धारणा-ध्यान-समाधयः संयमपदेन प्रोच्यन्ते। इमे त्रयः आद्यानां पञ्चानां यमादीनामपेक्षया सवीजस्य समाधेः अन्तरङ्गसाधनानि सन्ति, किन्तु निर्वीजस्य समाधेस्तु इमे त्रयोऽपि वहिरङ्गानि एव साधनानि सन्ति, यतो हि तस्यान्तरङ्गं साधनं परवैराग्यमेवास्ति। तत्संयमविनियोगाद् विविधाः सिद्धयः प्राप्यन्ते, यासां वर्णनं योगदर्शनस्य तृतीये पाद विस्तरतो विद्यते। यद्यपि एताः सिद्धयः अश्रद्धालूनां योगो श्रद्धावृद्धये विक्षिप्तचित्तानां चित्तस्यैकाग्रतासम्पादनाय सहायिका भवन्ति तथापि आसु

आसक्तिर्न विधेया। ता हि सर्वाः सिद्धयः व्युत्थानदशायां सिद्धयः सत्योऽपि समाधौ विघ्नरूपा एव सन्ति ते समाधावुसर्गा व्युत्थाने सिद्धयः।(यो. सू. –३।३७)

योगमार्गमनुसरत योगिनो विविधप्रकाराणि विघ्नानि उपतिष्ठन्ते। तत्तद्भूमिकाधिपतयो देवा महता समादरेण दिव्यविषयैश्वर्यादीनां प्रलोभनानि प्रददते। तेषु मनसः सङ्गात् सर्वः परिश्रमो व्यर्थो भवति अहङ्काराच्च अनिष्टस्य प्रसङ्ग उपतिष्ठते। तथाहि भगवान् पतञ्जलिः –

स्थानुपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात्। (यो. सूय –३।५१)

अतो योगाभ्यासिना योगिना सिद्धिभ्यः सावधानेन भवितव्यम्। तत एव तस्य लक्ष्यसिद्धिः सम्भवति, नान्यथा।

पूर्वसंस्कारवशाज्जीवो विषयभोहेच्छायामासक्तो भवति, तथा च भोगेच्छया सांसारिके गतागतचक्रे परिभ्रमन् निरन्तरं दुःखभाग्यवति। एतस्माद् दुःखजालान्निःरसणाय योगमार्गोऽस्ति साधीयान् पन्थाः। बुद्धियोगस्यायमेवास्ति क्रमो यद् अज्ञानवशादुत्पन्नममत्ववशात् प्राणी दुःखभाग् भवति। दुःखज्ञानकारणतो वैराग्यमुपजायते। विषयवैराग्यतश्च सम्यग्ज्ञानस्य सदसज्ज्ञानरूपस्योदयो भवति। ज्ञानसूर्योदये च स्वत एवाज्ञानान्धकारो दूरीभवति। ततो ज्ञानात्मकस्य स्वरूपस्यानुभवसमकालमेव विषयवैराग्याद् दोषनिवृत्तौ सत्यां कैवल्यमुपजायते मुक्तिपदमुपतिष्ठते एव। इदमेव राजयोगस्य साधनम्। तद्वैराग्यादपि दोषबीजक्षये कैवल्यम्।(यो. सू. ३४)

सांख्ययोगदर्शने सर्वप्राचीने वैदिकदर्शने स्तः। योगः कर्मयोगनाम्ना तथा सांख्यं ज्ञानयोगनाम्ना प्रसिद्धे स्तः, ययोः गीतायां भूयो भूयो महत्त्वं प्रदर्शितमस्ति। श्रीमद्भागवतस्य तृतीये स्कन्धे महामुनिना कपिलेन स्वमातरं देवहूतिं प्रति तथैकादशे स्कन्धे भगवता श्रीकृष्णेन उद्धवं प्रति सांख्ययोगयोराध्यात्मिक उपदेशो महता कौशलेन प्रदत्तोऽस्ति।

सांख्येन स्वकीयो निखिलोऽपि सिद्धान्तः वेदस्याधारेणैवाङ्गीकृतोऽस्ति तथा तेषां श्रुतिभिरविरोधः साधतो विद्यते। योगश्च सांख्यस्यैव क्रियात्मकं रूपमस्ति। योगो हि सर्वसम्प्रदाय-मतमतान्तर-वादविवादविहीनः सार्वभौमो धर्मोऽस्ति, यः तत्त्वज्ञानं स्वानुभवद्वारैवोपदिशति, साधकं च चरमलक्ष्यं यावदुपस्थायति। अत एव श्रुतयो योगस्य माहिमानं गायन्ति। जीवो हि स्वभावतः चित्तवृत्तिद्वारा स्थूलतामनुसरति, परं योगः तां स्थूलतातः सूक्ष्मतां नयति। चित्तवृत्तयो यावद् बहिर्मुखा भवन्ति तावदेव तत्र तमोरजसोः मात्रा वर्द्धते, तद्विपरीता वृत्तये यावदन्तर्स्वीना भवन्ति तावदेव तमोरजसोः तिरोभावपूर्वकं सत्त्वप्रकाशो वर्द्धते। एवं यदा काचिदप्रवृत्तिर्नावतिष्ठते तदा शुद्धं परमात्मतत्त्वमेवावशिष्यते। तत्साक्षात्कृत्य योगी कृतकृत्यो भवति।

यथा वायुना कम्पमाने जले चन्द्रादिप्रतिविम्वं स्पष्टं न प्रतीयते, तथैवानेकविधसङ्कल्पधिकल्पजालैः संक्षोभ्यमाणे मनस्यात्मस्वरूपस्यावबोधो न सम्यक् सम्भबति। अतः एवोक्तं योगकल्पद्रुमे –

ज्ञानं वदन्तीह विमोक्षकारणं तज्जायते नैव विलोलचेतसि।
लौल्यं हि योगेन विना प्रशाम्यति तस्मात्तरुर्थं हि यतेत साधकः।।(७)

योगतत्त्वोपनिषद्यपि ज्ञानरहितस्य मोक्षासम्भवात्तदर्थं योगाभ्यासस्योपदेशो दत्तो विद्यते –

## मानवशरीरमेव षट् चक्रचिन्तनसमीक्षा भूमिः

शरीरेऽस्मिन्ननेकेषां तत्त्वानां सद्भावेऽपि योगसाधनेऽत्यावश्यकज्ञातव्यावयवादीनां स्वरूपाणि तत्र कर्तव्यध्यानादिकं विज्ञाय कैवल्योपलब्धये चक्रज्ञानं परमोपयोगीति तद्विचार आरभ्यते। योगिनो मानवशरीरं सप्तप्रासादं भवनं मन्यन्ते। तत्रमूलाधार-स्वाधिष्ठान-मणिपूरक-अनाहत-विशुद्ध-आज्ञा-सहस्त्रार-चक्राणीति सप्त प्रासादाः सन्ति।

यदि विश्वेस्मिन् सर्वेभ्यो वस्तुभ्योऽद्ऽुतं किमपि वस्तु विद्यते, तदिदं मानवशरीरमेवास्ति। एतद्वारैव भौतिकाध्यात्मिकजगतोऽनेके चमत्कारा उपलभ्यन्ते। अतो मानवशरीरमाश्चर्याणाश्चर्यमुच्यते। अनेनैव निर्वाणसुखम्, निर्विकल्पकसमाधिः, भगवत्प्राप्तिश्चावाप्यते। शरीरं व्यवहारस्य परमार्थस्य च मुखमस्ति साधनम्। एतद्वारैवाभीष्टस्य वस्तुं उपलब्धिसम्भवः जनकल्याणभावनया प्रयतमाना अपि मानवा अस्वस्थे शरीरे नात्मनो नापि समाजस्य देशस्य राष्ट्रस्य वा वास्तविकं कल्याणं कर्तुं प्रभवन्ति। अतो योगसाधनद्वारा शरीरारोग्यसम्पादनमत्यावश्यकमस्ति, समेषामात्मपरकल्याणकमिनां पुरुषाणामपि।

यथा भूमण्डलस्याधारो मेरुरस्ति, तथैव मानवशरीरस्याधारोऽस्ति मेरुदण्डः।. मेरुदण्डो हि पृष्ठमांससंलग्नस्त्रयस्त्रिंशदस्थिखण्डैः सम्बद्धः आभ्यन्तरेऽवकाशवान् वर्तते। अस्याधस्तनो भागोऽतितीक्ष्यः, सूक्ष्मश्चास्ति। तत्समीपवर्ती भागः कन्द इति नाम्ना

व्यवह्रियते। अत्रैव जगदाधारमहाशक्तेः प्रतिमूर्तिः कुण्डलिनी विराजते। मेरुदण्डाद्बहिर्वामभागे इडानाम्नी चन्द्रनाडी, दक्षिणभागे च पिङ्गलाख्  सूर्यनाडी सम्बद्धाऽस्ति। तयोर्मध्ये तेजोरूपा सुषुम्णानाडी तु मरुदण्डस्याभ्यन्तरे मूलाधारकन्दभागादारभ्य कपालस्थितब्रह्मरन्ध्रसहस्रारपर्यन्तं गच्छति। यथा कदलीस्तम्भे दलानि भवन्ति, तथैव सुषुम्णाया अभ्यन्तरे क्रमशो वज्रा-चित्रणी-ब्रह्मनाड्या ग्रथितानि षट् कमलानि सन्ति, यानि षट्चक्राण्युच्यन्ते। प्रत्येकं कमलं विभिन्नवर्णं विभिन्नसंख्यादकलं च विद्यते। इमानि षट्चक्राणि येषामवयवानां सम्मुखे मेरुदण्डस्याभ्यन्तरे विद्यन्ते, तेषां नामानि प्रसिद्धानि सन्ति। तथाहि गरुडपुराणे –

मूलाधारं स्वाधिष्ठानं मणिपूरकमेव च।

अनाहतं विशुद्धाख्यमाज्ञा षट्चक्रमुच्यते।। १५।७२

**(१) तत्र मूलाधारचक्रं यथा –**

अथाधारपद्मं सुषुम्णाख्यलग्नं ध्वजाधो गुदोर्ध्वं चतुःशोणपत्रम्।

अधोवक्त्रमुद्यत्सुवर्णाभवर्णैर्वकारादिसान्तैर्युतं वेदवर्णैः।।

मूलस्य शारीरकारणस्य विन्दोराश्रयत्वेनेदं चक्रं मूलाधार इत्युच्यते। मेरुदण्डस्याधस्तात् कन्दप्रदेशसम्बद्धपायूपस्थयोर्मध्ये विद्यमानमेतच्चक्र कमलं द्रुतसुवर्मवर्णं वर्तते। तत्र चत्वारो वर्णा विद्यन्ते। इदं चक्रं चतुष्कोणमस्ति, अस्य बीजं कामवीजं लं इति विद्यते। एतन्मध्ये स्वयम्भूलिङ्गमस्ति। यस्य चतुर्षु दिक्षु सार्द्धत्रयावर्तसर्पाकारा स्वमुखे पुच्छं दधानां सुप्ता कुण्डलिनीशक्तिर्विद्युल्लतावद्

नेरुदण्डस्याभ्यन्तरे ब्रह्मानाड्यां प्रविष्टा सती ऊर्ध्वं सहस्रारे गच्छति। यथा योक्तं हठयोगप्रदीपिकायाम् –

विद्युद्विलासवपुषः श्रियमावहन्तीं
यान्तीं स्ववासभवनाच्छिवराजधानीम्।
सौषुम्णमार्गकमलानि विकासयन्तीं
देवीं भजे हृदि परामृतसिक्तगात्राम्।

इदं चक्रं कामफलप्रदं कामरूपाख्यं पीठमप्युच्यते। अत्रोपासकानां सकलकामनासिद्धिर्भवति। एतत्समीपे किञ्चिदुर्ध्व भूलकन्दः पक्ष्यण्डस्वरूपऽस्ति, यतः सर्वा नाडय्यो निःसरन्ति। तदुक्तं ध्यानबिन्दूपनिषदि –

(२) **स्वाधिष्टानचक्रं यथा** –

सिन्दुर-पुर-रुचिररुणपद्ममन्यत्
सौषुम्ममध्यघटितं ध्वजमूलदेशे।
अङ्गच्छदैः परिवृतं तडिदाभवर्णै
र्वाद्यैः सबिन्दुलसितैश्च पुरन्दरान्तैः।।

उपस्थसमीपे सुषुम्णानाड्यां हीरकप्रभं सिन्दूरवर्णमिदं चक्रं विद्यते। अत्र षड दलानि सन्ति, तेषु क्रमशः सानुस्वाराणां ब-भ-म-य-र-लेति षण्णां वर्णानां स्थितिर्वर्तते अस्य बीजं वरुणबीजं वँ इति वर्तते। कमलकर्णिकायां राकिणोशक्तिरस्ति। अत्रोपासनेनाकर्षणशक्तिः सिध्यति।

(३) **मणिपूरकचक्रं यथा** –

तस्यर्ध्वे नाभिमूले दशदललसिते पूर्णमेघप्रकाशे
नीलाम्भोजप्रकाशैरुपहितडठरे डादिकान्तैः सचन्द्रैः।
ध्यायेद् वैश्वानरस्याऽरुणमिहिरसमं मण्डलं तत् त्रिकोणं
तद्बाह्ये स्वस्तिकाख्यैस्त्रिभिरभिलसितं तत्र वह्नेः स्ववीजम्।।

मेघसदृशं महाप्रभं विद्यदाभं च चक्रमिदं नाभिप्रदेशे मेरुदण्डस्याभ्यन्तरे सुषुम्णायां स्थितमस्ति। एतत् कमलं नीलवर्णं विद्यते। अत्र दशदलानि सन्ति, तेषु क्रमशः सानुस्वाराः ड-ढ-ण-त-थ-द-ध-न-प फेति दश वर्णाः सन्ति। अस्य बीजं वह्निबीजं रँ इति विद्यते। कर्णिकायां लाकिनीशक्तिर्वर्तते। एतस्य क्वचन नाभिचक्रमित्यपि नाम श्रूयते।

(४) **अनाहतचक्रं यथा –**

तस्योर्ध्वे हृदि पङ्कजं सुललितं बन्धुककान्त्युज्ज्वलं
काद्यैर्द्वादिसधर्णकैरुपहितं सिग्धररागान्वितैः।
नाम्नाऽनाहतसंज्ञकं सुरतरुं वाञ्छातिरिक्तप्रदं
वायोर्मण्डलमत्र धूमसदृशं षट्कोणशोभान्वितम्।।

उद्यदादित्यसन्निभस्यस्यास्य चक्रस्य स्थितिर्हृदयसन्निहितायां सुषुम्णायामस्ति। चक्रमिदमरुणवर्णैर्द्वादशभिर्दलर्युतं वर्तते। द्वादशसु दलेषु क्रमशः क-ख-ग-घ-ङ-च-छ-ज-झ-ञ-ट ठेति द्वादश वर्णाः सानुस्वाराः स्थिताः सन्तिः। अस्यबीजं वायुर्बीजं यँ इति वर्तते। कर्णिकायां काकिनीशक्तिः। एतच्चक्रं पूर्णगिर्याख्यं पीठमप्युच्यते। अत्रोपासनेन सर्वाणीन्द्रियाणि वश्यानि भवन्ति।

(५) **विशुद्धचक्रं यथा –**

विशुद्धाख्यं कण्ठे सरसिजममलं धूमधूमावभासं

स्वरैः सर्वैः शार्णैर्दलपरिलसितैर्दीपितं दीप्तबुद्धेः।

समास्ते पूर्णन्दुप्रथिततमनभोमम्डलं वृत्तरूपं

हिमच्छामानागोपरिलसिततनोः शुल्कवर्णाम्बरस्य।।

अस्य चक्रस्य स्थितिः कण्ठप्रेदेशे मूले विद्यते। एतत्कमलं धूम्रवर्णैः षौडशदलैर्युतमस्ति। तत्र षोडशसु दलेषु अ-आ-इ-ई-उ-ऊ-ऋ-ॠ-ऌ-ॡ– ए – ऐ – ओ – औ इत्येते षोडश स्वरा विराजन्ते। अस्य बीजं मभोबीजं हँ इत्यस्ति। कर्णिकायां शकिनीशक्तिरस्ति। अत्रोपासनेन सङ्कल्पसिद्धिर्भवति। अस्य ज्ञानाधारपीठमित्यपि नामान्तरं विद्यते। एतल्लक्षणं च –

विशुद्धिं तनुते यस्माज्जीवस्य हंहलोकनात्।

विशुद्धं पद्ममाख्यातमाकाशाख्यं महत्परम्।।

(६) आज्ञाचक्रं यथा –

आज्ञानामाम्बुजं तद्धिमकरसदृशं ध्यानधामप्रकाशं

हक्षाभ्यां वै कलाभ्यां परिलसितवपुर्नेत्रपत्रं सुशुभ्रम्।

तन्मध्ये हाकिनी सा शशिसमधवला वक्रषट्कं दधाता

विद्यां मुद्रां कपालं डमरुजपवटीं विभ्रती शुद्धचित्ता।।

चक्रमिदं भ्रुवोर्मध्ये मरुदण्डस्याभ्यन्तरे ब्रह्मनाड्यां स्थितमस्ति। कमलमेत् श्वेतवर्ण द्वितलञ्च विद्यते। तत्र तयोर्दलयोः स्वानुस्वारौ दक्षौ इत्येतौ द्वौ वर्णौ विद्यते कर्णिकायां हाकिनी शक्तिः। अस्य बीजं प्रणवोऽस्ति, एतदुड्यानाख्यं पीठमपि प्रोच्यते, अत्रोपासनेन वाक्सिद्धिर्भवति।

**सहस्रारचक्रम् –**

अद्यानां षण्णां चक्राणामुपरि सहस्रार नामकं चक्रं विद्यते, तत्स्वरूपमुक्तं कङ्कालमालिनीतन्त्रे –

सहस्रारं महापद्मं शुक्लवर्णमधोमुखम्।

लकारादिक्षकारान्तैः स्फूटद्वर्णैर्विराजितम्।।

गरुडपुराणे च –

तस्मादूर्ध्वगतं प्रभासितमिदं पद्मं सहस्रच्छदम्।

सत्यानन्दमयं सदाशिवमयं ज्योतिर्मयं शाश्वतम्।। १५।७४

तथा च सुषुम्णानाड्यर्ध्वभागे शुक्लवर्णमधोमुखं रक्तकिञ्जल्कशोभितमकारादिक्षकारान्तपञ्चाशद्वर्णैर्विंशात्यावर्तनेन सहस्रारसंख्याकैयुक्तं सहस्रारचक्रं विद्यते। एतत्कर्णिकायां हंसः ततः परमशिवरूपगुरुः, ततः सूर्यमण्डलं चन्द्रमण्डलम्, ततो ब्रह्मरन्ध्रम्, चन्द्रमण्डले विद्युदाकारत्रिकोणम्, तन्मध्ये मृणालसूत्रशतभागैकभागरूपसूक्ष्मा चन्द्रस्य षोडशी कला, तत्क्रोडे केशग्रसहस्रभागैकभागसूक्ष्मा निर्वाणकला, तदधोऽव्यक्तनादात्मकनिर्बोधिकाख्या वह्निः, तदुपरि निर्वाणकलाक्रोडे परं बिन्दुः शिवशक्त्यात्मकः। अस्य सूक्ष्मतेजाहंसरूपा निर्वाणशक्तिः। अस्यां हंसो जीवः। बिन्दोर्मध्ये शून्यं ब्रह्मपदं विद्यते। एतत्पदं केचित् परब्रह्माभिधानमिति वदन्ति, अन्य सुधियो वैष्णवपदमालपन्ति, केचित्तु मोक्षस्वरूपं हंसाख्यमिति कथयन्ति, एतेन ब्रह्मविष्णुशिवशक्तिस्वरूपं तत्पदमित्यायातम्। तदुक्तं ज्ञानार्णवे –

हकारे बिन्दुरूतेण ब्रह्माविद्धि पार्वति।

सकाले सर्गबिन्दुभ्यां हरिश्चाहं महेश्वरि।।

अविनाभावसम्बन्धाल्लोके हरिहराविति।

शैवा एतत्पद्मं शिवस्थानमिति लपन्ति, वैष्णवा विष्णोः स्थानमिति पदन्ति, सांख्याः प्रकृतिपुरुषस्थानं निगदन्ति, देवोचरणयुगलानन्दरसिकास्तु देव्याः पद ब्रुवते। एवं नानाप्रकारभावनयैको निरञ्जन एव निर्वाच्यौऽस्ति। अत एव ऋजुकुटिलनानापथजुषां नृणामेको गम्यः इति पुष्पदन्ताचार्योक्तं सङ्गच्छते। अत एव च परब्रह्मध्याने कुलार्णवे प्रोक्तम्–

बिन्दुरूपं परं ब्रह्म सहस्रदलसंस्थितम्।

निर्गुणो बिन्दुरूपश्च सिद्धिकारणमेव हि।।

केचिद्वदन्ति स ब्रह्मा कैश्चिद्विष्मुः प्कल्प्यते।

वैश्चिद्रुद्रो महापूर्ण एको देवो निरञ्जनः।।

अपि च –

बहुधा ह्यागमैर्भिन्ना पन्थानः सन्ति भूतले।

त्वप्येव निपतन्त्थोधा जाह्नवीया इवार्णवे।।

योगशिखोपनिषदि प्रथमाध्याये तत्तच्चक्राणां स्थानं स्वरूपञ्चैवं निर्दिष्टमस्ति –

गुदमेढ्रान्तरालस्थं मूलाधारं त्रिकणकम्।

स्वाधिष्ठानाह्वयं चक्रं लिङ्गमूले षडस्रकम्।।

नाभिदेशे स्थितं चक्रं दशारं मणिपूरकम्।

द्वादशारं महाचक्रं हृदये चाप्यनाहतम्।।

कण्ठकूपे विशुद्धाख्यं यच्चक्रं षोडशास्त्रकम्।

आज्ञानाम भ्रुवोर्मध्ये द्विदलं चक्रमुत्तमम्।।

तथा च पायूपस्थयोर्मध्ये वादिसान्तैश्चतुर्भिर्वर्णैरङ्कितं चतुर्दलं वह्निसमानवर्णमाधारचक्रमस्ति। उपस्थोपरि गुह्यदेशे वादिलान्तैः षड्भिरक्षरैश्चिह्नितं षड्दलं सूर्यसमानवर्णं स्वाधिष्ठानचक्रमस्ति। नाभिप्रदेशे डादिफान्तैर्दशभिरक्षरैरङ्गितं वशदलं रक्तवर्णं मणिपुरकचक्रमस्ति। हृदयदेशे कादिठान्दैर्द्वादशभिर्वर्णैरङ्कितं द्वादशदलं सुवर्णवर्णमनाहतचक्रमस्ति। कण्ठप्रदेशेऽकाराद् अःपर्यन्तं षोडशभिः स्वरैरङ्कितं षोडशदलं चन्द्रसमानवर्णं विशुद्धचक्रमस्ति। भ्रुवोमध्ये द्वाभ्यां हकारक्षकाराभ्यामङ्कितं द्विदलं रक्तवर्णमाज्ञाचक्रमस्ति। एतदुपरि दशमद्वारे सच्चिदानन्दज्योतिःस्वरूपं शक्तिवाहनसहितं सहस्त्रदलं शुद्धस्फटिकसमानवर्णं सहस्त्रचक्र ब्रह्मरन्ध्रेऽस्ति। एतेषां चक्राणां मध्ये प्रथमे चक्रे गणेशम्, द्वितीये ब्रह्माणम्, तृतीये विष्णुम्, चतुर्थे महादेवम्, पञ्चमे जीवात्मानम्, षष्ठे गुरुम्, सप्तमे ब्रह्मरन्ध्रे च व्यापकं ब्रह्म पुष्पचन्दन समर्पणपूर्वकमेकाग्रचेता साधको ध्यायेतू।

एषां चक्राणां तथा पादाङ्गष्ठ-मूलाधार-गुदाधार-मेढ-ओड्याण-नाभि-हृदय-कण्ठघण्टिका – तालु – जिह्वा – भ्रूमध्य – नासिका – नासिकामूल – ललाट – ब्रह्म – रणध्राणां षोडशानामाधाराणां ज्ञानं परमावश्यकम्।

| | | |
|---|---|---|
| १. पायूपस्थयोर्मध्ये | चतुर्दलं | मूलाधारचक्रम् |
| २. उपस्थोपरि गुह्यदेशे | षड्दलं | स्वाधिष्ठानचक्रम् |

| | | |
|---|---|---|
| ३. नाभिप्रदेशे | दशदलं | मणिपूरकचक्रम् |
| ४. हृदयप्रदेशे | द्वादशदलम् | अनाहतचक्रम् |
| ५. कण्ठप्रदेशे | षडशदलं | विशुद्धचक्रम् |
| ६. भ्रुवोर्मध्ये | द्विदलम् | आज्ञाचक्रम् |
| ७. शिरःकपाले | सहस्रदलं | सहस्रारचक्रं च विद्यते। |

यो योगी स्वकीये शरीरे एतानि चक्राणि सम्यक् न जातानि, स केवलं नाम्ना योगी वर्तते। तस्यासिद्धिर्नभवतितबुक्तं योगचूडामण्युपनिषदि –

षट्चक्रं षोडशाधारं त्रिलक्ष्यं व्योमपञ्चकम्।
स्वदेहे यो न जानाति तस्य सिद्धिः कथं भवेत्।।३।।

**पौराणिक षट्चक्रचिन्तन प्रसङ्गः**

गरुडपुराणे उ. खण्डे सुकृताचरणनिरूपणप्रसङ्गे गरुडेन सादरं पृष्टो भगवान् विष्णुः प्रोवाच – तार्क्ष्य। शरीरस्य पारमार्थिक स्वरूपं कथयामि, ययद् ब्रह्माण्डस्य गुणैः सम्पन्नं योगिभिश्च धार्यमस्ति। योगिनो यस्मिन् षट्चक्रचिन्तनं कुर्वन्ति, यथा वा ब्रह्मरन्ध्रे चिदानन्दस्वरूपं ध्यायन्ति, तत् सावधानतया शृणु – मानवशरीरस्य रूपद्वयं विद्यते, एकं व्यावहारिकं द्वितीयं च पारमार्थिकम्। तत्र पारमार्थिके शरीरे षट्चक्राणि सन्ति। मूलाधारः, स्वाधिष्ठानम्, मणिपूरकम्, आनाहतम्, विशुद्धम्, आज्ञाचक्रञ्च तत्र –

मूलाधारे लिङ्गदेशे नाभ्यां हृदि च कण्ठये।
भ्रुर्वोर्मध्ये ब्रह्मरन्ध्रे क्रमाच्चक्राणि चिन्तेत्।। (१५।७२)

इत्यनुसारं मूलाधारे मूलाधारम्, लिङ्गदेशे स्वाधिष्ठानचक्रम्, नाभौ मणिपूरकम्, हृदयेऽनाहतचक्रम्, कण्ठप्रदेशे विशुद्धं चक्रम्, भ्रुवोर्मध्ये आज्ञाचक्रम्, ब्रह्मरन्ध्रे सहस्रारं च विद्यते। मूलाधारचक्रं चतुर्दलम्, अग्निसमानवर्णव वादिसान्तवर्णाश्रयं विद्यते। स्वाधिष्ठानचक्रं षड्दकं सूर्यसमानवर्णं वादिलान्तवर्णाश्रयं विद्यते। मणिपूरकं दशदलं रक्ताभं डादिफान्तवर्णाश्रयं वर्तते। अनाहतचक्रं द्वादशपत्रकं सुवर्णवर्णं कादिठान्तवर्णाश्रयं विद्यते। विशुद्धचक्रं षोडशदलं चन्द्रवर्णं षोडशस्वरसंयुक्तं भवति। आज्ञाचक्रञ्च द्विदलं रक्तान्बुजाभं हंसेत्पक्षरयुग्मकं भवति। तस्मादूर्ध्वं देदीप्यमानं सहस्रदलं कमलं विद्यते, यत्सत्यानन्दमयं शिवमयं ज्योतिर्मयं शाश्वतं चास्ति। सप्तस्वेषु चक्रेषु क्रमशो गणेशस्य ब्रह्मणो विष्णोः शिवस्य जीवस्य गुरोर्व्यापकब्रह्मणश्च चिन्तनं कुर्यात्।

एकस्मिन्नहोरात्रे षड्शतोत्तरैकविंशतिसहस्राणि श्वासस्य गतिर्भवति। हंस हंसेति मन्त्रं जपम् जीवो हकारेण बहिर्याति, सकारेण पुनः प्रविशति। तत्र गणेशाय षड्शतानि, ब्रह्मणे षड्सहस्रामि, विष्णवे षड्सहस्राणि, जीवाय सहस्रं गुरवे सहस्रं चिदात्मने च सहस्रमिति जपसंख्यां निवेदयेत्। सत्संप्रदायवेत्तारोऽरुणादयो मुनोश्वराश्चक्रस्थितब्रह्मकिरणेषु देवान् चिन्तयन्ति। शुक्रादयो मुनयोऽपि शिष्यानुपदिशन्ति। अतः साधक एतां महतां प्रवृत्तिं ध्यात्वा सततं ब्रह्म धायेत्। एकाग्रचेता योगाभ्यासो सर्वेषु चक्रेषु मानसीं पूजां विधाय ततो गुरुपदेशेनाजपां गायत्रीं जपेत्। नित्यं प्रभाते बद्धासनो योगो षड्चक्रं चिन्तयन्नजपाक्रमस्य मननं कुर्यात्। अजपानाम्नी गायत्री मुनीनां मोक्षदायिनी अस्ति, अस्याः सङ्कल्पमात्रेण साधकः सर्वेभ्यः पापेभ्यो विमुच्यते। अधोमुखे सहस्रदलपङ्कजे हंससमारूढं वराभयकराम्बुजं श्रीगुरुं ध्यायेत्। तच्चरणामृतधारया स्वदेहं क्षालयेत्। ततः

षट्चक्रसंचारिणी सार्द्धत्रिवलयाम् आरोहावरोहक्रमेण स्थितां कुण्डलिनीं ध्यायेत्। ततो ब्रह्मरन्ध्राद्बहिर्गतं सुषुम्णाख्यं धाम ध्यायेत्। तेन सुषुम्णामार्गेण गता जीवा विष्णोः परमं पदं प्राप्नुवन्ति। ततो ब्राह्मे मुहूर्ते स्वयंज्योतिः सनातनं सच्चिदानन्दस्वरूपं परं ब्रह्म ध्यायेत्, यदहं सर्वदा चिन्तयामि। स्वप्रयत्नमपहाय गुरुपदेशेन विना पतनं सम्भवति। एवमन्तर्यगं विधाय बहिर्योगं समाचरेत्। स्नानध्यानादिकं कृत्वा हरिहरार्चनं कुर्यात्। देहाभिमानिनां पुंसां यौगिकी अन्तर्वृत्तिर्न जायते। अतः भगवद्भक्तिस्तेषां सरलतापूर्वकं मोक्षप्रदायिनी अस्ति।

देवीभागवतस्य सप्तमस्कन्धे पञ्चत्रिंशदध्याये कुण्डलिनीबहिर्भाहे सुवर्णवर्णं चतुर्दलं कमलं कल्पयित्वा तस्य चतुर्षु दलेर्षु दलेषु व-श-ष-स इति चतुर वर्णान् चिन्तयेत्। तदूर्ध्वं हीरकप्रभमनलप्रख्यं बादिलान्तेः षड्भिर्वर्णैः समन्वितं षड्दलं स्वाधिष्ठानचक्रं विद्यते। चतुर्दलं पद्मं षट्कोणकमलस्य मूलमाधारमस्तीत्यतो मूलाधार उच्यते। द्वितीये स्वाधिष्ठानचक्रे स्वशब्दस्यार्थः परं लिङ्गमस्ति, तस्याधिष्ठानत्वात् स्वाधिष्ठानमुच्यते। तदूर्ध्वं नाभिप्रदेशे विद्युदाभ्यं तेजोमयं महाप्रभं दशदशं मणिपूरकचक्रमस्ति। मणिवन्नीलप्रभावत्वात् पद्ममिदं मणिपूरकचक्रमुच्यते। अस्य दशसु दलेषु डादिफान्तान् दशवर्णान् चिन्तयेत्। पद्ममिदं विष्णुनाऽधिष्ठितमतोऽस्य ध्यानेन भगवतो विष्णोः साक्षात्कारो जायते। तदूर्ध्वमुद्यदादित्यसन्निभं द्वादशदलमनाहतचक्रमस्ति। तस्य द्वादशदलेषु कादिठान्तान् द्वादशवर्णान् चिन्तयेत्। तन्मध्ये दशसहस्त्रसूर्यसमप्रभं वाणलिङ्गं विद्यते। तत्र ताडनमन्तरापि ततः शब्दब्रह्मण अत्पत्तिर्भवतीति हेतोर्योगवेत्तारो महर्षय एतदनाहनचक्रं कथयन्ति। एतत्पद्ममानन्दसदनमास्त। तत्र परमः पुरष ईशानो विराजये। एतदूर्ध्वं

षोडशदलं धूम्रवर्णं महाप्रभं विशुद्धाख्यं पद्मं विद्यते। यस्य षोडशदलेषु षोडशस्वरास्तिष्ठन्ति। अत्र हंसस्वरूपस्य परमात्मनो दर्शनाद् जीवो विशुद्धमात्मस्वरूपं प्राप्नोति। अत इदं विशुद्धं पद्ममुच्यते। महदाश्चर्यकरमिदं पद्ममाकाशमिति नाम्नापि व्यवह्रियते। तदूर्ध्वं भ्रूर्मध्ये आत्मनोऽधिष्ठानमाज्ञाचक्रं विद्यते। अतीव सुन्दरमिदं पद्मं हक्षसंयुक्तं द्विदलमस्ति। अत्र चित्तस्य स्थैर्यात् सर्वेषां पदार्थानां साक्षात्कारो भवति। त्रिषु कालेषु त्वयेदं कर्तव्यमित्सेव परमेश्वरस्याज्ञायाः संक्रमणादिदमाज्ञाचक्रमुच्यते। अत्र सहस्रदलानि भवन्ति।

तस्मात् शिवशक्तिसामरस्यात्मकस्य मोक्षस्योपलब्धये योगानुष्ठानस्य सिद्ध्यर्थं पुराणानानुसारमपि षट्चक्रचिन्तनमत्यावश्यकम्।

**योगसिध्यर्थं ब्रह्मचर्यस्य पालनमावश्यकम्**

यस्याः कस्या अपि यौगिकसाधनपद्धतेः सफलतायै ब्रह्मचर्यस्य पालनमस्त्यावश्यकम्। वैदिके तान्त्रिके बौद्धे जैने च धर्मे तत्तद्देशीयविभिन्नसम्प्रदायेषु चास्यात्यावश्यकत्वमङ्गीकृतमस्ति। ब्रह्मचर्यपालनं विना आध्यात्मिकं शारीरिकं मानसिकं वा बलं संग्रहीतुं न शक्यते। बलसञ्चयमन्तरा चात्मन उपलब्धिर्गगनकुसुमायिता, कमटपीटायिता, शशश्रृङ्गायिता, वन्ध्यापुत्रायिता च भवति। अत एवेक्तम् – नायमात्मा बलहीनेन लभ्यः। हठयोगिनां सिद्धान्तानुसारं बिन्दोः संसरणात् संसारो बिन्दोः स्थैर्ये च मोक्षः। बिन्दौस्थिरे प्राणोऽपि स्थिरायते, प्राणे च सुस्थिरे बिन्दुर्न कदाप्यस्थिरस्तिष्ठति। एवमेवबिन्दुना सह मनसो मनसा च प्राणस्यास्ति सम्बन्धः। अत एवोक्तं योगतत्त्वोपनिषदि–

वर्जयित्वा स्त्रियाः सङ्गं कुर्यादभ्यासमादरात्।

योगिनोऽङ्गे सुगन्धिश्च जायते विन्दुधारणात्।। (४२)

वैदक्यां तान्त्रिक्यां च साधनापद्धतौ बिन्दुशोधनस्यानेके उपायाः प्रदर्शिताः सन्ति। महायानसाम्प्रदायिकेषु बौद्धेष्वपि वज्रयान मन्त्रयान सहजयानसम्प्रदायेप्येतदर्थं सूक्ष्मा उपाया उपदिष्टाः सन्ति। हठयोगे विशेषाधिकारप्राप्तये बिन्दोः स्थैर्यसाधकानामुपायानामवलम्बनमन्तरा न कार्यं सिध्यति। बिन्दौ शुद्धे सत्येव स्वभावतः स्थैर्यं जायते। स्थिरो बिन्दुः कयाचन यौगिकप्रक्रियमाविक्षुब्धमर्ध्वं सञ्चरन् स्थूलभावं परित्यज्य क्रमशः सूक्ष्म सूक्ष्मतर सूक्ष्मतमावस्था अवाप्नुवन्नन्ते सहस्रदलकमलकर्णिकायां स्थितेन महाबिन्दुना सह सम्मिलति। अयमेव चिच्चन्द्रमसः षोडशीकलारूपोऽमृतबिन्दुः। ब्रह्मचर्यसाधनया बिन्दुं विषयजगद्भ्यो व्यावृत्य तं च याययित्वा ब्रह्ममार्गे नियोजनमेव संसारान्मुक्तिप्राप्तेरेकमात्रमुपायः।

मत्स्यपुराणेऽप्युक्तमस्ति यत्तपोयोगधैर्ययशः सिद्धयो ब्रह्मचर्यमन्तरं न सफलीभूता भवन्ति। अतो योगसिद्धये ब्रह्मचर्यमत्यन्तमावश्यकमस्ति –

ब्रह्मचर्ये स्थितं धैर्यं ब्रह्मचर्ये स्थितं तपः।

ये स्थिता ब्रह्मचर्येषु ब्रह्मणा दिवि संस्थिताः।।

नास्ति योगं विना सिद्धिर्नवा सिद्धिं विना यशः।

नास्ति लोके यशो मूलं ब्रह्मचर्यात् हरं तपः।। (१७४।३८।३९)

ब्रह्मचर्यपालनस्य समेषां पुंसामावश्यकत्वेऽपि योगपरायणस्य कृते तु ब्रह्मचर्यव्रतविधानमनिवार्यतयोपदिष्टमस्ति। जीवात्मपरमात्मनोः संयोगस्य सर्वोत्कृष्टं

साधनं योग एवास्ति। श्रूयते व्याससूनुः श्रीशुकदेवमुनिर्वृक्षशाखायां निलीय भगवतः सदाशिवस्य मुखाम्भोजान्निर्दतं योगोपदेशं श्रुत्वा पक्षियोनितो विमुक्तो भूत्वा जन्मान्तरेऽमलात्मा महान् योगी बभूव।

भारतीय तंत्र मंत्र पूजापद्धति भक्त्यादयो योगमूलका एव सन्ति। योगाभ्यासद्वारा वित्तस्यैकाग्रतया ज्ञानमुत्पद्यते, ततो मुक्तिर्जायते। वास्तविकं ज्ञानं योगाभ्यासं विना नोत्पद्यते। अत एव ज्ञानसङ्कलनीतंत्रे लिखितमस्ति यद् वेदचतुष्ट्यं सर्वाणि च शास्त्राणि मथित्वा सारभागं नवनीतं योगिभिः पीतम्, परन्त्वसारभागं तक्रं तु पण्डिताः पिवन्ति –

मथित्वा चतुरो वेदान् सर्वशास्त्राणि चैव हि।

सारस्तु योगिभिः पीतः तक्रमश्नन्ति पण्डिताः।।(५१)

अतएवयोगीश्वर भगवान् महादेवः पार्वतीं प्रति स्वमुखेनोक्तवान् –

ज्ञाननिष्टो विरक्तोऽपि धर्मज्ञौऽपि जीतेन्द्रियः।

विना योगेन देवोऽपि न मुक्तिं लभते प्रिये।। (३१)

**अजपाजपविधिः**

सुषुम्णा हि गुदनिकटे मेरूदण्डाभ्यन्तरे मस्तिष्कपर्यन्तमूर्ध्वं गच्छति। इयं सर्वप्रधाना सत्त्वमयी प्रकाशशीलाऽद्भूतशक्तिशालिनी अस्ति। इयमेव सूक्ष्मशरीर प्राणशक्तीनां स्थानम्। अत्र वहूनां सूक्ष्मशक्तिनां विद्यते यत्रान्याः सूक्ष्मानाड्यो मिलन्ति। आसां शक्तिनां केन्द्रं पद्मं, कमलं चक्रं च प्रोच्यते। सप्तमुख्यानि चक्राणि तेष्वपि महत्त्वपूर्णानि सन्ति – मणिपुरकमनाहताज्ञासहस्त्रचक्राणि।

मानवशरीराद् दिवारात्रं षड्शतोत्तरैकविंशतिसहस्राणि श्वासोच्छावासा निःसरन्ति। अतोऽयं जीवः सततं प्रतिश्वासोच्छ्वासं हंसमिति मन्त्रं जपति। अत इयमेवाजपानाम्नी गायत्र प्रोच्यते। यतोऽन्यमन्त्रा वाणीव्यापारेण जप्यन्ते, किन्त्वस्याः स्वत एव जपो जायते। अजपा गायत्रीं योगिनां मोक्षदायिन्यस्ति, अस्याः सङ्कल्पमात्रेणैव साधकः सर्वपापविनिर्मुक्तो भवति, तर्हि किमु वक्तव्यं विधिपूर्वकेनानुष्ठानेन –

प्रकारेण बहिर्याति सकारेण विशेतु पुनः।
हंस-हंसेत्यमु मन्त्रं जीवो जपति सर्वदा।।
षट् शतानि दिवारात्रौ सहस्राण्येकविंशतिः।
एतत्संख्यान्वितं मन्त्रं जीवो जपति सर्वदा।।
अजपानाम गायत्री योगिनां मोक्षदा सदा।
यस्याः सङ्कल्पमात्रेण सर्वपापैः प्रमुच्यते।। (यो. सू. व. ३१।३३)

**अस्याः सङ्कल्पविधिस्तु –**

प्रातःकाले उत्थाय साधकः – अद्य प्रातःकालमारभ्य भाविप्रातःकालपर्यन्तं निःश्वासोच्छ्वासात्मकषट्शताधिकैकविंशतिसहस्रसंख्याकमजपागायत्रीजपमहं करिष्ये इति सङ्कल्पयेत्।

ततो द्वितीयेदिने – अद्येह पूर्वेद्युरहोरात्रचरित्तनासापुटनिःसृतोछ्वासनिच्छ्वासात्मक-षड्शताधिकैकर्विंशतिसहस्रसंख्याकाजपागायत्रीजपं मूलाधारस्वादिष्ठान-मणिपूरक-अनाहत- विशुद्ध-आज्ञाचक्र-सहस्रारस्थितेभ्यो गणपति-ब्रह्म-विष्णु-रुद्र-जीव-गुरु-परमात्मभ्यः ऋद्धि-सिद्धि-सरस्वती-लक्ष्मी-गौरी-प्राणशक्ति-

ज्ञानशक्ति-चिच्छक्तिसमेतेभ्यो यथासंख्यं षड्शतं षड्सहस्त्रं षड्सहस्त्रं सहस्त्रमेकं सहस्त्रमेकं सहस्त्रमेकमजपागायत्रीजपं प्रत्येकं निवेदयामि इत्युक्त्वा जपं मूलाधारचक्रस्थाय ऋद्धिसिद्धिसहितगणेशाय षड्शतं स्वाधिष्ठानचक्रस्थाय सरस्वतीसहितब्रह्मणे षड्सहस्त्रम्, मणिपूरकचक्रस्थाय लक्ष्मीसहितविष्णवे षड्सहस्त्रं, अनाहतचक्रस्थाय गौरीसहितशिवाय षड्सहस्त्रं, विशुद्धचक्रस्थाय जीवात्मे सहस्त्रकम्, आज्ञाचक्रस्थाय विद्यसहितगुरवे सहस्त्रैकम्, सहस्यारस्थाय स्वशक्तिसहितपरमात्मने एकसहस्त्रसंख्या च जपं निवेद्य पुनरद्य प्रातःकालमारभ्य द्वितीयप्रातःकालपर्यन्तं नाससापुटनिः सृतोच्छ्वासनिः श्वासात्मकं षड्शयाधिकैकविंशतिसंख्याकमजपागायत्री-जपमहोरात्रेण करिष्य इति जपसङ्कल्पं कृत्वा साधकः स्वं कृत्यं समाचरेत्।

**धर्ममीमांसायां पुराणानां प्रामाण्यम्**

हिन्दुजातेः सुदृढो विश्वासोऽस्ति यद् धर्माधर्मयर्निर्णये वेद एव सर्वाधिको मान्यः प्राणाणिकश्च ग्रन्थोऽस्ति, यतो हि वेदः साक्षादीश्वरस्यानादिर्वाणी ज्ञानोपदेशस्यागार ऐहिलौकिकीं पारलौकिकीं च समस्यां समाधातुमाधारोऽस्ति। एत एव देशोयैर्विदेशीयैश्च विद्वद्भिरेकस्वरेण वेदाय मान्यता प्रदत्ताऽस्ति। ये हि सिद्धान्ता वेदेषु निर्दिष्टा विद्यन्ते ते एव स्मृतिद्वारा समर्थिताः सन्ति तथा तेषामेव गुणगानमुदाहरण प्रत्युदाहरणद्वारा पुराणेषु कृतं विद्यते। अपि च सर्वशास्त्रार्थनिर्णये तिस्रो विद्याः प्रमुखाः प्रोक्ताः सन्ति।

वेदानां दुरूहार्थस्य ज्ञानं साधारणबुद्धिगम्यं नास्ति। अल्पत्रानां जीवानां तदसम्भवं मत्वा मन्वादिभिः महर्,भिः समाधिद्वारा प्राप्तया निर्मलबुध्या वेदार्थान् स्मारं स्मारं तत्तत्स्मृतीनां निर्माणं कृतम्। ततो भगवान् व्यासः वेदप्रतिपादितानि स्मृत्युनुमोदितानि च

विविधानि धार्मिकतत्त्वानि सरलतया अवबोधयितुं प्राञ्जलया भाषया पुराणानि रचयांञ्चकार। अतो धर्मनिर्णये एषां त्रयाणामेव मुख्यता विद्यते। एषु त्रिषु सर्वोच्चस्थानं वेदस्यैवास्ति, ततः स्मृतेः, तदनन्तरं पुराणानां प्रामुख्यमस्ति। व्यासस्मृतौ स्पष्टमुल्लखितं वर्तते यद् यत्र च त्रिषु श्रुति-स्मृति-पुराणेषु परस्परं विरोध उपलभ्यते तत्र श्रुतेर्वचनमेव प्रामाण्यं भन्तव्यम्, यदि च स्मृतिपुरामयोर्विरुद्धं किञ्चिद्वचनं प्राप्तेत तदा तत्र स्मृतिरेव प्रमाणरूपेण ग्राह्या भवति।

धर्मनिर्णयसम्बन्धे पूर्वमीमांसाप्रणेत्रा महर्षिणा जैमिनिना स्पष्टमुल्लिखितमस्ति। त् स्मृतौ पुराणेषु च यदि किञ्चिद्वचनं वेदविरुद्धं प्रतीयते तर्हि तदुपेक्षणीयमस्ति, किन्तु वेदे स्मृतौ पुराणे चानुकूलं वचनं यदि मिलेत् तर्हि तद्वचनमनुमितश्रुतिमूलकं मत्वा प्रमाणकोटौसमानेयम् – विरोध त्वनपेक्षं स्यादसति ह्यनुमाने (पू. मी. सू. १।३।३)।

स्कन्दपुराणे लिखितमस्ति यत् – श्रुति-स्मृति-पुराणानि इमानि त्रीणि विदुषां नेत्राणि सन्ति। य एभिस्त्रिभिर्विचारयति स माहेश्वरांशो मन्यते। देवीभागवतेऽयं प्रसंगः समायाति यदैकदा लोककल्याणभावनया देवर्षिर्नारदोनारायणं पप्रच्छ – भगवान् शास्त्राणां बहुत्वाद् धर्मनिय्मये तिं प्रमाणम् मन्तव्यम् ? तदाकर्ण्य नारायणेन स्पष्टमुक्तम् – देवर्षे, धर्मनिर्णये श्रुति-स्मृति नेत्रे मन्तव्ये तथा पुराणं हृदयमवगन्तव्यम्। अत एषु त्रिषु यत् किमप्युक्तं विद्यते तत् धर्मोऽवन्तव्यः।

वात्स्यायनेन मुनीना न्यायदर्शनभाष्ये लिखितमस्ति यत् श्रुति पुराणानि विषयव्यवस्थानुसारमिन्द्रियवत् स्वस्वविषयेषु निरपेक्षाणि प्रमाणानि सन्ति। वेदस्य विषयो भिन्नोऽस्ति। इतिहासपुराणस्य विषयः पृथगस्ति। तथा धर्मशास्त्रस्य भिन्नो विषयोऽस्ति –

लोकव्यवहारव्यवस्थापनम् – तथाहि समारोपणादात्मन्यप्रतिषेधः (४।१।६२) इति सूत्रभाष्ये – यथाविषयं प्रामाण्यमिद्रियवत्। अन्यो मन्त्रब्राह्मणस्य, विषयोऽन्यश्चेतिहासपुराणशास्त्राणामिति। यज्ञो मन्त्रब्राह्मणस्य, लोकवृत्तमितिहासपुराणस्य लोकव्यवस्थापनं वा धर्मशास्त्रस्य विषयः। अस्यमभिप्रायः – यथेन्द्रियाणि स्वस्वविषयग्रहणे स्वतन्त्राणि सन्ति प्रमाणानि। एकस्मिन्द्रियमन्यस्येन्द्रियस्य विषयं न गृह्णाति। दर्शने नेत्रमेव स्वतन्त्रं प्रमामस्ति। श्रवणे कर्णौ एव प्रमाणे स्तः गन्धग्रहणे नासिकैव प्रमाणम्। स्पर्शेत्वगेव प्रमाणम् था रसास्वादने जिह्वैव प्रमाणमस्ति तथैव वेदस्मृतिपुराणानि अपि स्वस्वविषयग्रहण एव स्वतन्त्राणि सन्ति प्रमाणानि। सर्ग-प्रतिसर्ग-मन्वन्तर-वंश-वंशनुचरितादीनां क्रमबद्धवर्णनं तथा लोकवृत्तस्य संग्रहश्च पुराणानामेवास्ति विषयः। अत्रोऽत्र विषये पुराणानामेव प्रामाण्यं न्यायसङ्गतं विद्यते।

अपि च लोकव्यवहारार्थमपि पुराणानामनुशीलनमत्यावश्यकमस्ति। अद्यत्वे न्यायालयेषु नियमाधारेण अभियुक्ता अपराधिनो निर्दोषा वा साध्यन्ते। कस्मिन्नापि अभियोगे प्रायः त्रयो भागा भवन्ति –१. अभियोगोपस्थितिः, २. वादप्रतिवादौ, ३. उदाहरण-प्रत्युदाहरणदानञ्च। वर्वप्रथमं वाक्कीलो न्यायालयो स्वाभियोगमुपस्थापयति। ततस्तस्य वास्तविकतासिद्धये वादम् प्रतिवादं च कुरुते तदनन्तरं पुरातनं निर्णयं दृष्टान्ततया समुपस्थाप्य सिद्धान्तं निर्णेतुं न्यायाधीशं संकेतयति। तथा त्रयाणामप्येषामेकस्यन्यूनतायां स्वपक्षसमर्थनं न सम्भवति तथैव धर्माधर्मनिर्णये वेदस्मृतिविधिनिषेधात्मकानि वाक्यानि अभियोगोपस्थापनमस्ति, तस्य त्यागसंहयोर्विवेचकं दर्शनशास्त्रं बाद-प्रतिबादौ स्तः, तथा

वेदविहितविधेरनुकूलाचरणकर्तृणां राम-नल-युधिष्ठिरादीनां समादरदृष्टान्तः तथा वेदप्रतिपादितनिषेधप्रतिकुलर्तृणां रावणदुर्योधनादीनामनादरदृष्टान्त उदाहरणप्रत्युदाहरणे स्तः। अतः उदाहरण प्रत्युदाहरणादिद्वारा आत्मोन्नतये तथा सर्वविधपतनान्निवृत्तये पुराणेतिहासादीनामनुशीलनं नितान्तमुपकारि हितप्रदं च विद्यते।

**विनियोगज्ञानाय पुराणज्ञानस्यानिवार्यता**

वैदिकवाङ्मयस्य कर्मकाण्डविधीनां सफलातायै ऋषि-छन्दो-देवता-विनियोगानां ज्ञानं नितान्तमावश्यकं विद्यते। एतानज्ञात्वा यो यजति अधीते जपति, जुहोति च, न तस्यानुष्ठानं सफलं भवति, न वा पूर्णं फलं जायते। अतएतेषां ज्ञानमत्यावश्यकं प्रोक्तमस्ति हेमाद्रौ दानखण्डे –

आर्षं छन्दश्च दैवत्यं विनियोगस्तथैव च।
वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः।।
अविदित्वा तु यः कुर्याद् यजनाध्यापनं जपम्।
होममन्तर्जलानीति तस्य चाल्पं फलं भवेत्।।

**जीवस्य क्रमिकविकासविवेचनम्**

जीवस्य क्रमिकविकासे विवेचनीये तत्कारणमपि समालोचनीयतामर्हतोत्यमिप्रेत्य तत्सम्बधेऽपि किञ्चिदनुसन्धीयते। शक्ति शक्तिमतोरभेदनियमात् ब्रह्मणि तदीयशक्तौ चाभेदो लक्ष्यते। अतएव ब्रह्मणि तदीयशक्तिरूपिण्यामूलप्रकृतौ च शास्त्रेषु अभिन्नता प्रतिपादिताऽस्ति। यथा गानपरायणस्य पंसो गानशक्तिः गानमकुर्वन्ति तस्मिन् अव्यक्तदशायां तिष्ठति। तदानीं न कश्चिदपि अवधारयितुमर्हति यदयं गायकोऽस्ति, किन्तु

गानसमये सर्वोऽपि विजानाति यदस्मिन् गानशक्तिर्विद्यते, तथैव ब्रह्मशक्तिः प्रकृतिर्यदा ब्रह्मण्यव्यक्तावस्थायां तिष्ठति तदा जागतिकप्रपञ्चानां विलयः, किन्तु यदा सा सृष्टिकाले व्यक्तावस्थामापद्यते, तदा सूक्ष्मस्थूलभावपरिपूर्णं सृष्टिवैचित्र्यमभिलक्ष्यते।

यद्वा यथा गानपरायणं पुमांसमदृष्ट्वापि श्रोता तद्गानेन विमुग्धो भवति तथैव ब्रह्मस्वरूपानभिज्ञोऽपि जीवो महामायायां ब्रह्मशक्तौ ग्रस्तो मोमुह्यमानो दरीदृश्यते। अत एव शक्तिमता पुरुषेण सह शक्तिस्वरूपिण्याः प्रकृतेः नाणीयानपि अस्ति भेदः, अग्नौ दाहिकाशक्तिरिव मगवति शक्तिस्वरूपिणी प्रकृतिर्निहिता तिष्ठति। सर्गादौ समष्टिजीवप्रारब्धानुसारेण परमेश्वरे यदा जगतः सिसृक्षा समुत्पद्यते तदा शक्तेरेतस्या विकासो जायते। तथा चोक्तं कालिकापुराणे –

शक्तिशक्तिमतोर्भेदं वदन्ति परमार्थतः।
अभेदं चानुपश्यन्ति योगिनस्तत्त्वचिन्तका।।
योगेनात्मा सृष्टिविधौ द्विधारूपो बभूव ह।
पुमांश्च दक्षिणाद्धांशो वामार्दा प्रकृतिः स्मृताः।।
सा च ब्रह्मश्वरूपा च नित्या सा च सनातनी।
यथात्मा च तथा शक्तिर्यथाग्नौ दाहिका स्थिता।। (७।२.४.५)

देवीभागवते तु –

स्वयं पुमांश्च प्रकृतिस्तावभिन्नौ परस्परम्।
यथावह्नेस्तस्य शक्तिर्न भिन्नाऽस्त्येव कुत्रचित्।।
सेयं शक्तिर्महामाया सच्चिदानन्दरूपिणी।

रूपं विमर्त्यरूपा च भक्तानुग्रहहेतवे।। (९।३८।२७-२९)

श्रीमद्भागवते च प्रोक्तमस्ति यत् सृष्टेः पूर्वं दृश्यमानमिदं समस्तं प्रपञ्चं यदा जले निमग्नमासीत् तदैकमात्रं श्रीमन्नारायणः शेषशय्यायां शयानो योगनिद्रामाश्रित्य निर्मीलितनयनः आनन्दमनुभवति स्म। यथानलः स्वां दाहिकां शक्तिं स्वस्मिन्तन्तर्भाव्य काष्ठे व्यापकरूपेणावतिष्ठते तथैव नारायणोऽपि निखिलजीवानां सूक्ष्मशरीराणि स्वस्मिन्यन्तर्भाव्य जले शयानः तिष्ठति, सृष्टिकाले च पुनः स्वां कालशक्तिं प्रेरयति –

उदाप्लुतं विश्वमिदं तदासीद्

यन्निद्रया मीलितदङन्ममीलयत्।

अहीन्द्रतल्पेऽधिशयान एकः

कृतक्षणः स्वात्मरतौ निरीहः।।

सोऽन्तः शरीरेऽर्पितसूक्ष्मः

कालात्मिका शक्तिमुदीरयाणः।

उवास तस्मिन् सलिले पदे स्वे

यथाऽनलो दारुणि रुद्धवीर्यः।। (श्री. भा. –३।८।१०-११)

तस्या एव ईश्वरशक्तेः शास्त्रेषु विभिन्नानि नमानि श्रुयन्ते। ते ते आचार्याः स्वस्वकृतिषु तामीश्वरशक्ति विभिन्नैर्नामभिर्व्यवहरन्ति, यया स दृश्यमानमिदं समस्तं विश्वं विरचयति। तत्र केचनाचार्यास्तां तप इति ब्रुवते, केचित्तम इति कथयन्ति, अन्ये जड इत्यमिदधति, इतरे अज्ञानमिति ज्ञापयन्ति, अपरे प्रकृतिमिति प्रख्यापयन्ति, एके

प्रधानमिति निगदन्ति, भिन्ना अजामिति बोधयन्ति, शाक्ताः शक्तिमिति सम्बोधयन्ति, अद्वैता अविद्यामिति उच्चारयन्ति, पौराणिकाश्च मायामिति व्यपदिशन्ति –

केचित्तां तप इत्याहुस्तमः केचिज्जडं परे।

ज्ञानं माया प्रधानञ्च प्रकृतिं शक्तिमप्यजाम्।।

(देवीपुराणे – ५।२७)

अपि च –

सावित्र्येत्यमिधीयते श्रुतिपथे

शक्तिः सदाद्या परा।

सर्वज्ञा भवबन्ध-छिति-निपुणा

सर्वाश्रये संस्थिता।।

(आ. वि. ५१)

कालिकापुराणे च –

या वा एतस्य संस्त्रष्टुः शक्तिः सदसदात्मिका।

माया नाम महाभागा ययेदं निर्ममे विभूः।।

(९।२१)

देवीभागवतेऽपि –

मूलप्रकृतिरेवैषा सदा पुरुषसङ्गता।

ब्रह्माण्डं दर्शयत्येषा कृत्वा वै परमात्मने।।

(दे. भा. –३।६।६९)

यथा दृश्या अनुभवगम्याश्च सर्वे पदार्थाः त्रिप्रकारा भवन्ति तथैव विश्वसृष्टिरपीयम् आध्यात्मिकी, आधिदैविकी, आधिभौतिकी चेति भेदात् त्रिधा विभक्ता परिदृश्यते –

वस्तुमात्रं तु यद् लक्ष्यं संसारे त्रिगुणं हि तत्।
दृश्यं च निर्गुणं लोके न भूतं न भविष्यति।।

(श्री. भा. ६।२६।१०)

कारणे ब्रह्मणि भावत्रयसत्त्वात् कार्यब्रह्मस्वरूपसर्गेऽप्यत्र सर्वत्रैव त्रयोभावा भवन्ति। अतः परमपुरुषोऽसौ आध्यात्मिकाधिदैविकाधिभौतिकं त्रिविधरूपेण साधकानां दृष्टिगोचरतामापद्यते। तस्य ब्रह्मणः आध्यात्मिकं रूपं मायातीतं निर्गुणपरब्रह्मपदवाच्यम्, आधिवैदिकं सगुणपरेश्वरनाम्ना अभिधीयते, आधिभौतिकञ्च अनाद्यनन्तविराट्-पुरुषसंज्ञया स्वीकृतमास्ते। अतः त्रिगुणात्मिकां स्वां प्रकृतिं मायामधिष्ठाय स्ववीर्यं त्रिधा विभज्य त्रिविधां सृष्टिमसौ विधत्ते –

योऽध्यात्मिकोऽयं पुरुषः सोऽसावेवाधिदैवकः।
यस्तत्रोभयविच्छेद्रः पुरुषो ह्यधिभौतिकः।।
एकमेकतराभावे यदा नोपलभामहे।
त्रितयं तत्र योवेद स आत्मा स्वाश्रयाश्रयः।।
अधिदैवतमध्यात्ममधिभूतमिति प्रभुः।
अथैकं पौरुषं वीर्यं त्रिधमित्यथ तच्छृणु।।

(त. वि. ४२.४३,४४)

**श्रीमद्भागवतेऽपि –**

एष ह्यशेषसत्त्वानामात्मांशः परमात्मात्मनः।

अद्योऽवतारो यत्राऽसौ भूतग्रामो विभाव्यते।।

साध्यात्मनसाधिदैवश्च साधिभूत इति त्रिधा।

(श्री. भा. ३।६।८९)

**कुर्मपुराणस्य पूर्वार्द्धे तु –**

इयं सा परमा शक्तिर्मन्ययी ब्रह्मरूपिणी।

माया मय प्रियानन्ता ययेदं धार्यते जगत्।।

अनयेव जगत् सर्वं सदेवासुरमानृषम्।

मोययामि द्विजश्रेष्ठा ग्रसामि विसृजामि च।।

सैषां सर्वजगत्सूतिः प्रकृतिस्त्रिगुणात्मिका।

प्रागेव मत्तः सद्धजाता श्रीकल्पे पद्मवासिनी।।

(कु.पु.पू –१।३४.६५,३८)

प्रकृतेः त्रैविध्यात्तत् सम्बन्धेनैव भगवतः त्रिविधमिदं स्वरूपं समुपवर्ण्यते, न वास्तविकम्। अन्यथा एकमेवाद्वितीयं ब्रह्म इति श्रुतिप्रसिद्धा व्याहन्येत। देवीभागवते च –

एकमेवाद्वितीयं वै ब्रह्म नित्यं सनातनम्।

द्वैतभावं पुनर्याति काले उत्पिस्सुसंज्ञके।। (दे. भा. –३।६।४)

सृष्टिस्तावत्त्रिविधा – आध्यात्मिकी, आधिदैविकी, आधिभौतिकी च। तत्र भगवतः स्थूलशरीरस्वरूपः विराड्सृष्टिप्रवाहः आध्यात्मिकसृष्टिसंज्ञया शास्त्रेष्वभिधीयते, आधिदैविकी

सृष्टिः ब्रह्माण्डसृष्टिः कथ्यते, आधिभौतिकी च पिण्डसृष्टिर्निगद्यते। तत्राद्या अनाद्यनन्ता, द्वितीया तृतीया वा सादी सान्ते च वेदितव्ये।

आध्यात्मिक्याः सृष्टेः अनाद्यतन्तत्वाद् ब्रह्मसत्तावत् प्रकृतिरपि अनाद्यनन्ता, यतो हि सा ब्रह्मस्वरूपिणी, अतः तस्या अनाद्यनन्तता स्वतः सिद्धा। प्रकृतेरव्यक्तावस्थां परमात्मना ब्रह्मनाम्ना अभिधीयते, व्यक्तदशायां सगुणत्वाद् ईश्वरनाम्ना व्यवह्रियते, सृष्टेरनाद्यनन्तधारासम्बन्धेन च विराट् पुरुषसंज्ञया व्यपदिश्यते। आध्त्मिक्याः सृष्टेः अनाद्यनन्तत्वात् यस्या महाप्रकृतेः गर्भे आध्यात्मिकी सृष्टिर्भवति तस्याः किल अनाद्यनन्तत्वे का संशीतिः। तथा चोक्तम् कालिकापुराणे –

त्वं सर्वादिरनादिस्त्वं कर्त्री हन्त्री च पालिका। (१।११)

वस्तुतः अनन्तानि ब्रह्माणानि सन्ति। तत्र प्रत्येकब्रह्माण्डे पृथक् पृथक् ब्रह्म विष्णु महेश्वराः सन्ति। तदीयाः कार्यविभागा अपि स्वतंत्रा भिन्ना भिन्ना भवन्ति, अतएव विभिन्नानां ब्रह्माण्डानां सृष्टि स्थिति प्रलया अपि विभिन्नतामुपयन्ति –

संख्या चेद्रजसामस्ति विश्वाना न कदाचन।
ब्रह्म विष्णु शिवादीना तथा संख्या न विद्यते।।
प्रतिविश्वेषु सन्त्येवं ब्रह्मविष्णुशिवादयः।
पातालाद्ब्रह्मलोकान्तं ब्रह्माण्डं परिकीर्तितम्।।
प्रत्येकं लोमकूपेषु ब्रह्माण्डं परिनिश्चितम्।
प्रत्येकं प्रतिब्रह्माण्डं ब्रह्मविष्णुशिवादयः।।

(देवीभागवते ९,७,८,१७)

यथा स्थूलशरीरस्य जरारोगमृत्यवो भवंति तथैव प्रत्येकब्रह्माण्डे ब्रह्मणो दिवसावसाने खण्डप्रलयो रुद्रस्यायुषोऽन्ते च महाप्रलयो बोभवीति। तदा त्रिमुर्तौ ब्रह्मविलीनायां ब्रह्माण्डस्यैकस्य महाप्रलयः सम्पद्यते। अखिलब्रह्माण्डनायकस्य योगमायायाः अक्षिपक्ष्यसञ्चालनमात्रेणापि समस्तं विश्वमुत्पद्यते, अपि च तस्या एव प्रभावेण ब्रह्मविष्णुमहेश्वराणामपि सृष्टिस्थितिप्रलया बोभवन्तीति –

तथा चोक्तं देवीभागवते –

या नैत्रपक्ष्यसञ्चलनेन सम्यग्

विश्वं सृजत्यवति हन्तिं निगूढभावा।

सैषां कोति ससतं द्रुहिणाच्युशेतान्

नानावतारकलने परिभूयमानान्।। (५।१।२९)

अपि च –

जानीहि त्वं महाराज ! योगमायावशे जगत्।

ब्रह्मादिस्तम्बमर्यन्तं देवमानुषतिर्यगम्।।

मायातन्त्रीनिबद्धा ये ब्रह्म विष्णु हरादयः।

भ्रमन्ति बन्धमायान्ति लोलया चोर्णनामबत्।। (तत्रैव – ५।१.५३-५४)

अनाद्यनन्तसृष्टिप्रलयप्रवाहे प्राणिनामुत्पत्तिमुक्तिविषये एवं प्रमाणमुपलभ्यते –

निखिला एव संस्कारा साद्यन्ता सम्प्रकीर्तिताः।

अतो जीवप्रवाहेऽस्मिन् अनाद्यन्तेऽपि जन्तवः।।

मुक्तिशीलस्तथोत्पत्तिशालिनः सन्ति सर्वथा।

नैवात्र विस्मयः कार्यो भवद्भिरमृतान्धसः।।

(देवीपुराणे ३।९७)

एवमेकब्रह्माण्डीयजीवानां स्थूलानि सूक्ष्माणि वा शरीराणि नूनं प्रणाशमापद्यन्ते। तस्माद् ब्रह्माण्डं पिण्डं (जीवदेहः) चोभे विनश्वरे भवतः। त्रिगुणात्मिकायाः प्रकृतेः वैभवस्वरूपे ब्रह्माण्डपिण्डे द्वे अपि त्रिगुणविलासपार्थक्यात् सृष्टि-स्थिति-प्रलयाधीने भवतः। तथाहि श्रीमद्भागवतम् –

यदा सिसृक्षुः परमात्मनो परो

रजः सृजत्येष पृथक् स्वमायया।

सत्त्वं विचित्रासु रिरंसुरीश्वरः

शयिष्यमाणस्तम ईरयत्यसौ।।

(७।१।७०)

अनन्तब्रह्माण्डमयी आध्यात्मिकी सृष्टिधारा अनाद्यनन्ता, किन्तु प्रकृतेः त्रिगुणमयत्वात् प्रत्येकं ब्रह्माण्डं नश्वरमभ्युपगन्तव्यम्। भगवतो रुद्रस्यायुषा सह ब्रह्माण्डस्यैकस्यायुः निर्णीतम्। रुद्रायुषोऽन्ते यश्च विष्णुः यो वा ब्रह्मा स्तः ताभ्यां सहैव ब्रह्माण्डं विलीयते। अतो व्यष्टिरूपेण प्रत्येकं ब्रह्माण्डस्य सृष्टि-स्थिति-विलया भवन्ति। अस्मादेव कारणात् प्रति ब्रह्माण्डं सृष्टिकर्ता ब्रह्मा पालनकर्ता विष्णुः संहारकर्ता च रुद्रः पृथक् पृथक् विद्यन्ते। ब्रह्माण्डवत् जीवदेहात्मकः पिण्डोऽपि नश्वर एव।

जीवोऽत्र संसारे क्रमशः उद्भिज्जस्वेदजाण्डजजरायुजयोनिषु उत्पन्नो भूत्वा नैजं प्रारब्धं भुञ्जानोऽन्ते निधनं प्रपद्यते। एवं च सर्वेऽपि जीवा स्वस्वकर्मफलभोगानन्तरं विलयमुपगच्छन्तीत्यत्र न कश्चनास्ति सन्देहः।

स्मर्यते चात्र –

यदिदं दृश्यते किञ्चिज्जगत् स्थावरजङ्गमम्।
पुनः संक्षिप्यते सर्वं जगत् प्राप्ते युगक्षये।।

(का. पु. – ५।७)

पुराणानुसारं निर्विकारः, अजन्मा पुराणपुरुषः पुरुषोत्तमौ यदा सत्त्वादिगुणानां जन्मादिकर्मणाञ्च कारणभूतायां मायाशक्तौ प्रकृतौ चिदाभासं रूपं वीर्यं निधते तदा प्रपञ्च एष समुत्पद्यते। तथाचोक्तमिन्द्रियाधिष्ठात्रीभिः देवताभिः –

त्वं नः सुराणामपि सान्दयानां
कूटस्थ आद्यः पुरुषः पुराणः।
त्वं देवशक्त्या गुणकर्मयोनी
रेतस्त्वजायां कविरादधेऽजः।।

(श्री.भा. –३।५।२९)

अपि च –

स आदिः स मध्यः स चान्तः प्रजानां
स धाता स धेयः स कर्ता च कार्यम्।
युगान्ते प्रसुप्तः सुसंक्षिप्त लोकान्
युगादौ प्रबुद्धो जगद् व्युत्ससर्ज।।

(म. भा. शा. प. मो. ध. ३४०।१००)

ईश्वरः किल सृष्टिकर्मणि बीजदाता पितृस्थानीयः क्षेत्रस्वरूपा च प्रकृतिः जननी निर्धारिता। यथाऽङ्कुरोत्पत्तये क्षेत्रे बीजमुप्यते तथैव प्रकृतिक्षेत्रे परमपुरुषस्य बीजवपनेन सृष्टिविस्तारो जायते। मानवजगति यथा सृष्टिविचारहेतवे मातुः क्षेत्रे पितुर्वीर्याधानप्रयोजनीयता तथैव प्रकृतिमातुः क्षेत्रे परमेश्वरस्य वीर्याधानेन अनन्तकोटिब्रह्माण्डरूपिण्या विराड्सृष्टेः समुद्भवो भवति। यथाचोक्तं गीतायाम् –

मम यनिर्महद् तस्मिन् गर्भं ददाम्यहम्।

सम्भवः सर्वभूतानां ततो भवति भारत।

तेषां ब्रह्म महद् योनिरहं बीजप्रदः पिता।।

(गीतायाम् –१४।३-४)

मनुस्मृतावपि विज्ञानमेदत् भगवता मनुना समर्थितमास्ते –

द्विधा कृत्वाऽऽत्मनी देहमर्द्धेन पुरुषऽभवत्।

अर्द्धेन नारी तस्यां स विराजमसृजत् प्रभुः।। (मनुस्मृतौ १।३३)

श्रुतिश्च ततो विराडजायत्। इयमेव मातृस्थानीया ब्रह्मशक्तिस्वरूपिणी प्रकृतिः शास्त्रेषु संस्त्यानशक्तिः सलिलस्वरूपा प्रोक्ता। इमामेव विश्वस्य संस्थानशक्तिमभिलक्ष्य भगवता पतञ्जलिना महाभाष्ये संस्त्यानरूपा स्त्रीः प्रवृत्तिरूपः पुरुषः इति सोपष्टम्भं प्रोक्तम्। संस्त्यान-संहनन-सम्मिलन-शक्तिसद्भावात् अप एव प्रकृतेर्नाम। यतोऽप्सु मेलनशक्तिर्वर्तते। महाप्रलयकाले समस्तब्रह्माण्डोपादानभूतं सर्वमि प्रच्छन्नरूपेण प्रकृतेरङ्के विलीनं तिष्ठति। तदा सदसत् किमपि नासीत्, केवलमम्भ एवाभवत्। अस्यामेवानन्तजीवसंस्कारसम्बलितायामव्याकृतप्रकृतौ सर्वतः प्रथमं परमपुरुषेण

वीर्यदानपूर्वकं गर्भाधानं क्रियते। एवं त्रिगुणमय्या प्रकृत्या साकं लीलापूर्वकगर्भाधानद्वारा अनन्तकोटिजीवोत्पत्तिप्रकारोऽवसेयः। परमपुरुषवीर्याधानेनैव क्रमशो महत्तत्त्वादयः समुत्पन्नाः सृष्टिविकासं समेधयन्ति। एतदेव मनुसंहितायां प्रकारान्तरेण उक्तं समुपलभ्यते–

सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजा।

अप एव ससर्जादौ तासु बीजमावासृजत्।। (मनुस्मृतौ १।८)

एवञ्च प्रलयदशायां सदसतोरभावात् कस्यापि वस्तुनः सत्ता नासीत्। केवलमव्याकृतप्रकृत्चिगर्भे विलीनाः। संस्कारसमूहस्तदवबोधकोऽद्वितीयचैतन्यमयः परमात्मैवाविद्यत। स एव सृष्टिप्रारम्भसमये एकत्वाद् वहुत्वकामनया प्रलयगर्भविलीनजीवसंस्कारानुसारेण कल्पसृष्टि प्रकाशयति। एकभावापन्नः परमात्मैव स्वं शरीरं द्विधा विभज्य प्रकृतिं विकासयति। तस्य एव गर्भे विराड् विश्वमुत्पादयति। अतो दर्शनशास्त्रे सत्यस्वरूपस्य ब्रह्मणः शक्तिसमुत्पन्नायाः सत्यस्वरूपिण्याः प्रकृतिमातुलीलावैभवरूपं जगदपि सत्यमेव प्रतिभातीति सिद्धान्तितम्। अस्यां जडचेतनात्मकप्रकृतिपुरुषश्रृङ्गारसमुत्पन्नसृष्टिलीलायां प्रवाहद्वयमभ्युपगम्यते। एक ऊर्ध्वगामी चेतनप्रवाहः, द्वितीयश्चाधोगामी जडप्रवाहः। तत्र जीव नानायोनिषु परिभ्राम्यन् ऊर्ध्वगामिनी चेतनधारामवलम्बमानः क्रमशः समुन्नमन् अन्ते तदुन्नतिपराकाष्ठां मुक्ति लभते। ततस्तदन्तर्गतो जडांशः प्रकृतिधारायां निलीयते। चैतनधारायाः पराकाष्ठा ब्रह्मसद्भावो यत्र प्रकृतेः पृथक् सत्ता विलीयते। एवं च चेतनप्रवाहः प्राकृतिकं रजस्तमोमयं राज्यमतिक्रम्य सत्त्वे समुपस्थितः समुन्नतेः परायां काष्ठायां व्यापिकायां चेतनधारायां

विलीयते। तदीयो देहः मृत्योरनन्तरं चैतन्याभावात् प्रणशमुपगच्छति। यथा प्राणशक्त्ता देहान्तर्गताः परमाणवः परस्परं विच्छिन्नाः सन्तः जडायाः प्रकृतेरधोगतिरूपं तमोऽभिमुखं प्रयान्ति।

प्रकृतिः परिणामिनी चञ्चला चेति हेतोः चेतनप्रवाहः क्रमशः समुन्नतो भवन् सत्त्वराज्यमतिक्रामन् त्रिगुणमय्याः प्रकृतेः स्वाभाविकीं धारां निस्तीर्य परिणामरहितः सन् स्थिरो जायते, किन्तु जडप्रवाहः नियतपरिणामशीलायाः प्रकृतेः नित्यमन्तर्गतत्वात् परिमामशून्यः स्थिरो भवितुं नार्हति। जडायाः प्रकृतेः अन्तिमा सीमा प्रस्तरादयः स्थावरपदार्थाः सन्ति। इयमेव तमोगुणस्य परा काष्ठा।

यथा किल सामुद्रिकास्तरङ्गा घातप्रतिघाताभ्यां तोरमायाताः अग्रे गतिनिरोधसत्त्वात् पुनः समुद्राभिमुखं प्रयान्ति तथैव प्राकृतिको निम्नगामी प्रवाहः क्रमशो निम्नत्वमुपढौकमानः तमोगुणस्य परां काष्ठां प्राप्तोऽग्रे स्थानमनवाप्य पुनरपि तमोगुणाद् रजोगुणाभिमुखं (जडतश्चैतन्याभिमुखम्) स्वभावत एवाग्रेसरति। तदानीं तमोगुणतो रजोगुणाभिमुखं प्रतिष्ठमानस्य किञ्चित् समुन्नत्या तमोगुणमालिन्यापसृत्या तत्र ईषत् स्वच्छताया आविर्भावो जायते। यथा भगवतो सूर्यस्य किरणच्छायायाः किन्तु स एव यदि निर्मलीकृतो भवेत्तदा तत्र व्यपकस्य सूर्यस्य प्रतिबिम्बं प्रतिफलत्येव तथैव सर्वव्यापकस्यात्मनः चित्सत्तायाः सर्वत्र सत्त्वेऽपि सा तामसिकप्रवाहमालिन्यात् तत्र नैव विकासमापद्यते, किन्तु प्राकृतिकः प्रवाहः तमोगुणस्यान्तिमकाष्ठातः किञ्चित् समुन्नततां प्रपद्यते। तदा तत्र स्वक्छीभूते सूक्ष्मप्रकृतिकेन्द्रे व्यापकस्य परमात्मनोः यः प्रतिबिम्बो निपतति स एव ब्रह्मणः प्रतिबिम्बो जीवसंज्ञां धत्ते। तथाहि देवीभागवते –

अविद्यायां च यत् किञ्चित् प्रतिबिम्बं नगाधित।

तदैव जीवसंज्ञ स्यात् सर्वदुःखाश्रयं पुनः।। (२।७।४५)

श्रीमद्भागवद्गीतायामपि भगवान् श्रीकृष्णः स्पष्टं प्रोवाच –

ममर्वांशे जीबलोके जीवभूतः सनातनः।

मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति।।

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।

अपि च –

जीवभूतां महाबाहो , ययेदं धार्यते जगत्।। (१५।७, ७।५)

महाभारतस्य शान्तिपर्वणि मौक्षधर्मेऽपि जीवात्मा परमात्ममोऽशाः स्वीकृतोऽस्ति महाभारतस्य शान्तिपर्वणि –

जीवमात्मगुणं विद्यादात्मनं परमात्मनः।(१४१।१)

एवं हि अंशशब्देन कल्पितस्य जीवात्मनः प्रथमविकाससमये अविद्यायाः प्रवलेनान्धकारेण समाच्छन्ने तमोमयान्करणो एतावत्तारल्यभावमान्नमात्मज्योतिः प्रतिफलति यत् तत् चिदाभासतः चित्प्रतिबिम्बाद् वा अन्यत् किमपि अभिधातुं न शक्यते। तदेव ज्योतिः प्रकृतिराज्ये समुन्नमद् यथा-यथा अविद्यान्धकारतो विमुच्यते तथा तथा तत् स्वीयां तां ज्ञानमयीं प्रभां प्रदर्शयति यया व्यापकेन चिन्मयस्वरूपेण सह तस्य अंशशिभावसम्बन्धो ज्ञानराख्यविचरणशीलैः साधकैः सदैवानूभूयते। विषयमिमं स्पष्टयितुं भगवान् महर्षिवेदव्यासः स्वकीये वेदान्तदर्शने सूत्रयाञ्चकार –

अंशो नाना व्यपदेशात्।।

(ब्र.सू. –२।३।४३)

यथा एक एव आकाशो घटाकाश-मठाकाशादिना भिद्यते तथैव अन्तःकरणोपाधिभेदेन एकमेव ब्रह्म संख्यातीतारूपेण परिव्याप्तं विलोक्यते। तस्मादेक एव विभुः परमात्मा उपाधियुक्तः सन् संशस्वरूपतो नानात्वं भजते। अत एवोक्तंकोशितक्युपनिषदि –

वालाग्रशतभागस्य शतधा कल्पितस्य च।

जीवो भागा स विज्ञेयः सचानन्त्याय कल्पते।। (कौ. उ. – ५।३)

यथा वा एक एव निराकारोऽग्निः साकालरूपेण प्रज्वलितः सन् आधारभेदाद्भिन्नः प्रतीयते तथैव जीवमात्रेऽन्तर्यामितया सर्वत्र स्थितः एक एव परमात्मा विभिन्नप्राणिषु तदनुरूपतया विभिन्नरूपोऽनुभूयते। वस्तुतः एक एवेश्वर आधारभूतस्य वस्तुतः शरीरादेरनुरूपतया विश्वस्मिन् जीवरूपेण अनेकः प्रतीयते। तथाहि –

अग्नियथैको भूवनं प्रविष्टो

रूपं रूपं प्रतिरूपो बभूव।

एकस्तथा सर्वभूतान्तरात्मा

रूपं रूपं प्रतिरूपो बभूव।।(क.उ. २।२९)

प्रकृतेः अतिसूक्ष्मोंऽशो यत्र चैतन्यं प्रतिविम्वितं भवति स एव कारणशरीरनाम्ना निगद्यते। ततः प्रकृत्या सम्बन्धनिबन्धनस्य जीवस्य इच्छया सूक्ष्मशरीरमुत्पद्यते। तद्गतसंस्कारसमूहतीव्रवेगानुसारेण च दृश्यमानं स्थूलं शरीरमुद्भवति। एवं

शरीरत्रयेणभोगादिना बद्धो जीवः उद्भिज्ज-स्वेदज-अण्डज-जरायुजानां योनीरतिक्रमन् मानवयोनिमुपढौकते।

मनुष्ययोनौ असंख्कविभिन्नगतिलाभान् मानवयोनिसंख्या निर्द्धारयितुमशक्या, केवलमुद्भिजादिचतुर्विधभूतसंघस्य संख्या शम्भूगीतायां निर्धारिता विलोक्यते। तदनुसारं विंशतिलक्षसंख्याकाः स्थावर-योनयः सन्ति, कृमियोनौ एकादशलक्षसंख्याकाः, जलचरयोनयो नवलक्षसंख्याकाः, पक्षियोनयो दशलक्षसंख्याकाः, पशुयोनयः त्रिंशल्लक्षप्रकाराः, वानरयोनयश्च चतुर्लक्षविधाभवन्ति। तथाचोक्तम् –

स्थावरे लक्षविंशत्यो कृमिजं रुद्रलक्षकम्।
जलजं नवलक्षं च पक्षिजं दशलक्षकम्।।
पश्वादीनां लक्षत्रिंशत्त्चतुर्लक्षं च वानरे।
ततो हि मानवाजाताः कृत्सितादेर्विलक्षकम्।।

(शम्भुगीतायाम् –१७,१८)

तथा चोद्भिज्जस्वेदजाण्डजरायुजात्मकस्य चतुर्विधस्य भूतसंघस्य।

सङ्कलनया (२०+११+९+१०+३०+४=८४)चतुरशीतिलक्षप्रकारा योनयो भवन्ति। चतुरशीतलक्षान्ते मानवः इति वचनानुसारं जीवः पूर्वं प्रोक्तचतुरशीतिलक्षसंख्याकासु विविधासु योनिषु जन्म गृहीत्वा मनुष्ययौनौ जन्म गृह्णाति। तत्र सत्कर्मणा समुन्नतिम् असत्कर्मणा चावनर्तिलभमानः तत्फले सुखदुःखे अनुभवति।

तत्त्वनिरूपणप्रसङ्गे देवर्षिनारदमुपदिशता ब्रह्मणा देवीबागवतेऽपि चतुरशीतिलक्षसंख्याका जीवयोनयः प्रोक्ताः तथाहि –

सर्वे जीवा मिलित्वैव ब्रह्माण्डांशसमुद्भवाः।

चतुरशीतिलक्षाश्च प्रोक्ता वै जीवयोनयः।।

मानवेतरचतुर्धिभूतसंघस्य योनिषु स्वाभाविकसंस्काराश्रयेण तद्गता जीवा क्रमोर्ध्वगामीनो भवन्ति, किन्तु मानवयोनौ जीवः स्वतन्त्रः तन् संस्काराधीनो जायते। अतोऽसौ क्रमौन्नत्तिमप्राप्तौ निजकर्मानुसारेण कदाचिदुन्नतः कदापि चावनतो भिन्नां भिन्नां गतिमासदयति।

उद्भिज्जयोनिमारम्य जरायुजयोनिपर्यन्तं जीवो निर्बाधं क्रमोन्नतिमासादयति, यतो हि तासु योनिषु बुद्धेर्मानिन्येन जीवः स्वकर्मणा स्वतन्त्रसंस्कारावर्जनं न कर्तुं पारयति, केवलं प्रकृतिरेव माता शिशुमिव स्वाभाविकसंस्काराननुसत्य क्रमशो जीवान् सम्बर्द्धयति। यथा नद्या प्रवहमाणः काष्टखण्डोऽपवेगेनैव समुद्राभिमुखमानीयते तथैव मानवभिन्ना जीवाः, प्रकृतेरूर्ध्वगामिना प्रवाहेण उद्भिज्ज-स्वेदज-अण्डज-जरायुजान्तं क्रमशः समुन्नतां योनिं नीयन्ते। तदानीं प्रकृतिमातुरधीनत्वात् जीवानां क्रमोन्नतिर्निर्वाधं जायते, परन्तु मानवयोनिमधिगते जीवे पूर्णरूपेण पञ्चकोषा विकाशं प्राप्नुवन्ति, तत्राहङ्कारबुध्योरपि विकासो जायते। इदानीं मानवः प्राकृतौ स्वामित्वं स्थापयति, प्रकृतिमातुरधीनतां च परित्यजति। अतः प्रागेव प्रकृतिदायित्वस्य तिरोधाने स्वयं मानवः स्वकृतानां कर्मणां दायित्वं भजते। अतो मानवयोनौ धर्माधर्मयोरधिकारः समाम्नातः। तथाचोक्तम् –

मानुषेषु महाराज, धर्माधर्मो प्रवर्ततः।

न तथान्येषु भूतेषु मनुष्यरहितेष्विह।।

इयं हि प्रथमा योनिः यां प्राप्य जगतीपते।

आत्मा वै शक्यते त्रातुं कर्मभिः शुभलक्षणैः।।

मनुष्ययोनौ कर्मानुष्ठानाधीनत्वात् स्वीयपुरुषार्थैर्मानवः स्वीयं समुन्नतिमनुष्ठातुमर्हति, स्वकीयेन पापकर्मणा च नीचामपि, पापयोनिं प्राप्तुं शक्नोति। अतः शास्त्रेषु सर्वापेक्षया मानवजन्मनोऽभ्यर्हितत्वमुपपादितम्। अहङ्कारक्रान्तचित्तो मानवः प्रकृतेरूर्ध्वगामिनं प्रवाहं परित्यजन् स्वेच्छाचारी सन् विपरीतगतिस्वरूपामपनतिं लभते। तस्मिन् समये धर्मो हि मानवासाहाय्यामाचरन् शास्त्रीयविधानद्वारा तस्यावनतिं निरुध्य क्रमोन्नतिमार्गे तं परिचालयति। तथाचोक्तं शम्भूगीतायाम् –

सन्नतिं निखिला जीवा धर्मेणैव क्रमादिह।

विद्धाना सावधाना लभन्तेऽन्ते परं पदम्।।

पुराणानुसारं धर्मद्वारैव स्रवे मनोरथाः पुरुषार्थश्च सिध्यन्ति। अतो धर्मानुष्ठानमवश्यं कर्तव्यम्। तथाचोक्तं कूर्मपुराणस्य पूर्वार्द्धे –

धर्मात् सञ्जायते ह्यर्थो धर्मात् कामोऽभिजायते।

धर्म एवापवर्गाय तस्माद् धर्म समाश्रयेत्।। २।५५

धर्मोहि स्थावरजङ्गमात्मकस्य समस्तस्य पदार्थस्य धारकोऽस्ति, तत्प्राप्तिश्च कर्मणा ज्ञानेन च जायते। यदि मानवो ज्ञानकर्मभ्यां रहितो भवेत्तर्हि जगद्धारणार्थमपेक्षिताया शक्तेराविर्भावको न प्रभवेत्। अतो जगतो धारणमय्याधर्माख्यायाः शक्तेः प्रादुर्भावाय कर्मणो ज्ञानस्य चावलम्वनमवश्यं विधेयम् –

धर्मात् संजायते सर्वमित्याहु ब्रह्मवादिनः।

धर्मेण धार्यते सर्वं जगत् स्थावरजङ्गमम्।।

कर्मणा प्राप्यते धर्मो ज्ञानेन च न संशयः।

तस्माज् ज्ञानेन सहितं कर्मयोगं समाश्रयेत्।।

(कू.मु.पुर्वाद्ध २।६२।६३)

एवमैहिकीं पारलौकिकी वा समुन्नति-साधयितं समुद्यतेन पुंसा धर्मोऽवश्यमनुसर्तव्यः धर्मो हि द्विविधः दशधर्मः, विश्वधर्मश्च। तत्र देशधर्मः स उच्यते यस्तत्तदेशस्य संस्कृत्नुसारं तत्तदेशमात्रस्य मनुष्यैरनुष्ठेयो भवति। यथा भारतवर्षस्य देशधर्मो वर्णाश्रमदर्मः। विश्वधर्मश्च स एव भवितुमर्हति यो विश्वकल्याणाभावनया समस्तस्य विश्वस्य मनुष्यैरनुष्ठेयो भवति। विश्वधर्माश्रयणैनैव विश्वबन्धुत्वस्योद्बोधनं सर्वत्र सौहार्दपूर्णाया भावनायाश्च सम्पर्कस्य स्थापनं भवितुमर्हति। इयमेव धर्ममाश्रित्य भारतस् वसुधैव कुटुम्बकम् इति सर्वजनहितकारिणी भावना जागर्ति।

आनन्द एव जीवस्य जीवनशक्तेरखिलपुरुषार्थानाञ्च मौलिकोऽस्ति आधार। अनन्दप्रवासी जीव आनन्दकन्दसच्चिदानन्दचरणसरसीरुहमाश्रयन् क्रमशः नन्ददायिनीं समुन्नतिकक्षामतिक्रमन् कृतकृत्यतामधिगच्छति। ये भगवद्गुणानुरक्तमात्मनो मनः एकवारमपि भगवच्चरणकमलयोः निवेशयन्ति न, तेषां कदाचिदपि यमाद् यमपाशहस्तेभ्यो यमदूतेभ्यो वा किञ्चिद्भयं जायते। भगवति मनोनिवेशमात्रेणैव ते निर्धूतपापा भवन्ति, तथाचोक्तं श्रीमद्भागवते भगवता शुकदेवेन राजानं परीक्षितं प्रति –

सकृन्मनः कृष्णपदारविन्दयोर्निवेशित तद् गुणराशि यैरिह।

न ते यम पाभभृतश्च तद्भटान् स्वप्नेऽपि पश्यन्ति हि जीर्णनित्कृताः।।६।१।१९

अत एव सारग्रहिणो गुणज्ञा सकलदोषदुष्टस्यापि कलेः एवं प्रशंसां कुर्वन्ति, यतस्तत्र भगवतो गुणनामकीर्तनेनैव मानवः सत्ययुगे ध्यानस्य, त्रेतायां यज्ञस्य, द्वापरे भगवत्सेवायाश्च फलं लब्ध्वा सर्वविधं पुरुषार्थं प्राप्य कृतार्थो जायते –

कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः।
कीर्तनादेव कृष्णस्य मुक्तसङ्गः परं व्रजेत्।।
कृते यद्ध्यायतो विष्णु त्रेतायां यजतो मखैः।
द्वापरे परिचर्यायां कलौ तद्धरिकीर्तनात्।।

(श्री.भा. १२।३।१५।५२)

इदमेव जीवभावविकासक्रमाभिव्यक्तिविज्ञानस्य सारभूतं तत्त्वम्, एतदेव च चिज्जडग्रन्थिस्वरूपजीवविज्ञानस्य संक्षेपतो रहस्यमवगन्तव्यम्।

यथा धर्मादयश्चार्था मुनिवर्यानुकीर्तिताः।
न तथा वासुदेवस्य महिमा ह्यनूवर्णितः।।

(श्री. भा. –१।५।९)

तस्माद्धर्मः खलु पुराणस्यास्त्यविभाज्यमङ्गमिति पुराणलक्षणकोटौ तस्य प्रवेशोऽनावश्यक एव। अत एव भगवता व्यासेन मन्वन्तरे धर्मस्योपन्यासो विहितः –

मन्वन्तरं हिसद्धर्म ऊतयः कर्मवासना।

(श्री. भा. २।१०।४)

**पुराणेषु योगसिद्धिमहिम्नो वर्णविमर्शः**

भारतीयायाः संस्कृतेर्विद्यायाश्चावबोधार्थं पुराणं विश्वकोषभूतमस्ति। पुराणवाङ्मये वहुनामेवंविधनां विद्यानां सङ्केतो विवरणानि चोपलभ्यन्ते, याश्च विद्या धानीमपि विस्मयमाहन्ति नितराम्। अलौकिककर्मणां विशिष्ट उल्लेखोऽपि पुराणानामेकं वैशिष्ट्यं विभर्ति। पुराणप्रौक्तानि अलौकिकानि कर्माण्येव सिद्धय इत्युच्यन्ते शास्त्रेषु। यैः खलु नियमैः प्रक्रियाभिर्वा सिद्धयः प्रजायन्ते, तेषां ज्ञानमावश्यकमेव।

का नाम सिद्धि ? तत्प्रकाराश्च कतिविधाः ? प्राचीने युगे कथं सिद्धयः साफल्यमभजन्? आधुनिके च समये कथं तासां उपलक्ष्यते ? इत्यादिप्रश्नानां समाधानस्यावश्यकत्वात्तावत् किञ्चित् प्रस्तूयते।

कयाऽपि लोकातीतशक्त्या अलौकिकेन वाऽपि सामर्थ्येन कस्यचन अद्भुतस्य पदार्थस्य या सृष्टि विलोक्यते, सा खलु सिद्धिसत्तनिर्धारणी, अद्भुतपदार्शजननशालिनी, देहेन्द्रियादिषु विलक्षणपरिवर्तनकारिणी, अलौकिकसामर्थ्यप्रकाशिका लोकातीतशक्तिरेव सिद्धिपदेन सन्ततं व्यपदिश्यते तज्ज्ञैः। सिद्धेः पञ्च प्रकारान् आदिशति। योगदर्शने महर्षिः पतञ्जलिः। जन्मौषधितपो मन्त्रयोगसिद्धैर्नरेतरैः(४।६।९) तत्र प्रथमा जन्मद्धिः, अणिमाद्या भवति। यथा पक्षिणामाकाशादिगमम् कपिलादिनां मुनोनां जन्मान्तरीयपुण्यप्रभावादेव दांसिद्धिकं ज्ञानम्।

द्वितीया औषधिजा सिद्धिः पारदादिरसायनानामुपयोगाद् जायमाना सिद्धिरोषधिजन्यत्वाद् औषधिसिद्धिः। रसायनशास्त्रप्रणेता बौद्धो नागार्जुनाचार्यः स्वीयरससिद्धिग्रन्थेऽस्याः सिद्धेर्विविधान् प्रकारान् उपयोगांश्च विशिष्टतयाऽभिव्यक्तवान्।

रसायनस्य माहात्म्यप्राचुर्येणैव गोरक्षनाथाद्या महासिद्धाः कालचक्रं विजित्य साम्प्रतमपि महीं विचरन्ति, स्वदर्शनेन भक्तान् अनुगृह्णन्ति, स्वोपदेशेन च जिज्ञासून् कृतार्थयन्तीति कर्णकर्णिकया श्रूयते। यथा वा सोमरसादिपानेन, विभिन्नोषधिसेवनद्वारा वा कायाकल्पं निर्माय पुनः युवत्वप्राप्तिः औषधिसिद्धिः।

मन्त्राभ्यासेन जायमाना सिद्धिस्तु तृतीया। यथा मन्त्रद्वारा चित्तस्यैकाग्रतया इष्टदेवादिदर्शनम्। मन्त्राणामलौकिके प्रभावे संदिहानाः साम्प्रतमपि वर्तन्तां केचन महाभागाः, परन्तु मंत्रजा सिद्धिर्वास्तविकीति पुराणानां दृढं समुपजृम्भते प्रामाण्यम्। अनया सिद्ध्या आकाशगमनादीनि कार्याणि तु स्वतो निष्पद्यन्ते।

तपसा सिद्धिश्चतुर्थी। तपः प्रभावेण तापसानां संकल्पसिद्धिर्भवति। संकल्पप्रभावाद्योगी – यदेव कामयते, तदेव भवति। तपःसिद्धिप्रभावात् चित्तेविलक्षणा योग्यता जायते।

समाधिजा सिद्धिस्तु पञ्चमी पातञ्जलयोगदर्शनस्य तृतीये विभूतिपादे विस्तरशः प्रतिपादिताऽस्ति, यथा श्रोत्राकाशयोः सम्बन्धे कृतसंयमस्य योगिनो दिव्यं श्रोत्रं प्रवर्तते, श्रोत्राकाशयोः सम्बन्धसंयमाद् दिव्यं श्रोत्रम्।(यो. सू. ३।४१)

त्थं योगशास्त्रादौ पञ्चविधानां सिद्धिनां सामान्यतो निरूपणं वर्तते। न केवलं वेदपुराणादिष्वेव सिद्धानां चर्चा समुपलभ्यते, अपितु जैनग्रन्थेषु बौद्धग्रन्थेषु च तत्तदाचार्याणां जीवनचरिते सिद्धीनां सङ्केतः समुपलभ्यते। पाश्चात्त्याजगतो धर्माचार्याणां जीवनचरितेऽप्यनेकाः सिद्धयः चमत्कारं जनयन्तीति नापरोक्षं प्रेक्षावताम्। ख्रिस्तमतसंस्थापकस्य क्राइस्ट नामधेयस्य धर्मचार्यस्य विषये श्रूयन्ते बह्व्यः सिद्धयः

न्यूटेस्टामेण्टनामके ग्रन्थे। एवं मोहम्मदीयधमसंस्थापकस्य मुहम्मदमहाभागस्य जीवनचरितेऽपि दाराशिकोहनामा उपनिषद्रसिकः प्रख्यातो लेखकः स्वीये रिसाल-ए-इकनुमा नाम्नि पारसीकभाषानिवद्धे ग्रन्थे विखति यद् अरवमरुभूभौ वर्वुरवृक्षस्य छायायां स्वकीयोट्राया उपरि समासीनो मुहम्मद्साहवो यदा ध्याने निमग्नो भवतिस्म तदा उपष्ट्रातस्य परिबृहितं देहभारं सोढुमशक्नुवर्ती शनैः भूमौ पविशतिस्म। इयमेव गरिमेति नाम्ना ख्ता सिद्धिः, यत्र देहस्य भार एतावान् परिबृंहितो भवति, यदधिष्ठितः पशुर्भारं वोढं नितान्तमशक्तः, पदात् पदमपि चलितुमसमर्थो भवति।

मध्ययुगीयखिष्ट्रीयधर्मानुयायिनां भूयसां साधुनां साध्वीनां योषितां च जीवनचरिते प्रार्थनासमये स्वासनादुत्थानम्, आकाशगमनादिकं च विचित्रां सिद्धि समामनन्ति तच्चरितनिबद्धारः। बहूनां साधकानां जीवने बहुशोऽनुभूतमिदं तथ्यं यत् ते प्रार्थनासमये स्वासनेभ्योऽन्तराले उतिष्ठन्ति, परं प्रार्थनाया अवसाने शनैः शनैः आकाशात् तेषां देह आसनेऽवितरति। योगवासिष्ठे तु आकाशगमनादिसिद्धीनां बहुशः समालम्भो न केषामपि विस्मयाय कल्पेत, यथा श्रीरामं प्रति महर्षिर्वसिष्ठः –

अनात्मविद् अमुक्तोऽपि नभोविहरणादिकम्।
दव्यकर्मक्रियाः कालशक्त्या प्राप्नोति राघव।।

सिद्धयो न केवलं भारते वर्षे, प्रत्युत अस्मिन् विपुले जगति च प्राचीने युगे समभूवन् वर्तमाने काले सम्भवन्ति, भविष्ये च सम्भविष्यन्तीति नहि कश्चिदत्र विवादस्यावकाशः।

प्राचीने युगे सिद्धीनां भूयसीं फलाभिव्यञ्जनशक्तिं साक्षात् कुर्मः। सत्त्वप्राचुर्योपजायमानतपसः प्रावल्यात्, आचरणस्य विशुद्धेः, स्वार्थभावनाया वैधुर्यात्,

परोपकारपरायणानां जनानां परोपकारबुद्धेः सन्ततं प्राचुर्यात् , त्यागस्य च माहात्म्यात् सिद्धीनां फलाविर्भावो भवतिस्म। तदानीं पूर्वोक्ताः सिद्धयः सहजरूपेणैव जगति साक्षात् क्रियन्ते स्म जनैः। एव गौरवमयपुराणनिर्दिष्टसिद्धीनां हृदयावर्जकाः पन्थानः, स्वमहनीयोत्कर्षेण जनानां मनांसि आत्मानं प्रति आकृष्टुं सर्वथा समर्था अभूवन्।

साम्प्रतिके समये महोत्कर्षशालिनीनामपि सिद्धनां सत्ताविचारप्रस्तावे कमपि ह्रासमेव विलोकयामः साम्प्रतं सिद्धनां विरलेऽपि प्रचारे तासां मूलतोऽभावं वक्तुं न कश्चिदपि विपश्चित् शक्नोति। दैवात् कालस्य माहात्म्यात्, सिद्धीनां फलाभिव्यञ्जनं विरलतां प्रयातम्। सिद्धीनां फलाभिव्यञ्जनाय साधकानां सात्त्विकं जीवनं सदाचारः च अनिवार्यत्वेन अभिवाञ्छन्ति शास्त्रममज्ञाः, परन्तु इदानीं परान्नभोजनेन दूषितोदराणाम्, परापवादेन दग्धजिह्वानाम, प्रतिग्रहेण च विकृतहस्तानां दूषितोदरःणाम्, परापवादेन दग्धजिह्वानाम्, प्रतिग्रहेण च विकृतहस्तानां जनानां मन्त्रादिसिद्धयः कथंकारं स्वाभिमतं साफल्यं भजेयुः। सत्यपि एकादृशि दुरवास्थाग्रस्ते समये न किमपि नैराश्यं भजन्ति तज्ज्ञाः, प्रतिकूलेऽपि समयः स्वोच्चाभिलाषसम्पादनेन साफल्यं नेयः। यदि जना विहाय आलस्यम्, दूरीकृत्य च सिद्धीनां साफल्यविषये सन्देहजालम्, स्वीयं जीवनं सात्त्विकभावापादनेन विशुद्धसदाचारपोषणे बद्धपरिकारा भवेयुः, तर्हि सिद्धीनां फलं नूनं प्रत्यक्षायमाणमेव भवेदिति नास्ति लेशोऽपि सन्देहस्य।

पुराणानि सन्ति भारतीयसंस्कृतेः विद्यानां चाकरः। तत्र स्थाने स्थाने यौगिकप्रक्रियाया योगसिद्धेश्चापि समुल्लेखो विद्यते।

योगदर्शनस्य प्राय) सर्वे विषयाः सन्ति प्रायोगिकाः। अतो दर्शनमिदं सर्वैरेवास्तिकनास्तिकैः समानं समाद्रियते। योगस्यावान्तरविषयेषु स्थानम् विदुषां विचारवैविध्यम्, परं क्रियांशानां प्रयोगे न कस्याप्यस्ति काचिद् विमतिः।

यमनियमादिबिः शुद्धान्तः करणस्तत्तद्धारणया प्राप्तसिद्धिर्योगी सर्वं कर्तुं शक्नोति। ऐन्द्रजालिकक्रियासु प्रायो दृक्शक्तिस्तम्भनप्रक्रिया दृश्यते। इन्द्रजालक्रियाप्रदर्शकोऽनेकसंयोगवियोगरूपिणीं क्रियां प्रदर्शयति, इन्द्रजालविद्यया दर्शकानां दर्शनानि स्तम्भयति, येन द्रष्टारस्तस्य ततत्पदार्थसंयोगवियोगकार्यकलापं ज्ञातुमसमर्था भवन्ति।

यथेन्द्रजालक्रीडाप्रदर्शको विविधां क्रियां प्रदर्शयन्निन्द्रजालविद्यया दर्शकदर्शनानि स्तम्भयति, येन द्रष्टारस्तस्य ततत्कार्यकलापं सम्यगवगन्तुं न पारयन्ति, तथैव योगी दृक शक्तिस्तम्भनक्रियया परकीयदृष्टितोऽन्तर्दधाति, येनोन्मीलितनेत्रेऽपि पुमान् स्वम्भितदृक् शक्तित्वान्न योगिनं द्रष्टुं शक्नोति। यदेन्द्रजालस्य साधारणक्रियया दृष्टिशक्तिः स्तम्भिता भवति, तदा योगिभिः संयमक्रियया किन्न भवितुमर्हति ?

शरीरे प्रवेशनिर्गममार्गयोर्यावत्यो नाड्यः सन्ति, तासां परिज्ञानेन चित्तस्य परशरीरे प्रवेशः सम्बवति। योगसमांधिनां स्थूलशरीराच्छूक्ष्मशरीरस्य बन्धनं शिथिलं भवति। संयमद्वाराचेतसी गमनागमनमार्गीयधमनीनां परिज्ञेनेन सूक्ष्मशरीरस्य कित्रापि प्रवेशक्रियाया निर्गमनक्रियायाश्च परिज्ञानं योगिनो जायते। तदानीं योगी स्वेच्छया स्वशरीरान्निर्गत्य परकाये प्रवेष्टुमर्हति, श्रीमद्भागवतस्यैकादशस्कन्धे पंचदशाध्याये

लिखितमस्ति यत् परस्य शरीरे प्रवेष्टुकामो योगी तत्रात्मानं भावयन् यथा भ्रमर एकस्मात् पुष्पात् पुष्पान्तरं प्रयाति, तथैवात्मशरीरादन्यस्य शरीरे प्रविशति –

परकायं विशन् सिद्ध आत्मानं तत्र भावयेत्।
पिण्डं हित्वा विशेत् प्राणो वायुभूतः षडङ्घ्रिवत्।।

(श्री. भा. ११।१५।२३)

यदा योगी संयमं द्वारीकृत्य परकीयमन्तःकरणं प्रविशति, तदासौ तद्विषयेषु संयमं कुर्वाणः परकायचित्तस्य सुविस्तृतं परिज्ञानं सम्पादयति। साधको योगक्रियायामग्रे सरन् यदा समाधिमासादयति, तदैव परकायप्रवेशयोग्यतामधिकरोति। योगी यमनियमादिनात्मवलं प्राप्य निजासनजयेन स्थूलं शरीरं विजित्य प्राणायामेन प्राणान् वशीकृत्य प्राणमयकोशसहितं सूक्ष्मदेहं स्थूलदेहान्निस्सार्य प्राणशक्तिद्वारा परकायप्रवेशस्य ततो निर्गमनस्य च शक्तिं लभते। कस्यापि जीवस्यान्तःकरणभावं जिज्ञासमानो योगी तदीयज्ञानविशेषे संयमं विदधानः स्वकीयान्तःकरणं परकीयान्तःकरणसम्बद्धं विधाय परेषामन्तःकरणभावं गृह्णाति।

यथा मधुकरराजो यत्र यत्र गच्छति, तत्र तत्रान्या अपि मधुमक्षिकाः सहैव गच्छन्ति, तथैव परस्य काये प्रविष्यो योगी तत्र स्वशरीरवद् व्यवहरति। संयमद्वारा समानवोर्विजयेन योगी तेजःपुञ्जमयो जायते। यतः समानवायुः समत्वमुत्पादयति। अतः समत्वेन च गुणेन साधके सर्वाः शक्तयः समाकृष्यन्ते। यथा मर्यादावान् समभावसम्पन्नः समुद्रो भुमिस्थितान् जलराशीन् नदीद्वारा स्वस्मिन् समाकर्षति, यथा वा समदर्शी भगवान् भास्करः स्वकीयकिरणैरितस्ततो विकीर्णान् रसान् स्वस्मिन् समाकर्षति, तथैव

शरीरस्थितः समानो वायुः स्वरूपतो वियुज्यमानो विकर्णा तेजः शक्ति समाकृष्य योगिनः शरीरं तेजोमयं विधत्ते। यथा वैज्ञानिका तन्त्रक्रियाद्वारा प्राणिनां छायारूपचिह्वानां धारणशक्ति समुत्पाद्य फोटोग्राफनामके यन्त्रे मनुष्यादीनां मूर्तीर्यथावत् प्रकाशयन्ति, तथैव योगिनोऽपि पूर्वजन्मसंस्कारेष संयमेन पूर्वजन्मज्ञानं परजन्मसंस्कारेषु च सयमेन परजन्मज्ञानं कर्तुं प्रभवन्ति।

यथा रूपविषयकसंयमेन योगिनः शरीरस्वरूपं केनापि द्रष्टुं न शक्यते, तथैव शब्दविषयकसंयमेन श्रोत्रग्राह्यशक्तिरपि स्तम्भिता भवति। येन योगिनः समुच्चारितशब्दमपि न कश्चिच्छ्रतुमर्हति। एवं स्पर्शरसगन्धानां संयमेन योगिनः शरीरस्य स्पर्शरसगन्धानापि पार्श्वस्थः पुरुषो नावगन्तुं प्रभवति।

यथा समेषां शब्दानामाश्रय आकाशः, तथैव समस्तानां प्रामिनां कर्णेन्द्रियाधारोऽप्याकाश एव यथा दाहिकया शक्त्या साकं पावकस्य संवन्धः, तथैव शब्देन सहाकाशस्य संबन्धो विद्यते। आकाश एकस्मिन् स्थाने समुच्चरितः शब्दः स्थानान्तरं गच्छति। यतस्तयोर्मध्य आकाशातिरिक्तं किमप्यन्यन्नास्ति। अतः शब्दाधार आकाश एव सिध्यति। कर्मेन्द्रियस्याकाशसंबन्धादेव शब्दः श्रूयते। पिहिते कर्णे आकाशसंबन्धाभावान्न शब्दः समाकर्ण्यते। अत आकाशेन सह कर्णेन्द्रियस्यास्ति साक्षात् संबंध इति निश्चीयते। आकाशस्यावरणराहित्यात् सर्वव्यपित्वे नास्ति कश्चित् सन्देहलेशः। तथा च कर्णेन्द्रियाकाशयोराश्रयाश्रयिभावसंवंधे संयमेन योगिना दिव्या शक्तिरधिगम्यते। यया सूक्ष्मादपि सूक्ष्मो निगूढादपि निगूढोऽतिदूरस्थोऽपि शब्दः श्रूते योगिना।

स्थूलशरीराकाशयोः संवन्धे संयमनुतिष्ठान् योगी यदा लघुतूलादिपदार्थेषु धारणां कुर्यात्तदा तस्मिन् लघुत्वसिद्धिर्जायते। तथा योगी यथेच्छमाकाशे भ्रमति, तिष्ठति, स्थानात् स्थानान्तरञ्च मन्तुं प्रभवति।

यदा योगी संयमेन भूतानां विजयं कुरुते, तदा स्वत एव प्रकृतिस्तदधीनतां प्रतिपाद्यते। यथा गावः स्ववत्सान् स्वतो दुग्धं पाययन्ति, तथैव पञ्चम हाभूतविजयेन वशीभूता प्रकृतिः स्वयमेव योगिनं सेवते।

सिद्धिर्द्विविधा – परा, अपरा च। तत्र विषयसंवन्धिन्योऽपराः सिद्धयो मुमुक्षुभिर्योगिभिर्हेयाः स्वस्वरूपानुभवोपयोगिनी परा सिद्धिः। तत्र परासिद्धि स्तदुपयोगिन्यश्चान्याः सिद्धयो योगिभिरुपादेयाः, हैयाश्च विषयसंवन्धिन्योऽपरा सिद्धयः। यदि साधकस्तीव्रवैराग्ययुक्तो मनसः सुदृढतया योगैश्वर्येभ्यो मुखं परावर्तयन् तत्र न मुह्यति, तर्गि शान्तिमयं तत्स्थानं प्राप्नोति, यत्र गमनेन निखिला अपि मनोवासनाः पूर्णतामापद्यन्ते। सत्त्वगुणप्रभावेण रजस्तमोमलेऽपसारिते, अन्तःकरणे च निर्मलतामुपगते ऋतम्भराख्या पूर्णज्ञानमयी बुद्धिरुदयते। मलमलीमसेऽन्तःकरणे भगवत्साक्षात्कारो न संभवति, अपि तु मलराहित्याद् निर्मलमन्तःकरणं भगवद्दर्शनाय समर्थं भवति। साधनवैराग्याभ्यां पक्षाभ्यामुड्डीयमानः साधको हंस इवात्मदर्शनसामर्थ्यं लभमानस्तीव्रवैराग्योदयाद् विविधे चाकचिक्ये ग्रस्तो न भवति, अपि तु शनैः शनैर्भगवद्दर्शनाधिकारी भवन् परं कल्याणस्वरूपं कैवल्यपदमासादयति, यदा सत्त्वगुणस्य प्रवलप्रवाहाद् रजस्तमसोः मलं पूर्णरूपेणापसर्पति, तदा पुरुषः स्वकीयं यथार्थस्वरूपमधि गच्छति। यथैकोऽग्निस्फुलिङ्गोऽनेकानग्निस्फुलिङ्गानुत्पादयति, तथैव

योगवलेनैकमन्तःकरणमनेकत्वं प्रतिपाद्यते। महत्तत्त्वमाधिगच्छन् योगी यथेच्छमनेकान्यन्तःकरणानि स्रष्टुमर्हति। योगसाधनेन स्वस्वरूपज्ञानमधिगतवताऽत्मज्ञानिना योगिना सिद्धयः स्वत एव प्राप्यन्ते। यद्यपि स्वरूपोपलब्धो सत्यां साधकः प्रकृतिलीलया न पुनर्ग्रस्यते, परन्तु व्युत्थानदशादनितासु सिद्धिषु समाकृष्टः सन् जडभरतवद् विपन्नो भवितुमर्हति। अतो मुमुक्षुभिर्योगिभिः सिद्धयो हेया एव।

योगशास्त्रे साघकस्त्रिविधोऽभिमतः – अधमो मध्यम उत्तमश्च। तत्र साधनपथेऽग्रेसरन् सिद्धिभोगी साधकोऽधमो निगद्यते। सिद्धीरवलोकयन्नपि तद्भोगपराङ्मुखो मध्यमः। यस्तु न कथञ्चित् सिद्धिमीक्षते, नापि समौहते, स उत्तमः। अतः परवैराग्यसनाथ उत्तमसाधक एव कैवल्यस्य, सर्वथाधिकारी, तेनैव च त्वरितं कैवल्यमासाद्यते।

यथावद् योगसाधनानुष्ठानेन ज्ञानोदये योगिनामन्तःकरणतो निखिलः सन्देहो दूरीभवति। अतो योगिनो यथेच्छं समेषां वस्तुनां यथार्थं ज्ञानं जायते। योगी यत्रैव स्वीयां ज्ञानदृष्टिं प्रसारयति, तत्रैव तस्य बुद्धिर्देशकालपरिच्छेदरहिताऽभ्रान्ता सती प्रयाति, तया च तत्र त्रिकालदर्शित्वमपपद्यते।

यधा साधको मनःप्राणमिन्द्रियामि च वशए कृत्वा स्वकीयं चित्तं परमात्मनि नियोजयति, तदेश्वरं भावयतस्तस्य समक्षं बह्व्यः सिद्धयः उपतिष्ठन्ते। तदुक्तं श्रीमद्भागवते महापुराणे –

जितेन्द्रियस्य युक्तस् जितश्वासस्य यगिना।

मयि धारयतश्चेत उपतिष्ठन्ति सिद्धयः।। (श्री. भा. ११।१५१)

सिद्धीरेताः समुपलभ्य योगिना सर्वं कर्तुं शक्यते। पाषाणे प्रवेष्टुं पार्यते, आवरणरहिते वियत्यपि तिरोहितेन भूयते, पञ्चापि भूतानि योगिनां क्लेशदानि न भवन्ति। योगी शिलाया प्रवेष्टुमर्हति, जलं तमार्द्रं कर्तुं न शक्नोति, पावकस्तदीयं शरीरं न दहति। न च वायुः शुष्कं कर्तुमर्हति। इमा अष्टौ सिद्धय ईश्वरीया सन्ति। एताभिर्योगिन ईश्वरस्वरूपतां प्रतिपद्यन्ते, ईश्वरानुकम्पयैवैताः समधिगम्यन्ते च।

किञ्च श्रीमद्भागवतस्यैकादशे स्कन्धे –

कया धारणया कास्वित् कथंस्वित् सिद्धिरच्युत।

कति वा सिध्दयो ब्रुहि योगिनां सिद्धिदो भवान्।। (११।१५।१)

इति उद्धवस्य प्रश्नो भगवान् श्रीकृष्णः प्रोक्तवान् –

सिद्धयोऽष्टाशद् प्रोक्ता धारणायोगपारगैः।

तासामष्टौ मत्प्रधाना दशैव गुणहेतवः।। (११।१५।२)

तथाहि अष्टसु सिद्धिषु तिस्रोऽणिमा-महिमा-लघिमासिद्धयस्तु शारीरिक्यः सन्ति। आसां प्राप्तिरैन्द्रियकी सिद्धिरस्ति। इच्छानुसारं लौकिकपारलौकिकपदार्थानुभाविका प्राकाम्यसिद्धिः। मायायास्तत्कार्यस्य च सञ्चालनमीशिता सिद्धिः गुणेष्वसङ्गो वशिता सिद्धिः। स्वेच्छया कामनासुखप्राप्तिः कामावसायितानाम्न्यष्टमी सिद्धिः एता अष्टाऽपि सिद्धये मयि स्वभावत एव तिष्ठन्ति। येभ्योऽहं ददामि तैरंशतः प्राप्यन्ते। यथा चोक्तं श्रीमद्भागवते– एता मे सिद्धयः सौम्य, अष्टौ चोत्पत्तिका मताः। (श्रीमद्भागवते ११।१५।५)

एतदतिरिक्ता अनूर्मित्व-दूरश्रवण-दूरदर्शनत्व-मनोजवत्व-कामरूपत्वपरकायप्रवेशन - स्वच्छन्दमृत्यु-अप्सरोभिः सहक्रीडा-देवदर्शन – संकल्पसिद्धि – अप्रतिहतगत्याज्ञा इतीमा दश सिद्धयः सत्त्वगुणस्य विशेषविकासाद्भवन्ति। त्रिकालज्ञत्व-द्वन्द्वराहित्य-परचित्ताद्यभिज्ञता-अग्नि-सूर्य-जल – विषादीनां शक्तिप्रतिष्ठम्भनत्व अपराजयत्वानीत्येता पञ्चापि सिद्धयो योगिनां भवन्ति।

किञ्च, कया धारणया किदृशी सिद्धिरवाप्यत इत्यपि तत्र विस्तरतो वर्णितम्, योगधारणाभिः प्राप्यमाणसिद्धीनां नामनिर्देशोऽपि कृतोऽस्ति। तथा हि – यः पञ्चभूतानां सूक्ष्मास्तन्मात्रा ईश्वरशरीरमिति बुद्धया तन्मात्रकं मे शरीरमिति भावयन् साधतोऽणिमानं सिद्धिं प्राप्नोति। यः स्वीयं मनो महत्त्वाकारं कृत्वा महत्तत्त्वरूपेण मां ध्यायति, स महिमानं सिद्धिमवाप्नोति। यो वाय्वादीनां चतुर्णां भूतानां परमाणून् मदात्मकानं मत्वा चित्तं मदाकारं कुरुते, स लघिमानं सिद्धिं प्राप्नोति। यः सात्त्विकमहङ्कारं मत्स्वरूपं मत्वा तत्र धारणां करोति, स प्राप्ति सिद्धि प्राप्नोति। यो महत्यात्मनि मयि मानसं धारयति, स प्राकाम्यसिद्धिमवाप्नोति। ययेच्छानुसारं सर्वे भोगा लभ्यन्ते। यः कालस्वरूपे विश्वरूपे मयि धारणां करोति, स ईशित्वसिद्धिमवाप्नोति। अनया जीवान् स्वेच्छया प्रेरयितुं सामर्थ्यमुपलभ्यते। यस्तुरीयाख्ये भगवति नारायणे मयि मनो धारयति, स कामावसायित्वसिद्धि प्राप्नोति, यया तस्य सर्वाः कामनाः पूर्णा भवन्ति। श्वेतद्वीपपतौ शुद्धधर्ममये मयि चित्तं धारयन् योगी षडूर्मिरहितो भवति। य आकाशात्मनि ययि मनसा सहानाहतनादं चिन्तयति, स दूरश्रवणसिद्धि लभते। यो योगी नेत्रं सूर्ये, सूर्यञ्च नेत्रे संयोज्य मां मनसा ध्यायति, स सूक्ष्मदृक् सन् दूरदर्शनसिद्धिमाप्नेति। यथा स समस्तं विश्वं पश्यति।

यो मनो देहं च प्राणैः सह मयि संयोज्य मम धारणां करोति स मनोजवत्वसिद्धिं लभते। अनया यत्रेच्छति तत्र तत्क्षणे समुपगच्छति। यो योगी मन उपादाय (उपादानकारणं कृत्वा) यद्यद् रूपं वभूषति तत्तदनुकूलं रूपं धत्त इत्येषा कामरूपसिद्धिः। परकायप्रवेशमिच्छन् योग्येवं भावयेद् तस्मिन्नेव शरीरेऽस्मि। एवं भावनया तस्य प्राणवायुर्यथा भ्रमन एकं पुष्पं परिहृत्य पुष्पान्तरं गच्छति, तथैवात्मशरीरं त्यक्त्वा परकाये प्रविशति –

(श्रीमद्भागवते ११।१५।४-२३)

सकामानां साधकानां हिताय नानाविधानां सिद्धिनां वर्णनं पुराणेतिहासयोर्योगशास्त्रेषु चोपलभ्यते। सिद्धीनामनेकेषु सत्स्वपि योगदर्शनस्य विभूतिपादे भगवता पतञ्जलिना सिद्धेस्त्रय स्त्रिशद्भेदाः समाम्नाताः तास्वष्टौ सिद्धयो मुखाः सन्ति। पञ्चमहाभूतविजयानन्तरमणिमादयो पूर्वोक्ता अष्टौ सिद्धयः स्वयमुपतिष्ठन्ते।

योगसाधनेन स्वस्वरूपोपलब्धौ जातायामपि पूर्वसंस्कारजन्यां व्युत्थानदशामधिगतवता योगिना सिद्धयः स्वत एव प्रतिपाद्यन्ते। वस्तुतः समादिजन्ये मुक्तिपदे सिद्धयो विघ्नकारिण्य एव सन्ति। अत एव चञ्चलचेतसो योगिन एव सिद्धिमपेक्षन्ते। सर्वा अपि ताः समाधेर्नित्यानन्दशुद्धाद्वैतदशायां प्रत्यूहजनिका एव। अत एव योगिनं सावधानीकर्तुं भगवता पतञ्जलिना विभूतिपादे – ताः समाधावुपसर्गा व्युत्थाने सिद्धयः (३।२७) इति योगसूत्रमाविष्कृतम्। यद्यपि व्युत्थानदशाजनितासु सिद्धिषु समातिष्ठन् जडभरतवद् विपन्नो भवितुमर्हतीति प्रधान्येन समुन्नतयोगिनं सावधानीकर्तुं

सिद्धान्तोऽयं निर्णीतः। अतो लौकिक्यश्च सर्वविधा अपि सिद्धयो मुमुक्षुभि हेया एव। तथा चोक्तं श्रीधीशगीतायाम् –

महतो ज्ञानिनश्चैव योगिनोऽपि तपस्विनः।
सिद्धिः सार्थैरनेकै र्हिं मोहयन्ती निरन्तरम्।।
आवागमनचक्रेऽस्मिन् स्वविलासात्मके मुहुः।
मोक्षमार्गं च रुन्धाना धूर्णयेद्वै समन्ततः।।

वस्तुतः सिद्धयः परमार्थमार्गे वाधिका एव सन्ति। अतः सिद्धिर्न वाञ्छनीया, तत्प्राप्त्या मुमक्षुयोगिनां योगमार्गेऽन्तराया आविर्भवन्ति। सिद्धिभ्यः सकामानां साधकानामभ्युदयस्त्ववश्यं भवति, परन्तु मुमुक्षूणां कृते वाधिका एव भवन्ति ताः, न साधिकाः -

सर्वस्याभ्युदयस्यापि बीजेषु योगसिद्धिषु।
मत्स्यायुज्यदशप्राप्तौ वाधिकास्ता न साधिकाः।।४।१३।।

यस्य चित्तवृत्तिर्भगवदुन्मुखा न भवति, यस्मिन्नल्पीयस्यपि विषमासक्तिर्विद्यते, एवम्भूतेन पुंसा यदि सिद्धय उपलब्धाः स्यूः, तर्हि ताभिस्तस्याभिमानं वर्धते। विषयप्राप्तौ भोगे च सिद्धोनामुपयोगो भवति, येन , भोगे वाधाया आशङ्कोपतिष्ठते। तस्या विनाशे सिद्धय उपयुज्यन्ते। परिणामे साधकः कंस-रावण-हिरण्यकशिपुवदसुरभावापन्नतया क्रूरो भवति। अतः प्राप्तासु सिद्धिषु साधकस्तत्र न रमेतः, अपि तु ता विघ्नरूपा इति मत्वा परित्यजेत्। अत एव साधका ब्रह्मलोकभोगमपि प्राप्य ब्रह्मसामर्थ्यं वोपलम्य सिद्धिभ्यः

पृथक् तिष्ठन्ति। तेषां कृते वास्तविकी सिद्धिस्त्वन्तःकरणस्य सम्यकं शुद्धिरेवास्ति। यत्र भगवदतिरिक्तस्य कस्यापि स्थानं नास्ति –

अन्तरायान् वदन्त्येता युञ्जतो योगमुत्तमम्।
मया सम्पाद्यमानस्य कालक्षमणहेतवः।।
जन्मौषधितपोमन्त्रैर्यावतीरिह सिद्धयः।
योगेनप्नोति ताः सर्वा नान्यैर्योगगतिं ब्रजेत्।।

(श्री. भा. ११।१५।३३-३४)

योगसूत्रे च जन्मौषधिमण्त्रतपःसमाधिआः सिद्धयः (४।१) इति सूत्रयता भगवता पतञ्जलिना तु पञ्चविधाः सिद्धयः प्रोक्ताः। तत्र जन्मतः सिद्धिर्यथा परमहंसशुकदेवे महर्षिकपिलादौ च जन्मत एव सिद्धिरुत्पन्ना। औषधादिनापि सिद्धयः समुत्पद्यन्ते, यथा रसायनादिना ताम्रसुवर्णनिर्माणं कायाकल्पकरैरौषधैश्च जरानाशपूर्वकं दीर्घायुष्ह्राप्राप्तिर्यथा महर्षेश्च्यव नस्य। मन्त्रैरपि सिद्धिः प्राप्यते, यथा गुटिकादिसिद्धिद्वारा आकाशगमनम्, तान्त्रिकमन्त्रसाधनेन मारणम्, वशीकरणाम्, उच्चाटनादिकार्यञ्च। तपसाऽपि सिद्धिरधिगम्यते। यथा तपःसाधनेन विश्वामित्रस्य ब्राह्मणत्वाधिगम्। भक्तप्रधानस्य नन्दिकेश्वरस् मनुष्यतो देवत्वप्राप्तिश्च। समाधितः सर्वविधसिद्धिलाभस्तु योगसूत्र तृतीयपादे विस्तृतः प्रदर्शितः। सर्वा अपि सिद्धयः समाधिसिद्धोर्विघ्नस्वरूपा एव। यतः सर्वासामपि साहाय्यकारि साधनं समाधिरेव। यतः शुकदेवादिभिः प्राक् साधनानि कृतानि, अतो वर्तमानजन्मनि सिद्धिरधिगता। औषधादिनापि शरीरं तादृशमेव जायते यादृशं समाधिना संपद्यते।

राज्ञः शर्यातेः कन्यया सुकन्यया बालसुलभचापल्येनारण्ये यदा महर्षेश्च्यवनस्य चक्षुषी कण्टकेन विद्धे तदा शर्यातेः सैनिकानां शकृन्मूत्रनिरोधोऽभवत्। तदुक्तं श्रीमद्भागवते - शकृन्मूत्रनिरोधोऽभूत् सैनिकानां च तत्क्षणात् (९।३।५)

अपि च शर्यातेः सोमयज्ञे महर्षिणा च्यवनेन स्वतपः प्रभावेणासोमपावप्यश्विनीकुमारौ सौमं पायितौ, तमसहमानो देवराजस्तौ हन्तुं यदा वज्रमाददे, तदा महर्षिश्च्यवनः सवज्रमिन्द्रस्य वाहुं स्तम्भयामास –

हन्तुं तमाददे वज्रं सद्यो मन्युरमर्षितः।
सवज्रं स्तम्भयामास भुजमिन्द्रस्य भार्गवः।।

(श्री. भा. ९।३.२५)

इदं सर्वं पर्यालीच्य महर्षेश्च्यवनस्य तपःसिद्धौ न कश्चिदस्ति सन्देहलेशः।

भगवन्तं श्रीरामं परावर्तयितुकामाय सेनापरिजनयुताय भरताय सिद्धैश्वर्येण भरद्वाजेन महर्षिणा विहितं सार्वभौमेनापि राज्ञा विधातुमशक्यमातिथ्यं दर्शं दर्शं कस्य सचेतसो योगसिद्धिविषये सन्देहकलङ्कपङ्कलेशः सम्भवेत् ?

श्रीरामं साक्षात्कर्तुं चित्रकूटगमवसमये तीर्थराजे प्रयागे भरद्वाजाश्रमे निवासाय कृतमति ङरतं भरद्वाजो निमन्त्र्य यज्ञशालां प्रविश्य आचम्यनेत्रे प्रमृज्य प्रणम्य च निखिलशिल्पकलाकोविदं विश्वकर्माणमाहूयातिथ्यसामग्रीसम्पादनाय समाज्ञप्तवान्। अत महर्षिणाज्ञप्तः स तत्कालं विविधां शयनाशनोपवेशनादिभिरद्भुमातिथ्यसामग्रीमुपस्थापयामासष ततो दिव्यात् अपूर्वत्वात्, अत्याश्चर्यजनकत्वात्, द्रागुत्पन्नविविधविचित्रवस्तुसमूहत्वाच्च सर्वे विस्मिता अभूवन्।

तत्तत्पुराणेषु निर्दिष्टा विश्वामित्रवशिष्ठयोरनेकाः सिद्धयः कस्याश्चर्यजनिका न भवन्ति। तपःसिद्धिप्रभावादेव विश्वामित्रेणाभिनवा सृष्टिः कृता, स्वर्गात् पात्यमानोऽपि त्रिशङ्कुरन्तराले स्थापितः।

आज्ञा गुरुणामविलङ्घनीया इति सिद्धान्तेषु पितुर्यदग्नेराज्ञया मातृ रेणुकायाः परशुरामेण शिरसि छिन्ने आज्ञापरिपालनात् प्रसन्नेन पित्रा जमदग्निना तपःसिद्धया रेणुका पुनरुज्जीविता। तपः सिद्धिप्रभावेणैव राज्ञा भगीरथेन भव्या भगवती भागीरथी भूतले समानीयास्माकं दृग्गोचरीकृता। तपःसिद्ध्यैवागस्त्येन दुर्धर्षोऽपि समुद्रश्चुलुकीकृतः। समाधिसिद्धेः पूर्णः प्रभावो दधीचिमुनिद्वारा स्वास्थिप्रदानसमये दृश्यते। सादरं देवैः प्रार्थित इन्द्रस्य वज्रनिर्माणार्थं परोपकारबुध्यास्थिप्रदानायोद्यतो महर्षिर्दधीचिर्यदा परे ब्रह्मणि मनःसंयोज्य समाधावस्थितः, तदा स गतं शरीरमपि नाज्ञातवान् धन्या स्वल्पस्माकं पूर्वजा ये परोपकाराय स्वशरीरस्थमस्थ्यपि सहर्षं प्रायच्छन्, किमुत धनादिकस् –

यताक्षासुमनोबुद्धिस्तत्त्वदृक् स्वस्तवन्धनः।
आस्थितः परमं योगं न देहं वुवुधे गतम्।।

(श्रीमद्भागवते ६।१०।१२)

मैथिलीमन्वेष्टुं लङ्कां गच्छतो भगवतो हनुमतो मध्येसमुद्रं सुरसया सह जाते साक्षात्कारे भूयोभूयस्तपेक्षया द्विगुणितां कायवृद्धिं दर्शं दर्शमुभयोः कायवृद्धिसिद्धौ न भवितुमर्हति कस्यापि कापि विचिकित्सा। पुनरग्रे सिंहिकासाक्षात्कारे संक्षिप्य मुहुरात्मानं निपपात महाकविः (वा. रा. ५।१।१८२) भूयो लङ्काप्रवेशसमये तां दुष्प्रवेश्यां मत्वा देहं संक्षिप्य मार्दारमात्रशरीरो भूत्वा प्रविवेश। एवमशोकवाटिकायां सन्दिहानायाः सीतायाः समक्षं कामावसायित्वसिद्धिं प्रदर्शयितुमुद्यतो भगवान् हनूमानुवाच –

न मे जानाति सत्त्वं वा प्रभावं वासितेक्षणा।

तस्मात् पश्यतु वैदेही यद्रूपं मम कामतः।।

(वा. रा. २६।३४)

एवं लङ्कायां यत्र तत्र हनूमतः शरीरस्य संकोचविकासौ दृष्ट्वा तत्राष्टविधमिद्धिसद्भावे न कश्चिदस्ति सन्देहलेशः। योगसिद्धिप्रभावात् प्रकृतिर्योगिनां वश्या भवति, प्रकृतेस्तद्वश्यत्वाद् योगिभिः कायस्य महत्त्वह्रस्वत्वादिकं सर्वं कर्तुं पार्यते।

योगसिद्धिषप बह्वयः सिद्धय आत्मज्ञानिनां यैगिनामेव भवन्ति, कियन्त्योऽज्ञानिनामपि भवन्ति। आत्मज्ञानहीनाः साधकाः सिद्धिमुपगता भ्रष्टा भवन्ति। यतस्ते सांसारिकसुखप्राप्तये ता उपयुञ्जते, परिणामे आत्मोन्नतिच्युतासस्ते भवन्ति, किन्त्वाऩत्मवेत्तार आत्मोपलब्धौ सदाऽग्रेसरीभवन्त्येव। अत एवोक्तं हरिवंशे हरिवंशपर्वणि – योगो हि दुर्लभो नित्यमल्पप्रज्ञैर्न संशय। (१८।१५)

वस्तुतः पुराणसिद्धान्तानुसारं सर्वैश्वर्यसम्पन्नस्य भगवतोऽनुकम्पया शमादिसम्पन्नेषु यमनियमादिना विशुद्धहृदयेषु भगवद्भक्तेषु सर्वाः सिद्धयोऽनायासमेवोपतिष्ठन्तै। अत एव पर्वतात् पात्यमानस्यापि प्रह्लादस्य न कापि क्षतिरजायत, नापि हस्तिना ताड्यमानस्य तस्य काऽपि वेदनाभवत्, न च विषमोदकभक्षणेनापि किञ्चिदनिष्टं जातम्, न वा ब्रह्मणः प्राप्तवरयापि होलिकाया सहाग्नौ दह्यमानस्य तस्य शरीरं दग्धुं वह्निः प्राभवत्। पुराणेषु स्थले स्थलेऽवतारधारिणां रामकृष्णादीनां महापुरुषाणां सिद्धेर्दर्शनं तु बोभूयत एव।

ब्रह्मवैवर्तपुराणे श्रीकृष्णजन्मखण्डे द्वाविंशतिधा सिद्धयो नामग्राहं गृहिताः सन्ति यथा –

१. अणिमासिद्धिः
२. लघिमासिद्धिः
३. प्राप्तिसिद्धिः
४. प्राकाम्यसिद्धिः
५. महिमासिद्धिः
६. ईशित्वसिद्धिः
७. वशित्वसिद्धिः
८. कामावसायित्वसिद्धिः
९. दूरश्रवणसिद्धिः
१०. परकायप्रवेशसिद्धिः
११. मनोजवित्वसिद्धिः
१२. सर्वज्ञत्वसिद्धिः
१३. अभीष्टसिद्धिः
१४. अग्निस्तम्भनसिद्धिः
१५. जलस्तम्भनसिद्धिः
१६. चिरजीवित्वसिद्धिः
१७. वायुस्तम्भवसिद्धिः
१८. क्षुत्पिपासानिद्रास्तम्भनसिद्धिः
१९. वाक्सिद्धिः
२०. मृतानयनसिद्धिः
२१. सृष्टिकरणसिद्धिः
२२. प्राणाकर्षणसिद्धिश्च

तदनन्तरं सर्वसिद्धिप्रदां मन्त्रसिद्धिमुद्दिश्य तत्प्राप्त्युपायोऽपि तत्र दर्शितः –

अनेन योगिनः सिद्धाः मुनीन्द्राश्च सुरास्तथा।
शतलक्षजपेनैव मन्त्रसिद्धिर्भवेत् सताम्।।

एवं मार्कण्डेयपुराणस्य चत्वारिंशदध्याये सलक्षणमष्टसिद्धीनामुल्लेखः कृतोऽस्ति(४०।३०-३४)

शिवपुराणे उमासंहितायां षड्विंशाध्याये सप्तविंशाध्याये च सिद्धीनां स्वरूपं फलञ्च प्रदर्शितमस्ति। तत्रोक्तं यत् – यः प्रतिदिनमेकाग्रचेतस् औङ्कारस्याभ्यासंकरोति तस्य किञ्चिचदप्यसाध्यं न भवति, मनोवाञ्छिताः सिद्धयो जायन्ते, सः सर्वज्ञः समदर्शी स्वेच्छानुसारं रूपं धृत्वा सर्वत्र विहरति, कदाचिदपि विकारैर्नाभिभूयते। स सा7च्छिव एव भवति, इत्यत्र न काचित् संशीतिः।

भ्रुवोमध्ये ललाटवर्तिनं बालसूर्यतेजसमग्निं साक्षात्कृत्य योगी इच्छानुसारं रूपधारणसामर्थ्यवान् सन् यथेच्छं शरीरं धृत्वा क्रीडति। स कारणतत्त्वं शान्त्ववित्वान्यशरीरे च प्रवेष्टुमणिमादिसिद्धीः प्राप्तुं सर्वं द्रष्टुं ब्रूरस्थं शब्दं श्रोतुमाकाशे विचरितुं च सिद्धीः प्राण्णोति। सूर्यप्रभवं महाज्योतिर्मयं महापुरुषं मां ज्ञात्वा साधको मृत्युमतिक्राम्यति, मोक्षलाभाय ततोऽन्ये न कश्चिद् मार्गोऽस्ति।(२७।२५)

महाबारते तु स्थले स्थले योगसिद्धेः प्रभावो दृश्यते, विशेषतः शान्तिपर्वणि (३२०) अध्याये सिद्धेश्चर्चा कृतास्ति। यत्र राज्ञो धर्मध्वजस्य जनकस्य ज्ञानपरीक्षार्थं मिथिलामुपस्थाय सुलभानाम्नी काचिद् योगिनी भिक्षाचर्चाव्यजेन तत्साक्षात्कारं कृतवती। तेन कृतातिथ्या गृहीतभोजना विद्वत्सभामध्ये मन्त्रिभिः परिवृतत मोक्षनिषये

जिज्ञासमानाऽपि जनकस् जीवन्मुक्तत्वे सन्दिहाना सा स्वयोगशक्तिवलेन स्सूक्ष्मबुद्धिद्वारा जनकस्य शरीरे प्रविष्टा सती निजनेत्रद्वारा रात्रो नेत्रकिरणानि संयम्य योगवलेन तच्चितत्तं वद्ध्वा वशीचकार। सोऽपि तत्प्रभावं ज्ञात्वा स्वभावद्वारा तद्भावं गृहीत्वा अतिष्ठत्। तदनन्तरं तयोः प्रश्नोत्तरमजायत –

सुलभा त्वस्य धर्मेषु मुक्तो नेति ससंशया।
सत्त्वं सत्त्वेन योगज्ञा प्रविवेश महीपतेः।।
नेत्राभ्यां नेत्रयरस्य राश्मीन् संयम्य रश्मिभिः।
सा स्मितं चोदयन्ती योगगन्धैर्ववन्ध ह।।
जनकोऽप्युत्सयन् राजा भावमस्या नृपोत्तम।।
प्रतिजग्राह भावेषु भावमस्या नृपोत्तम।।
तदेकस्मिन्नधिष्ठाने संवादः श्रूयतामयम्।
छत्रादिषु विमुक्तस्य मुक्तायाश्च त्रिदण्डिके।।

(म.भा.शा.प. ३२०।१६।१९)

योगसिद्धिप्रभावादेव व्यासेन सञ्जायाय दिव्यदृष्टिः प्रदत्ता, यो दूरस्थोऽपि समस्तं महाभारतयुद्धमपश्यत्।

योगिनो योगमग्रेसरतो येऽन्तरायाः समुद्भवन्ति ते योगविघ्नशब्देनोच्यन्ते। जीवो हि स्वभाववलेन दृष्टानुश्रविकविषयान् सेवमानः साधनवलेन भगवत्कृपावलेन च योगमार्गेऽग्रसरो भवति। तथापि योगिनो दृष्टानुश्रविकाविषया न जहति, तत्र तस्मिन्

शुभमार्गे तस्य योगिनः स्वत एव या उच्चविषयभोगोपयोगिनी दैवी शक्ति रुदेति सा योगसिद्धिरित्याम्नायते।

सिद्धीनामनेकविधत्वेऽपि अध्यात्माधिदैवाभिभूतभेदेन त्रैविध्यमेवोह्यम्। तत्र मन्त्रौषधिप्रभृतयो हि आधिभौतिकाः सिद्धयः, अणिमालघिमादयः आधिदैविक्यः कथ्यन्ते, वेदाविर्भावशास्त्रप्रकाशनशक्तिप्रभृतयो वौद्धाः सिद्धयः आध्यात्मिक्यो ज्ञेयाः। एषां शारीरिक-मानसिक-बौद्धशक्तिविशेषाणां सर्वविधाभिरपि सिद्धिभिः सम्बन्धो ज्ञेयः। अत्रैव यदि योगी योगमार्गे व्रजन् आसां सिद्धीनां मध्ये कुत्रापि स्खलन्नासक्तो भवेच्चेत्तर्हि तस्य पतनमवश्यंभावि भवति।

यदा योगिषु इमा दैवशक्तिरूपा योगसिद्धयो विराजमाना भवन्ति तदा तेषां योगिनां सिद्धप्रदर्शनेच्छाविरहेऽपि कुलकामिनीनामङ्गदर्शनवत् कदाचित् अन्येषामपि ताः सिद्धयो दृष्टिपथमारोहन्ति एव। यथा हि कुलाङ्गना पुरुषान्तरं स्वाङ्गं नैव दर्शयति, या प्रदर्शयति सा तु कुलटा व्यभिचारिणी वा निगद्यन्ते। एवं सत्यपि कुलाङ्गनायाः निजपितृ-भातृ-पुत्रादिभ्यो भोजनपरिवेशणादिसेवाव्यग्रतायाः कदाचन वायुवेगवशाद् वस्त्राञ्चले देधूयमानेऽनिच्छयापि पुरुषान्तरैस्तदङ्गदर्शनं क्रियते तथैव परवैराग्यशालिनोऽपि योगिनौऽप्यनिच्छयैव योगसिद्धयः कदाचित् प्रसङ्गवशात् पुरुषान्तराणां दृष्टिपथमृच्छन्ति चेन्न तद्विरुद्धं मन्यते। यदि तु सा योगी तासु लब्धासु सिद्धिषु समासक्तो भूत्वा तत्सामाराधनपरायणः स्यात्तर्हि तत्पतनं नूनं भवेदिति निश्चप्रचम्।

ब्रह्माण्डपुराणस्य उपसंहारपादेऽपि ललितादेव्याः स्तूत्या सौभाग्यं यशः अष्टौ सिद्धीश्च प्राप्नोति साधकः इत्युक्तमस्ति –

स्तुवन्ति ये महाभागां ललितांपरमेश्वरीम्।

ते प्राप्नुवन्ति सौभाग्यमष्टौ सिद्धीर्महद् यशः।। १८।१८

यावत्यो हि सिद्धयः श्रूयन्ते ताः सर्वा अपि त्रिधा विभक्तुं शक्यन्ते। तत्र प्रथमा ज्ञानसम्बन्धिनी सिद्दिराध्यात्मिकी निगद्यते, द्वितीया कर्मसम्बन्धिनीसिद्धिः आदिदैविकी सिद्धिः कथ्यते, तृतीया स्थूलपदार्थसम्बन्धिनी सिद्धिश्च आधिभौतिकी प्रोच्यते। आसां विविधानामपि सिद्धीनां दैवे जगति या आधिदैविकस्वरूपा देव्यः सन्ति ता अपि त्रिविधा शब्दवाच्याः। तन्त्रान्तरेषु पुराणेषु च त्रिविधविद्यानां कृपाप्राप्तये तासां वशीवरणेन च सिद्ध्यवाप्तये वहव उपायाः विवेचिताः। तत्र तिसृणामपि सिद्धनां प्राप्तौ यानि साधनानि अनुष्ठीयन्ते, तानि योगमूलकानि तपोमूलकानि वा भवन्ति। तत्साधनवेलायाञ्च क्षमा-मौन-संयमानामालम्बनं सर्वथाऽऽवश्यकम्।

आसां तिसृणां विद्यानां च महात्म्यमीदृगुन्नतं विद्यते यत् उन्नतोन्नता अपि देवा एकाधारेण अधिगन्तुं नार्हन्ति। यथा आध्यात्मिक्यः शक्तयोः महत्सु ऋषिषु समुपलभ्यन्ते, परन्तु ता एव सर्वेष्वपि भगवदवतारेषु नासाद्यन्ते। इत्थमेव या नानाविधा आधिदैव्यः सिद्धयो भगवदवतरेषु प्राप्यन्ते, न ता एव ऋषिषु समासाद्यन्ते। अतस्तासां सर्वासामपि एकाधारेण प्रकाशोऽसम्भव एव प्रतिभाति अस्मादेव हेतोः महर्षेर्विश्वामित्रस्यापि सिद्धीनां प्राप्तौ अनेके विघ्नाः संजाताः। तथापि विश्वामित्रमहर्षेः तपसोऽसाधारण्यं सर्वजगत्प्रसिद्धमेव। यतो हि स महात्मा एकास्मिन्नेव जन्मनि क्षक्षियशरीरं परिवर्त्य ब्राह्मणशरीरमधिगतवान् राजर्षितो ब्रह्मर्षिर्वभूव।

**भारतीयवाङ्मये व्रतोत्सव प्रचलनविमर्शः**

समस्ते संसारे व्रतान्युत्सवाः पर्वाणि च कस्मिंचिन्नियतसमये एव भवन्ति। अतस्तत्तद्देशीयव्रतोत्सवादीनां ज्ञानाय तत्र प्रचलितानां कालविभागानां ज्ञानमत्यावश्यकस्ति। एतन्नियमानुसारं यावद् भारतीयकालविबागस्य सम्यग् ज्ञानं न भवेत् तावद् भारतीयव्रतोत्सवादीनां विज्ञानरहस्यं न स्फूटीभवितुमर्हति।

भारतीयव्रतोत्सवादिषु संवत्सर-अयन-ऋतु-मास-पक्ष-तिथि-वार-नक्षत्रात्मकः, अष्टप्रकारकः काल उपयुज्यते। एकस्मिन् संवत्सरे षण्णाम् ऋतूनां परिवर्तो भवति। तथा चोक्तं क्षीरस्वामिना अमरकोषव्याख्यायाम् – सर्वर्तुपरिवर्तस्तु स्मृतः संवत्सरो बुधैः (कालवर्गः २०) इति। निरुक्ते यास्काचार्यस्तु – संवत्सरः वसन्तेऽस्मिन् भूतानि (४।४।२७) सर्वेषामृतूनामेकवारं परिवर्तने यावान् समयो व्यत्येति तावान् कालः संवत्सरो ज्ञेयः इत्युक्तवान्।

यद्यपि संवत्सरः सावन-सौर-चान्द्र-नाक्षत्र-बार्हस्पत्यभेदेन पञ्चधा भवति। तथापि भारतीयब्रतोत्सवेषु चान्द्रसंवत्सरस्यैव प्राय उपयोगो भवति। वङ्ग-नेपाल-पञ्जावप्रान्तेषि सौरं वर्षमधिकं व्यवह्रियते। संवत्सरः सूर्यस्य परिभ्रमणेन सम्बद्धोऽस्ति। अतो भगवान् सूर्यः संवत्सरात्मकस्य कालस्य अधिदेवताऽस्ति। यदि सूर्यो नोदियात् तदा संवत्सरात्मकस्य कालस्य अधिदेवताऽस्ति। यदि सूर्यो नोदियात् तदा संवत्सरो न सम्भवेत्, नापि कालज्ञानं जायते। अतः एवेक्तम् ऋग्वेदे –

सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा।

त्रिनाभि चक्रभजरमनर्वे .त्रेमा विशवा भूवनाधितस्थुः।। (२।३।१४)

सूर्यस्य गतिरयनं कथ्यते। एकस्मिन् संवत्सरेऽयनद्वयं भवति, दक्षिणायनमुत्तरायणञ्च। सूर्योहि कर्कसंक्रान्तित धनसंक्रान्तिपर्यन्तं दक्षिणायनं भवति, तत्र श्रावण-भाद्रपद-आश्विन-कार्तिक-मार्गशीर्ष-पौषाख्याःषण्मासा व्यतियन्ति। मकरसंक्रान्तितो मिथुनसंक्रान्ति यावद् उत्तरायणमुच्यते, अत्र माघ-फाल्गुन-चैत-वैशाख-ज्येष्ठाढाख्याः षण्मासा भवन्ति। उत्तरायणे दिनानि वृहन्ति भवन्ति। अतोऽत्रप्रकाशाधिक्यं जायते। दक्षिणायने च रात्रिर्वर्द्धतेऽहश्चापचीयते। तत्र रात्रेर्महतीत्वाद् अन्धकाराधिक्यं भवति। प्रकाशो देवस्वरूपोऽन्धकारश्चासुररूपो मन्यते। अत एवोत्तरायणं देवानां दिनं दक्षिणायनञ्च रात्रिरभिमताऽस्ति। प्रकाशप्राधान्येन देवानां दिनत्वादुत्तरायणं शुभकृत्येषु प्रशस्ततरं मन्यते। हिन्दूनां समस्तानि शुभकृत्यानि उत्तरायणे एव प्रशस्तानि भवन्ति।

चैत्रे मासि जगद् ब्रह्मा ससर्ज प्रथमेऽहनि।

शुक्लपक्षे समग्रं तु तदा सूर्योदये सति।।१।२५।।

इति ब्रह्मपुराणवचनानुसारं ब्रह्मदेलश्चैत्रमासस्य शुक्लपक्षे प्रतिपदि तिथौ सूर्योदयसमये दृश्यमानस्यास्य प्रपञ्चस्य सृष्टि समारब्धवान्। अत इयं तितिर्वत्सरारम्भस्य प्रथमं दिनं मन्यते।

यद्यपि वत्सरारम्भदिवसविषयेऽनेकानि मतानि प्रचलितानि। केचन मार्गशीर्षमासमेव वत्सरारम्भं मन्यन्ते। अत एव अग्रेहायनमस्येति व्युत्पत्त्या मार्गशीर्षस्याग्रहायणमप्येकं नाम प्रचलितमस्ति। केचिच्च शरदृतौ वर्षर्तौ वा वत्सरारम्भं स्वीकुर्वन्ति। अत एव तेषां मते संवत्सरस्य शरद् वर्ष वा नामान्तरमुपलभ्यते। तथापि

पूर्वोक्तपुराणवचनप्रामाण्यात् चैत्रमास एवाधिकतया। वर्षारम्भोऽभिमतः शास्त्रविदां समाजे।

अपि च, चैत्राद्वर्षारम्भो वैज्ञानिकोऽप्यस्ति। यतो हि चैत-वैशाकौ वसन्तर्तुरुच्यते। वसन्तश्च नवीनपत्रपुष्पादिद्वारा प्रकृतेर्नवश्रृङ्गारसामग्रीसमुपस्थापकः सुरभितसुमनसमूह-सुशोभिकमधुरतामयमधुमासप्रवर्तकश्चारुचन्द्रिकाचमत्कृतिकारक ऋतुराजोऽस्ति। वसन्ते हि वृक्षलतादो जीर्णशीर्णानि पर्णानि विमुच्य नवीनैरङ्कुरपुष्पफलोग्दमैरानन्दयन्ति समस्तं संसारम्। अतो वसन्ते एव वर्षारम्भः समुचितः प्रतिभाति।

फाल्गुनशुक्लपूर्णिमायां होलिकादाहं कृत्वा चैतकृष्णप्रतिपदि होलिकामहोत्सवः क्रियते। शीते व्यतीते वसन्तकालस्योपस्थितौ चन्दनेन सह आम्रमञ्जरीप्राशनेन मानवो वर्षपर्यन्तं सुखी भवति। यथा वैशाखेऽक्षमतृतीयायां सत्ययुगस्यारम्भात् तद्दिनस्याधिकं महत्त्वपूर्णः मस्ति, तथैव चान्द्रामासानुसारं वसन्ते वर्षारम्भस्याधिको महिमा विद्यते। यथा मनुष्याः स्वजन्मतिथीनामुत्सवं कुर्वन्ति, तथैव नवीनवर्षात्मकस्य कालस्य प्रारम्भे होलिकोत्सवं कुर्वन्ति, येनाग्रिमे वर्षे महदानन्दस्य कारणं स्यात्। अत्रोत्सवे शुभकामनया सर्वैः समानरूपेण सहर्षं मिलित्वा सर्वत्र प्रेमव्यवहारस्य प्रथा प्रचलिताऽस्ति। अस्मादेव समयाद् ऋतुराजस्य वसन्तस्यारम्भो जायतेऽतोहोलिकोत्सवो महत्त्वपूर्ण पर्वास्ति। विधिपूर्वकं होलिकोत्सवस्य सम्पादनेन वर्षपर्यन्तमासुरबाधाया निराकरणं भवति। पुराणेषु लिकितमस्ति यदस्मिन्नेव दिने भक्तराजं प्रह्लादं वह्नौ भस्मसात्कर्तुं तस्य पितृस्वस्रा होलिकया महान् प्रयत्नः कृत आसीत्, किन्तु कर्तुमकर्तुमन्यथाकर्तुं सर्वथा सामर्थस्य

अघटितघटापटीयसो भगवतो विष्णोः कृपया तस्या किमप्यनिष्टं न जातम्, प्रत्युत सा दुष्ठा राक्षसी स्वयमेव भस्मसादभूत्।

भविष्योत्तरपुराणे एका आख्यायिका उपलभ्यते। तदनुसारं दुण्ढानाम्न्या राक्षस्या दमनार्थे महोत्सवोऽयं समारब्धः। कुत्रचिद् होलिकोत्सवोऽयं कामदमनमूलको महोत्सवो मन्यते। अस्मिन्नेन दिने जगत्संहर्ता भगवान् सदाशिवः स्वकीयललाटस्थातृतीयनेत्रान्निर्गतेन क्रोधाग्निना जगद्विजयिनं मदनं भस्मासात् कृतवान्। अतो महोत्सवस्यास्य महत्त्वमधिकमस्ति। अपि च, अस्मिन्नेव दिने विष्णोः पूर्णवतारस्य भगवतः श्रीकृष्णचन्द्रस्य राधया सह दोलोत्सवो मृत्युलोके प्रारब्धः, यो हि गोलोके नित्यं प्रचलति। एभिः कारणकलापैरेकस्य वर्षस्यान्तेऽग्रिमस्य च वर्षस्य प्रारम्भे परमानन्दजनकोऽयं यहोत्सवो महता समुल्लासेन मन्यते भारतवर्षे सर्वैं मनुष्यैः।

वेदकालत एव भारतीयसमाजो ब्राह्मण-क्षत्रिय-वैश्य-शूद्रभेदेन चतुर्षु भागेषु विभक्तोऽस्ति। ये चत्वारो वर्णाः कथ्यन्ते। एषु चतुर्षु ब्राह्मणानां प्रधानं पर्व द्विजातीनां मुख्यकर्मणा वेदाध्ययनेन सह सम्बद्धं श्रावणीकर्मास्ति, रक्षाबन्धनञ्च समस्तस्य समाजस्य शुभाशंसया संबद्धं द्रवर्तते। विजयदशमी क्षत्रीयाणां मुख्यं पर्व विद्यते, यतो हि तत्र शास्त्रादीनां प्रामुख्यमस्ति। दीपावली वैश्यानां मान्यं पर्व विद्यते, यतो हि तत्र ळक्ष्मीपूजनं वैभवप्रदर्शनञ्च मुख्यमस्ति। होलिकामहोत्सवश्च शूद्राणां प्रधानं पर्व विद्यते, यतोऽत्र गालीप्रदानपूरवकं मनोविनोदस्य पारस्परिकामोदप्रमोदयोः सम्पर्कस्य च प्रामुख्यमस्ति। एवं विभागे सत्यपि सर्वेषु पर्वसु समेषां भारतीययानां जनानां निश्चप्रचं समानः समादरो दृश्यते। एवं चतुर्णां वर्णानां तत्तत्पर्वभिः विशषतसम्वन्धस्य विद्यमानत्वेऽपि यस्य

कस्याप्येकस्य वर्णस्य कार्यं समस्तस्य कार्यमस्ति। अत एव सर्वे वर्णाः सर्वेषां व्रतोत्सवादीनां सहर्ष समानं मानं कुर्वन्ति, यथासम्भवं स्वशक्त्या तदनुतिष्ठन्ति सम्यग्व्यहरन्ति च।

सर्गादौ भगवता प्रजापतिना यज्ञसहिताः प्रजा सृष्ट्वा प्रोक्तं यदनेन यज्ञेन यूयमुत्तरोत्तरामभिवृद्धि लभध्वम्। एष यज्ञाख्यो धर्मो नवनवानां वस्तुनामुत्पादनद्वारा युष्माकमभिमतानि पूरयिष्यति –

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेव वोऽस्त्विष्टकामधुक्।। (गीता ३।१)

यज्ञेन यज्ञमयजन्त देवाः इति यजुर्वेदमंत्रानुसारं मानवानां कल्यानार्थे प्रथमं देवैरेव यज्ञः समारब्धः। अतो यज्ञो मानवानां मुख्यो धर्मः प्रतिपादतोऽस्ति। शास्त्रेषु दानस्या-त्यत्रिशयमहत्वमङ्कितमस्ति। वृहदारण्कोपनिषद्येकमतिसुन्दररमुपाख्यानमुपलभ्यते।

एकदा देवा मनुषाया असुराश्च प्रजापतेः समीपमुपस्थाय उपदेशार्थं प्रार्थनां चक्रुः। ततस्तेन प्रत्येकं द.द.द. इत्युक्त्वा ते पृष्टा अवगतं भवद्भिः ? तदनुतैरुक्तम् – औँ अवगतमस्माभिः, भवता अस्मान् प्रति क्रमशः दाम्यथ दत्त, दयध्यमित्युक्तम्। तदैव दैवी वागपि तमेवार्थमनुजगाद। तदेतदैवैषा दैवी वागनुवदति स्तनयिष्णुः द. द. द. इति दाम्यथ, दत्त, दयध्वमिति, तदेत् त्रयं शिक्षेरन् दमं दानं दयामिति ५।१। अस्मिन् उपाख्याने देवसदृशेभ्य उत्कृष्टपुरुषेभ्य इन्द्रियजयस्य, असुरेभ्यः क्रुरताप्रधानहिंसकपुरुषेभ्यो दयायाः, साधारणपुरुषएभ्यो दानस्य चोपदेशो दत्तोऽस्ति। अतः श्रुत्यनुसारं सर्वैर्यथाशक्ति दानमवश्यं प्रदेयम्।

कर्मयोगे यावत्तपसोऽस्ति महत्त्वं न तावदस्त्यन्यस्य कस्यापि। उपनिषत्सु स्थाने स्थाने तपसो महत्त्व प्रदर्शितमस्ति। श्रीमद्भागवते लिखितमस्ति यत् सर्गादौ लोकपितामहो भगवान् ब्रह्मा सृष्ट्यर्थं स्वमनसि चिन्तयन् त. प. इत्यक्षरद्वयं श्रुतवान्, यदकिञ्चनानां परमं धनमुच्यते –

स चिन्तयन् द्व्यक्षरमेकदाम्भस्यूपशृणोद् बचो विभुः।

स्पर्शेषु यत्षोडशमेकविंशं निष्कञ्चनानां नृप, यद्धनं विदुः।। २।९।६

तदनुसारं विधाता दुश्चरं तपश्चचार। परिणामे प्रसन्नो भूत्वा भगवान् आविर्भूय प्रोवाच – तपः साक्षाद् मम हृदयमस्ति। अहञ्च तपस प्रात्मास्मि। अहं तपसैवेदं जगत् सृजामि पालयामि संहरामि च –

तपो मे हृदयं साक्षादात्साहं तपसोऽनघ।

सृजामि तपसैवेदं ग्रसामि तपसा पुनः।।

विभर्मि तपसा पूर्वं वीर्यं मे दुश्चरं तपः।।

तपो हि प्राचीनस्य भारतस्यामूल्यो निधिरासीत्। ऋषयस्तु तपोधना एवोच्यन्ते स्म, न केवलमृषय एव राजानोऽपि स्वजीवने तपसः प्राधान्यं स्वीकृत्य वार्द्धक्ये विषयेभ्यो मनो नियम्य पुत्रे राज्यभारं समर्प्य कायक्लेशमगणयित्वा तपस्तप्तुमरण्यं प्रविशन्ति स्म। अत एव भगवान् मनुरपि दुष्करस्य दुरापस्य च कार्यस्य तपः साध्यत्वमुक्तवान् –

यद्दुष्करं यद्दुरापं यद्दुर्गं पञ्चदुस्तरम्।

तत्सर्वं तपसा साध्यं तपो हि दुरतिक्रमः।।आर्यजातेजीवनं धर्ममयमस्ति। धर्मस्य यज्ञदानतपांसि त्रीणि प्रधानान्यङ्गानि आवश्यककर्तव्यत्वेन शास्त्रेषु निर्दिष्टानि सन्ति। एषां

त्यागः कदापि नोचितः। यत एतानि त्रीमि मनीषिणामपि पावनानि सन्ति। अत एवोक्तं गीतायां भगवता श्रीकृष्णेननार्जुनं प्रति –

यज्ञो दानं तपः कर्म न त्याज्यं कार्यमेव तत्।

यज्ञो दानं तपश्चैव पावनानि मनीणिणाम्।। गीता १८।५।।

हिन्दुजातेर्व्रतोत्सवेष्वेषां त्रयाणामेव समावेगा दृश्यते। अतो नियमितरूपेण व्रतोत्सवानुष्ठानस्य व्यवस्था हिन्दुसमाजे प्रवर्तते। समाजविज्ञानानुसारं धर्ममयजीवनयापनस्याज्ञा पुराणादिषु शास्त्रेषु प्रदत्ताऽस्ति। चरित्रसंगठनार्थं व्रतोत्सवो महानस्ति हितकारी। व्रतेषूपलासस्य प्राधान्याद् व्रतं तपोधर्मस्य मुख्यमङ्गमस्ति। व्रतोत्सवस्य तपोधर्ममूलकत्वेऽपि तत्र दानधर्म यज्ञधर्मयोरपि समावेशा विद्यते। तत्रत्यानामादर्शचरित्राणामनुशीलनेन मनसः समुन्नतौ चरित्रसंगठने च महत् साहाय्यमवाप्यते। व्रतोत्सवानामनुष्ठानेन आयुष आरोग्यस्य ऐश्वर्यस्य च लाभो भवति। श्रद्धापूर्वकं भारतीयव्रतौत्सवेष्वनुष्ठितेष्वन्नवस्त्रादिदानस्य, नियमसंयमोपवासादिरूपस्य तपसः, भगवत्प्रीतिसम्पादनदैवीजगत्संवर्द्धनादिरूपस्य यज्ञस्य च समावेशाद् भक्त्या तत्पालनमत्यावश्यकमस्ति।

तस्मात् समस्तस्य जगतोऽत्यन्तमुपकारित्वाद् व्रतानि उत्सवाश्च अनिवार्यतया सर्वेषामनुष्ठानीयतामर्हन्तीति निश्चप्रचम्।।

**विद्यादानस्यापूर्वो महिमा**

दानानामुत्तमं दानं विद्यादानं विदपर्वुधाः।

तस्माद्विद्याप्रदो लोके सर्वदः प्रोच्यते बुधैः।। (गरुडपुराणे)

धर्माधर्मं न जानन्ति विद्यादानवहिष्कृताः।

तस्मात्सर्वप्रयत्नेन विद्यादानं प्रयच्छताम्।। (वाराहपुराणे)

वेदशास्त्ररहस्यानां यदि नैव नृपोत्तम।

ततोऽज्ञानतमोन्धस्य काऽवस्था जगतो भवेत्।।(अग्निपुराणे)

अन्नदानात्समं नास्ति विद्यादां ततोऽधिकम्।

अन्नेन क्षणिका प्रीतिर्यावज्जीवं तु विद्यया।। (मनुस्मृतौ)

कुक्षौ तिष्ठति यस्यान्नं विद्याभ्यासेन जीयति।

तदन्नं तारयेत्तस्य दश पूर्वान् दशपरान्।।(महाभारते)

**लेखकस्य वंशपरम्परापरिचयः**

पुराणादिषु शास्त्रेषि सङ्गीतयशसो सुदा।

देवश्लाघ्यस्य दिव्यस्य सर्वप्राणिहितैषिणः।।१।।

भारतस्योत्तरे भागे देवरियाख्यमण्डले।

धर्मागतछपरायां प्रसिद्धायां स्वमण्डले।।२।।

धनधान्यदिना पूर्णे सदाचारमनोरमे।

कुवेरनाथसविधे त्रिपाठिब्रह्मणान्वये।।३।।

रमेशमणिविदुषः प्रख्यातस्य सुकीर्तये।

नागेश्वरमणिर्विद्वान् तन.ऽभूद्द्विजाग्रणीः।।४।।

तदात्मजाश्च चत्वारो जाता विद्याविशारदाः।

शीलसौजन्यसम्पन्ना विनीता बुद्धिशालिनः।।५।।

बलदेवः सुदामा च भरोसापण्डितस्तथा।

चतुर्थोऽस्ति च श्रीकृष्णमणिशास्त्री प्रसन्नधीः।।६।।

माता फूलमती देवी श्रीमती शुभलक्षणा।

अजीजनत् सुतानेतान् मोदनिर्भरमानसा।।७।।

चत्वारो भ्रातरे ह्येते लोककल्याणकारिणः।

सर्वेऽपत्यकलत्रादिसुखिनः सौम्यमूर्तयः।।८।।

वात्सल्यस्नेहभाक् तेषु कनीयान् ग्रन्थलेखकः।

श्री श्रीकृष्णमणिर्वाग्मी काशीवासी सुधीवरः।।९।।

एतस्याप्यद्भुताः सन्ति तनया भाग्यशालिनः।

विजयश्च सुरेशश्च महेशश्च दिनेशकः।।१०।।

प्रासोष्ट शुभगानेतान् द्वे सुते अपि शोभने।

चन्द्रकलां च सावित्रीं राजदेवी मुदान्विता।।११।

सर्वसौभाग्यसम्पन्ना गृहिणी धर्मचारिणी।

रससन्ततिमाता सा मोदमाप्नोति सर्वदा।।१२।।

एतेषु विजयस्यास्ति पुत्रो विनयनामकः।

वालविद्यालयोऽधीते वयस्यै मोदमावहन्।।१३।।

कुवेरनाथकृपया विप्राणां च प्रसादतः।

स्वधर्मकर्मनिरतो वंशोऽयं भ्राजते भुवि।।१४।।